गादाधरी अनुमानमणिदीधितिटिप्पनी

१५२१

११६ पत्रे

सव्यभिचारसामान्यलक्षणमनुक्त्वा मणिकृता तद्विभजनमाक्षिपति यद्यपीति लक्षणतः लक्षणवाक्यतः ।
सामान्यं साधारणानुपसंहारित्रितयसाधारणधर्मप्रतीतं वत: अंतेवासिन इति विशेषः विशेषजिज्ञासानु
दयाद्वैतद्धर्मप्रकारकज्ञाने च्छात्यन्तसंभवात् सामान्यज्ञानस्य विशेषजिज्ञासायां स्वातंत्र्येण साधनताज्ञा
नधर्मितवच्छेदकज्ञानसंपादकतया वा हेतुत्वादिति भावः सामान्यलक्षणानंतरं सव्यभिचारसामान्यलक्ष
णानंतरं विभागः सव्यभिचारविभागः सव्यभिचारत्वावांतरधर्मपुरस्कारेण धर्मिप्रतिपादनमिति यावत्
नायं ग्रंथो विभागपरः अपि तु साधारणानुपसंहारिणोर्लक्ष्यताभ्रमनिबंधनवक्ष्यमाणसामान्यलक्षणाति
व्याप्तिभ्रमनिराकरणाय त्रयाणां लक्ष्यताप्रदर्शनपर इति समाधत्ते तथापीति साधारणमात्रे प्रसिद्धतयाऽ
तिप्रयोगविषयसाधारणमात्रकतया तन्मात्रस्य साधारणमात्रस्यात्रेति व्याप्तिः प्रतीयेत इति वध्यते तद्व्यावृत्त
स्यासाधारणादिव्यावृत्तस्य साधुतानिर्दोषतालक्ष्यतरमिति तथा च सव्यभिचार इति मूलस्य वक्ष्यमाणस
व्यभिचारसामान्यलक्षणलक्ष्य इत्यर्थः एतद्ग्रंथस्य विभागपरत्वमुपपादयतो मतमाह कश्चिदिति सामा
न्यज्ञानाधीनः सामान्यज्ञानसामान्याधीनः तल्लक्षणप्रत्ययं लक्षणवाक्याधीनसामान्यज्ञानमात्रं अत्र च
विभागो यथोक्तस्य सामान्यज्ञानस्योपायांतरतोऽभ्युपगमेयत्स्यादपि सामान्यलक्षणानः तल्लक्षणप्रत्ययं ल
क्षणवाक्याधीनसामान्यज्ञानमात्र अत्र च विभागो यथोक्तस्य सामान्यज्ञानस्योपायांतरतोऽभ्युपगमेयत्स्या ।
दपि सामान्यलक्षणाभिधानमसंगतमनाकांक्षितत्वादित्यस्वरसस्तत्वनाय कश्चिदित्युक्तं अथवा सामा
न्यज्ञानाधीनः त्रितयसाधारणयत्किंचिद्धर्मज्ञानाधीनः तल्लक्षणप्रत्ययं सव्यभिचारपदार्थतावच्छे ।
दकवक्ष्यमाणज्ञानं अपेक्षते अत इति तादृशलक्षणज्ञानेपि सव्यभिचारपदार्थ एवं कीदृश इत्येन जिज्ञासा

रेति न तत्सव्यभिचारपदार्थः कतीति प्रथमं विभागो नुचित इत्यस्वस्यबीजं प्रत्यंजकपदस्यात्र साधकाद्य-
याद्वकायोरेकतरमात्रपरत्वे ऽसाधकत्वादित्यादिदोषद्वयासंगतेस्तत्संगमनाय प्रसक्तिपदार्थं वितर्कयति ॥
प्रसक्तिरिति प्रपूर्वकसंजधात्वर्थ इत्यर्थः तत्कोटिव्याप्यस्यापि व्यभिचारेणानतद्विरुद्धकोटेर्वापदकत्वमनु-
मापकत्वं च संभवतीति एकस्योभयप्रत्यसाधकत्वादित्यादिदोषासंगतिरित्यनेनाशयं प्रकटयति तदुपधानमि-
ति प्रसक्त्युपधायकत्वमित्यर्थः अव्यापकमिति येन हेतुना कदाचिदपि साध्यस्य तदभावस्य वानुमिति-
रापत्तिर्वा न जनिता प्रत्येकमपि तदसंग्राहकमित्यर्थः तथाविधेति साध्याभावनिरूपितेत्यर्थः तद्योग्यता प्रस-
क्तियोग्यता वाच्या प्रसंजकपदेनाविवक्षणीया योग्यतायास्तत्त्वरूपयोग्यज्ञानविषयतारूपत्वे व्याप्तिभ्रमविषय-
तायाद्वयनतिसाधारणदोषप्रसंग इत्यतो योग्यतां व्याचष्टे साचेति तत्तत्कोटिप्रसक्तियोग्यता चेत्यर्थः व्याप्या-
दिरूपा तत्तत्कोटिनिरूपितव्याप्त्यादिरूपा साध्यसंदेह इत्यादिग्रन्थासङ्गतमूलग्रन्थात् पक्षधर्मताज्ञानस्य साध्य-
संदेहजनकत्वं कोटिद्वयोपस्थितिजनकत्वं च लभ्यते तन्न च अनित्यत्वादिसाध्यकज्ञानादिहेतौ वक्ष्यमाणातिव्या-
प्तिर्वारयितुमशक्यैव नित्यत्वतदभावविषयकज्ञानवान् घटमिति ज्ञानस्य नित्यत्वतदभावोपस्थापकत्वात् ।
धर्मितावच्छेदकप्रकारकज्ञानभिन्नत्वं तादृशज्ञानवत्त्वावच्छिन्नधर्मिकानित्यत्वसंशयहेतुत्वाद्धन च फली-
भूतसंशयधर्मितावच्छेदकतायास्तादृशधर्मपर्याप्ततादृशधर्मावच्छिन्नविशेष्यकयत्प्रकारकज्ञानत्वेन संशयं प्रति हे-
तुतेति विवक्षणीयत्वादोषः तादृशज्ञानस्य धर्मितावच्छेदकप्रकारकज्ञानभिन्नस्य नित्यत्वतदभावविषयकज्ञा-
नवदिदंत्वपर्याप्तधर्मितावच्छेदकताकसंशयं प्रत्येव हेतुत्वात् तादृशधर्मधर्मितावच्छेदकीभूतत्वाकारज्ञानव-
त्त्वानवगाहित्वात् घटज्ञानमिदंत्वे धर्मितावच्छेदकीभूतत्वं विद्यतदवगाहित्वात् घटज्ञानमिदंत्वधर्मितावच्छेदकीभूते

वनद्वयगाहित्वादिति वाच्यं एवं सति वह्न्यभावधर्मितावच्छेदकातिव्याप्तेरप्रसज्ज्या कोटिद्वयोप-
स्थापकत्वनिवेशवैयर्थ्यप्रसंगादित्यतो मूलमन्यथा व्याचष्टे साध्येनेति कोटिद्वयोपस्थापकं सदिति
एतेन कोटिद्वयोपस्थापकत्वे साध्यसंदेहजननोद्देश्यतावच्छेदकता लभ्यते एवं च धनवान् स्यामित्यादौ धना-
देः स्वत्वप्रयोजनकताबोधस्यानुभाविकतया उद्देश्यविधेयभावस्थलेऽसति बाधके उद्देश्यतावच्छेदकवि-
धेययोः प्रयोज्यप्रयोजकभावबोधस्य व्युत्पत्तिसिद्धत्वात् कोटिद्वयोपस्थितिजनकतानिर्वाहकता साध्यसंदेह-
जननवि^ वाहकतालाभेन व्यापारजनकतायाश्च फलजननिर्वाहकत्वात् कोटिद्वयोपस्थितेर्द्वारत्वालाभ
इति कोटिद्वयोपस्थितिद्वारा साध्यसंदेहजनकत्वं लभ्यते दर्शितज्ञानवत्ताज्ञानस्य च धर्मितावच्छेदकप्रका-
रकज्ञानमुद्रया साक्षादेव साध्यसंदेहजनकतया नातिप्रसंगः कोटिद्वयोपस्थितिद्वारा साध्यसंदेहजन-
कत्वं च साध्यसंदेहजनककोटिद्वयोपस्थितिजनकत्वे सति साध्यसंदेहजनकत्वं तत्र विशेष्यांशनिवेशनि-
ष्फलः सत्यन्तदलमात्रनिवेशेनैव सामंजस्यादतस्तं परित्यज्य निष्कृष्टार्थमाह साध्यसंदेहजनकेति
जनकान्तनिवेशप्रयोजनमाह आश्रयतयेवेत्यादिना आश्रयतया विषयतया वा नित्यत्वानित्यत्वोपस्था-
पकस्य नित्यत्वानित्यत्वोपस्थितिजनकीभूताश्रयत्वादिरूपसंबंधज्ञानविषयस्य ज्ञानस्य नित्यत्वे सा-
ध्ये वारणाय नित्यत्वसाधकस्थले सव्यभिचारत्वाभावसमासनायेत्यर्थः एकज्ञानस्य नित्यत्वतदभा-
वोभयाश्रयत्वाविरहादाश्रयतासंबंधमादाय यथाश्रुतेनातिव्याप्तिसंभवः इत्याश्रयत्वेति ज्ञानत्ववत्वसंब-
न्धेनानुसरणीयः अतस्तद्रूपेण चालनसंबंधमादाय व्याहृतिमहाविषयितया वेति एकज्ञानस्य तदुभयवि-
षयकत्वे निष्कृष्टमहमेवेति ध्येयं समवायेन हेतावति व्याप्तिरुक्ता संयोगेन हेत्वावपि तामाह अत्रहेत्वेति

२ गदा.

2

श्रवृत्तत्वं सामानाधिकरण्यं व्यावृत्तत्वं विरोधः ताभ्यां वह्नितदभावोपस्थापकस्य वह्नितदभावो-
पस्थितिजनकीभूतस्य दृष्टसंबंधद्वयज्ञानविषयस्य धूमस्य वह्नौ साध्ये वह्निसाध्यकस्थले वारणा-
य सव्यभिचारत्वाभावसंपादनायेत्यर्थः जनकांतस्य वारकत्वे हेतुमाह तयोरुपस्थितेरिति तादृशसं-
बंधज्ञानजन्योपस्थितिरित्यर्थः संदेहाजनकत्वादिति संदेहं प्रति साधारणधर्मासाधारणधर्मवद्-
मिविप्रतिपत्तिज्ञानजन्याया एव कोटिद्वयोपस्थितेर्हेतुत्वादितिभावः जनकताच साध्यसंशयत्वावच्छिन्न-
जन्यतानिरूपिता ग्राह्या अतः संबंधांतरज्ञानजन्यकोटिद्वयोपस्थितेर्विशेषणज्ञानादिमुद्रया साध्यसंश-
यहेतुत्वेपि न क्षतिः यत्र साधारणधर्मज्ञानादिजनसंशये व्यभिचारवारणाय साधारणधर्मादिज्ञानजन्यो-
पस्थितेर्जन्यतावच्छेदककोटौ तादृशोपस्थित्यव्यवहितोत्तरत्वनिवेशस्यावश्यकतया साध्यसंशयत्वे
तत्र प्रयोजनविरहेणाननिवेश उपदर्श्यते तत्र ज्ञानादृशसंशयत्वावच्छिन्नत्वं परित्यज्य साध्यसंशयत्व
न्यूनवृत्तित्वमेव निवेशनीयं विशेषणज्ञानादिजन्यताचनन्यूनवृत्तिरिति नातिप्रसंगः नचैवमपि यत्र
नित्यत्वानित्यत्वाभावसहचरितप्रमेयत्ववानयं नित्यत्वतदभावविषयकज्ञानवांश्चायमित्याकार-
कज्ञानाभ्यां नित्यत्वतदभावविषयिणी एकैवोपस्थितिर्जनिता तत्र तादृशोपस्थितिजनकापन्नधर्मताज्ञा-
नविषयत्वमादाय ज्ञाने नित्यव्याप्तिरेवीरानादृशोपस्थितिव्यक्तेः साधारणधर्मवत्ताज्ञानजन्यतया साध्य-
संशयत्वावच्छिन्नं प्रति जनकत्वादिति वाच्यं साध्यसंशयत्वावच्छिन्ननिरूपितजनकतानियतजन्यता-
निरूपकीभूतजनकतया एव पक्षधर्मताज्ञानविशेषणत्वोपगमान्नित्यत्वानित्यत्वविषयकज्ञानव-
ताज्ञानजन्यतापाः संशयाजनकसाधारणधर्मवत्ताज्ञानाजन्यतदुभयोपस्थितिसाधारणतया संशय

त्वावच्छिन्ननिरूपितजनकताव्यभिचारित्वेनातिप्रसंगविरहात् साधारण्यादिविशिष्टधर्मवत्ताज्ञानज-
न्यतद्रूपद्वयोपस्थितीनां सर्वासां तासां तादृशोपस्थितित्वेन संशयत्वावच्छिन्नं प्रति हेतुतया तादृशज्ञान-
निरूपितकोटिद्वयोपस्थितिनिष्ठजन्यतायाः संशयत्वावच्छिन्ननिरूपितजनकतानियतत्वमस्त्येव अ-
थवाऽत्रातिप्रसंगवारणाय तादृशजनकतावच्छेदकावच्छिन्नत्वमेव जन्यतायां निवेशनीयं अव्यवहितो-
त्तरत्वसंबंधेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानविशिष्टत्वकोटिद्वयोपस्थितित्वरूपतादृशज्ञानजन्यतावच्छे-
दकधर्मएव च संशयजनकतावच्छेदकः न च तादृशज्ञानजन्यत्वकोटिद्वयोपस्थितित्वं जन्यतापेक्षयातद्व-
दकास्याव्यवहितोत्तरत्वस्थलवृत्तित्वात् तत्रात्माश्रयेण साधारण्यादिधर्मवत्ताज्ञानजन्यत्वस्य तादृशज्ञान-
जन्यतानवच्छेदकत्वेऽपि न क्षतिः जनकतावच्छेदकावच्छिन्नत्वं च जनकतावच्छेदकपर्याप्त्यवच्छेदक-
ताकत्वं तेन साध्यसंदेहजनकतावच्छेदककोटिकज्ञानत्वादेर्नित्यत्वतदभावविषयकज्ञानवत्ताज्ञाना-
दिजन्यतावच्छेदकत्वेऽपि न क्षतिः जनकतावच्छेदकतायाः पर्याप्तिर्न निवेश्यते प्रयोजनविरहात्
तेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानत्वस्य जन्यतावच्छेदककोटौ तद्विशिष्टमात्रनिवेशेनैवोपपत्तौ प्र-
योजनविरहेण संशयजनकतावच्छेदकघटकस्य साध्योपस्थितित्वादेर्निवेशेऽपि न क्षतिः न चैवं साध्य-
संशयनिवेशनं व्यर्थं यत्किंचिज्जनकतावच्छेदकावच्छिन्नत्वं जनकतावच्छेदकपर्याप्त्यवच्छेदकताकत्वं
तेन साध्यसंदेहजनकतावच्छेदकघटकज्ञानत्वादेर्नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानादिजन्यताव-
च्छेदकत्वेऽपि न क्षतिः जनकतावच्छेदकतायाः जन्यत्वनिवेशेनैवोपपत्तेः नित्यत्वतदभावविषयकज्ञानव-
त्ताज्ञानीयजन्यतावच्छेदकस्याव्यवहितोत्तरत्वसंबंधेन तादृशज्ञानविशिष्टनित्यत्वादिविषयकोपस्थि-

३ गदा.

3

तित्वस्यकिंचिदपिकार्यंप्रतिजनकताहिशाब्दज्ञानविशिष्टनित्यत्वादिविषयकोपस्थितित्वावच्छेदकत्वाभावेना
तिप्रसंगविरहादितिवाच्यं तथासतिवह्न्यादौसाध्येतत्समतदभावसाहचर्यादिप्रकारकज्ञानमादाय
धूमादौ अतिप्रसंगापातात् प्रकृतसाध्यसंदेहजनकतायामवश्यंनिवेशनीयत्वात् नचकोटिद्वयपद॰
स्यप्रकृतसाध्यतावच्छेदकावच्छिन्नतदभावपरतयाप्रकृतसाध्यतावच्छेदकावच्छिन्नादिविषयकोपस्थि
तित्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिवेशान्नेयमतिव्याप्तिरितिवाच्यं एवंसत्य
तल्लाभायैवसंशयपक्षोपादानात् नन्वसाध्यसंदेहजनकमतधर्मताज्ञानविशेषेणैवसामंजस्येकोटिद्वयो
पस्थापकत्वांशनिवेशोऽनतिप्रयोजनकइत्याशंकामपनेतुंतत्प्रयोजनमाह धर्मितावच्छेदकेतितद्धारणा
ववह्न्यादिव्याप्येतद्धिमज्ञेवधूरोवृत्तित्वादौवह्न्यादिव्यभिचारित्ववारणाय कोटिद्वयेतुनचसाध्यसंदेहज
नकोपस्थितिजनकत्वमेवनिवेश्यतांकिमुपस्थितौकोटिद्वयविषयकत्वनिवेशनेनेतिवाच्यं तथासतिव्या॰
प्यविरुद्धयोरतिव्याप्तिस्तथाहिसंशयंप्रतितत्तत्कोटिसहचरिताज्ञानजन्यतदुपस्थितित्वेनतदभावको
टिसहचरितधर्मवत्ताज्ञानजन्यतदभावोपस्थितित्वेनपृथगेवतत्साहचर्यविषयतामन्तर्भाव्यहेतुताक
ल्प्यते एवंतत्तत्कोट्युपस्थितिंप्रत्यपितथैवतत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेनहेतुताइत्थंचवह्न्यभा
वसहचरितधूमवानितिज्ञानजन्यवह्न्यभावोपस्थितिसहकारेणवह्निसंशयजनकवह्न्युपस्थितिजनकी॰
भूतवह्निसहचरितधूमवानितिज्ञानमादायधूमेवह्निसहचरितजलत्ववानितिज्ञानजन्यवह्न्युपस्थिति
सहकारेणवह्निसंशयजनकवह्न्यभावोपस्थितिजनकीभूतवह्न्यभावसहचरितजलत्ववानितिज्ञा॰
नमादायचजलत्वेअतिव्याप्तिः कोटिद्वयोपस्थितिनिवेशेचतथाविधज्ञानयोःप्रत्येकंकोटिद्वयोपस्थापक

त्वाभावान्नातिप्रसंगः नचवह्निसहचरितधूमवान् वह्न्यभावसहचरितधूमवांश्चेत्येतादृशसमूहालंब
नज्ञानस्यकोटिद्वयोपस्थापकत्वेनैतद्दोषवारणायतस्यापिनिवाच्यं साध्योपस्थितिजनकतावच्छेदकीभूतताया
साध्याभावोपस्थितिजनकतावच्छेदकीभूतप्रकारतानतिरिक्तत्वनिवेशात्तादृशसमूहालंबनज्ञाननिरू
पितयोर्वह्नितदभावसहचर्यावच्छिन्नप्रकारतयोः प्रत्येकंतादृशजनकताद्वयावच्छेदकत्वविरहेणातिप्र
संगविरहात् धूमसहचरितवह्निमान् धूमाभावसहचरितवह्निमांश्चपर्वतइत्यादिसमूहालंबनज्ञानेप्र
कारतावच्छेदकभेदेनवह्न्यादिप्रकारताभेदात् प्रत्येकंकस्याश्चिदपिप्रकारतायास्तादृशजनकताद्वया
वच्छेदकत्वासंभवेपिधूमधूमाभावसहचरितवह्निमान् पर्वतइत्यादिज्ञानीयोभयधर्मावच्छिन्नविल
क्षणीकप्रकारतायास्तथात्वेनैववह्न्यादौलक्षणसमन्वयः वह्नितदभावसहचरितधूमवान्पर्वतइत्या
द्याकारकोभयसहचर्यावच्छिन्नप्रकारताशालिज्ञानमादायातिप्रसंगस्तुतादृशप्रकारतावच्छेदकता
पर्याप्त्यधिकरणधर्मवत्त्वविवक्षयास्वयमेवनिराकरिष्यति अथवह्निसहचर्यमात्रेणवह्न्यभावसहचर्य
मात्रेणवह्न्यत्तावाव्याप्यस्यविरुद्धस्यवाप्रकारतातस्याश्चोद्बोधकानवशात् साध्यतदभावोभयविषय
कसमूहालंबनरूपसाध्योपस्थितिजनकज्ञानीयतयाप्रत्येकंसाध्योपस्थितिजनकतयंसाध्याभावोपस्थि
तिजनकतयोश्चावच्छेदकत्वेनातिप्रसंगः यदिचसाध्याविशेषणकोपस्थितिवृत्तिसाध्यसंदेहजनकता
नियतंयज्ज्ञत्वेननिरूपितायास्तादृशोपस्थित्यवृत्तिसाध्यसंदेहजनकतानियतंयज्ज्ञान्यत्वेननिरूपितायांचज च१
नकतायामवच्छेदिकायाःप्रकारतानस्याःसाध्याभावविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकाव
च्छिन्नजनकतानिरूपितायांतादृशधर्मानवच्छिन्नसाध्यविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदका।

४ गदा०

वच्छिन्नजन्यतानिरूपितायां च जनकतायामवच्छेदिकायाः प्रकारतायास्तादृशत्वानिवेशान्नोक्तदोषः साध्या-
भावोपस्थितित्वावच्छिन्नाया अपि जनकतायाः साध्यविषयकत्वघटितधर्मावच्छिन्नतया विरहादस्याति-
व्याप्तेर्दुर्वारतया साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतायां साध्याभावविषयकत्वानवच्छिन्नत्वनि-
वेशात् साध्यमुख्यविशेष्यताघटितधर्मावच्छिन्नत्वं निवेशनीयं वा तादृशातिव्याप्तिवारणायेत्यवधेयम् । तथापि
वह्निमद्वृत्तिवह्न्यभाववद्व्यावृत्तधूमवानयं वह्निमद्व्यावृत्तवह्न्यभाववद्वृत्तिजलत्ववानयमिति ज्ञानी-
यधूमादिप्रकारतामादायातिप्रसंगो दुर्वार एव वह्निमद्वृत्तिधूमवत्ताज्ञानजन्यवह्न्युपस्थितेर्वह्न्यभाव-
वद्वृत्तिधूमवत्ताज्ञानजन्यवह्न्यभावोपस्थितिसहकारेण संशयजनकतावद्वह्न्यभाववद्व्यावृत्तधर्मवत्ताज्ञा-
नजन्यवह्न्यभावोपस्थितेरपि वह्निमद्व्यावृत्तधर्मवत्ताज्ञानजन्यवह्न्युपस्थितिसहकारेण संशयजनकता-
त् । तादृशज्ञानीयधूमप्रकारतायाः वह्निसाध्यकावच्छिन्नत्वेन संशयजनकवह्न्युपस्थितिजनकतायां व-
ह्न्यभाववद्व्यावृत्तित्वावच्छिन्नत्वं न च तथाविधवह्न्यभावोपस्थितिजनकतायां तादृशज्ञानीयजलत्व-
प्रकारताया अपि वह्निमद्व्यावृत्तत्वावच्छिन्नत्वेन तथाविधवह्न्युपस्थितिजनकतायां वह्न्यभाववद्वृ-
त्तित्वावच्छिन्नत्वेन च तथाविधवह्न्यभावोपस्थितिजनकतायामवच्छेदकत्वात् मेवं साध्यविषयक-
त्वघटितधर्मावच्छिन्नजनकतावच्छेदको यो धर्मस्तदवच्छिन्नजन्यतानिरूपितायां तदवच्छिन्नसहकारि-
तावच्छेदकसाध्याभावविषयकत्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिरूपिता-
यां च जनकतायामवच्छेदकीभूतप्रकारतानिवेशेनातिप्रसंगः तदवच्छिन्नसहकारितावच्छेदका-
त्वं च तदकत्वं च तदवच्छिन्नासमवधानप्रयुक्तफलोपधायकत्वाभाववत्त्वावच्छिन्नकत्वमित्यले

पल्लवितेन तत्संशयधर्मितावच्छेदकेदंत्वादिकं असाधारणतयेति संशयविषयमानवृत्तित्वेनस
पक्षविपक्षव्यावृत्तत्वादितिभावः संग्राह्यमेवसंशयपदस्थायांसव्यभिचारसामान्यलक्षणलक्ष्य
मेवातयावसंशयपदस्थायांलक्ष्यतयैवनातिव्याप्तिसंभवः तदवच्छिन्नसाध्यादितिनिश्चयपदस्थायांच
तत्प्रकारकज्ञानस्यसंशयाजनकतयासंशयजनकताघटितलक्षणस्यैवतत्साधारण्येनसंभव
तीतिहृदयं तादृशनिश्चयपदस्थायामेवातिव्याप्तिसंगमयति तथात्वेपीति तथात्वेपितदवच्छिन्न
विशेष्यकसंशयपदस्थायांतस्यलक्ष्यत्वेपीत्यर्थः तदुत्तीर्णतादृशायांअसाधारण्योत्तीर्णतादृशायांतादृ
शयमेवातिसाध्यस्यतदभावस्यवानिश्चयपदस्थायामितियावत् विशेषदर्शनात् विपरीतनिश्चयात् ।
तज्जननयोग्यतायाइतितत्प्रकारकज्ञानस्येत्यादिः अनिवृत्तेरिति अतिव्याप्तेरितिशेषः वक्ष्यमाणदो
षेणफलोपधायकतानिवेशासंभवादितिभावः इदमुपलक्षणंफलोपधायकतानिवेशेपिसंशय
जनकज्ञानशून्यतादृशायांसाधारण्याव्याप्तिभयेनतादृशज्ञानस्योपलक्षणविधयैवलक्षणेनिवे
शनीयतयासंशयोत्पादककालोत्तीर्णज्ञानविषयतामादायातिव्याप्तिःसंभवतीतिबोध्यं अ
न्यथाफलोपधायकज्ञानस्यविशेषणविधयालक्षणघटकत्वे पक्षादाविति पक्षेसाध्यादिनिश्चयस
त्वेपिधर्म्यंशेतद्विशेष्यकसाध्यसंदेहजनकतामादायापिलक्षणसमन्वयसंभवादाहादिपदेहेतुमत्ताज्ञान
विशेष्यीभूतपक्षेतत्रयावद्धर्मिपरेनिश्चयपदस्थायामित्युपलक्षणंसाधारण्यादिविशिष्टस्यप्रकारकध
र्मिज्ञानशून्यतादृशायामप्यव्याप्तिर्बोध्या साधारणाव्याप्तीति साधारणस्यनित्यदोषतयानतादृशस्या
लक्ष्यतोपगमासंभवादितिभावः कोटिद्वयोपस्थापकत्वांशस्यप्रयोजनांतरंवर्णयतोमतमाह ॥

५ गदा. 5

सत्प्रतिपक्षेति स्वमते व्याप्यवत्तानिश्चयस्य संशयप्रतिबंधकत्वमेव न तु कारणत्वं विरोधिपरामर्श-
योरप्रमाण्यग्रहे तु साधारण्यादिधर्मिज्ञानादेव संशय इत्यतो जनक त्वपत्त इति हेतुवारणाय व्याप्यस-
त्ववारणाय तस्यापि परामर्शात्मकसंशयजनकपक्षधर्मताज्ञानविषयत्वादिति भावः ननु साधारण्या-
दिविशिष्टधर्मवत्ताज्ञानस्यैव परामर्शतयोरपि साध्यतदभावोपस्थितिद्वारैव संशयजनकत्वात् कोटि-
द्वयोपस्थितिनिवेशोपि न तत्कार इत्यत आह हेत्वनेति तदुभयोपस्थापकत्वे साध्योपस्थितिजनकतावच्छे-
दकासती तदभावोपस्थितिजनकतावच्छेदकीभूतायाः प्रकारताया आश्रयत्वं निश्चितसाध्याभाववद्वृत्ति-
त्वस्य साधारण्यघटकतामते केवलविरुद्धे केवलसाध्याभावनिश्चयसत्त्वएव श्रवणत्वस्य तथात्वं संभवती-
त्यभिप्रेत्य तादृशानिश्चयसत्त्वे तु चापि तेयात्किञ्चिद्धर्मकस्य पक्षतालाभाय इदमिति साधारण्यधर्मव-
द्धर्मिज्ञानस्यानित्यत्वानित्यत्वसहचरितगुणत्ववद्गुणकज्ञानस्य धर्मिणि गुणके नित्यसाध्यकस्थले
तस्य लक्ष्यत्वसूचनाय सद्धेताविति प्रसंगोऽतिव्याप्तिः नच समूहालंबनविषयतामादायातिप्रसं-
गस्य वारणाय कोटिद्वयोपस्थितिजनकतावच्छेदकीभूतविषयताश्रयत्वपर्यंतनिवेशनमावश्यकं त-
था च कथं धर्मिण्यतिव्याप्तिः यतः तत्तत्कोटिस्वतो तत्तत्कोटिसहचरितादिविशिष्टविषयकज्ञानत्वेनैव हे-
तुतानत्तु तद्विशिष्टवद्धर्मिज्ञानत्वेन संबंधिविशेष्यकज्ञानादपि संबंध्यंतरस्मरणात् अन्यथा यं हस्तिसं-
बंधी घटपटं घटपटाविति मित्याकारकज्ञानात् हस्तिघटादिस्मरणानुदयप्रसंगात् तथा च धर्मिविषय-
तायाः कोटिद्वयोपस्थापकतावच्छेदकत्वमेव नास्तीति वाच्यं एकसंबंधिनिशिष्टधर्मिज्ञानत्वेनैवाप-
रसंबंधिस्मारकतेति मतानुसारेणैव तल्लक्षणप्रणयनात् एतन्मतस्यानर्थक्यकितानयापक्षधर्मतापद-

स्यनिष्प्रयोजनकत्वमाकलय्योतत्‌ परित्यागेन सिद्धान्तलक्षणस्यवक्ष्यमाणत्वात्‌ वस्तुतस्तु सा
ध्यसंदेहजनककोटिद्वयोपस्थितिजनकज्ञानविषयत्वमित्यस्य कोटिद्वयोपस्थितिनिष्ठायासाध्यसं
देहजनकताजन्यतासंबंधेनाव्यवहितोत्तरत्वसंबंधेन वावच्छिन्नायां तदवच्छेदकतायामवच्छेदिका
याविषयतातदाश्रयत्वमर्थः एवंच साधारण्यादिधर्मविशेष्यकज्ञानस्य कोटिद्वयस्मरणजनकत्वे
पि संशये धर्मिभाननियमाय तत्तद्धर्मिकसंशयं प्रति साधारण्यादिविशिष्टधर्मवत्तद्धर्मिज्ञानविशि
ष्टकोटिद्वयोपस्थितित्वेन हेतुतेति धर्मिविषयतायाअपिताहशसंदेहजनकतावच्छेदकतायामवच्छेदक
त्वादतिव्याप्तिरतः पक्षधर्मतापदोपादानमावश्यकमिति पक्षधर्मत्वेनैव पक्षधर्मतापदोपादा
नेपितदोषतादवस्थ्यं धर्मिणोपि पक्षधर्मताज्ञानविषयत्वादिति वाच्यं नञुपादानबलेन निश्चयाजा
जनकत्वमथ तदवच्छेदकतायां वावच्छेदकीभूताया धर्मिविषयतानिरूपिताविषयता प्रकारतापर्यव
सितातदाश्रयत्वस्य लाभेनातिप्रसंगाविरहात्‌ प्रकारतायाः प्रकारतात्वेनावच्छेदकत्वं विवक्षणी
यं तेन साधारणधर्मादिधर्मितावच्छेदकीभूते सह्येतो नातिप्रसंगः धर्मितावच्छेदकीयविषयतायाः प्रकार
तात्वव्याप्येन धर्मितावच्छेदकतात्वेनैव निवेशात्‌ प्रकृतपक्षस्य प्रकृतपक्षतायाश्च निवेशे प्रयोजनाभा
वात्‌ पक्षपदं धर्मिमात्रपरतया व्याचष्टे पक्षपदमिति धर्मिमात्रेति मात्रपदेन पक्षतानिवेशव्यवच्छे
दः यत्तद्धर्मिपदमत्र साध्यविशेष्यपरं तेन नवह्निवत्त्वाभाववत्सहचरितधूमवहृत्तिप्रमेयत्ववान्यत्र इत्यादि
ज्ञानीयधूमादिविषयतामादाय नातिप्रसंग इति तत्र साहचर्यधर्मितावच्छेदकीयविषयताया जनक
तावच्छेदककोटौ प्रयोजनविरहेणानिवेशान्निवेशेपि वा धर्मितावच्छेदकविषयतातः यातिधूमा

6

दिविषयतामादायायातिप्रसंगाभावात् पक्षपदस्यपक्षताविशिष्टप्रकृतपक्षपरत्वमावश्यकंअ
न्यथाचरादिरूपपक्षैकदेशवृत्त्यादिनानित्यत्वसाधनेबाधस्यासिद्धेर्वा वत्तादृशायामपिसपक्षविपक्षव्या
वृत्तशब्दत्ववान् शब्द इत्यादितादृशविषयतामादायशब्दत्वादेः सव्यभिचारत्वापत्तिर्नचेष्टापत्तिर्दोषांत
रसंकरप्रसंगात् असत्त्वनेचपक्षताविशिष्टप्रकृतपक्षवृत्तितानानस्यविशेषणविधयालक्षणघटक
त्वान्नातिप्रसंगः बाधग्रहस्थलेपक्षतायाअसिध्यवतारेचहेतौप्रकृतपक्षधर्मताज्ञानस्याभावादित्याशं
कते नचैवमिति एवंपक्षपदस्यधर्मिमात्रपरत्वेबाधसंपादनायाः नित्यत्वस्यसाध्यत्वानुसरणं एवंचघ
टोनित्य इत्यत्रौ नत्रप्रक्षेपएकयानित्यत्वसाध्यकात्वेनस्फुटीभवतीतिनित्योघटइत्यत्रबाधादी
त्यादिनासिद्धिपरिग्रहः असाधारण्यापत्तिः असाधारण्यज्ञानमादायसव्यभिचारत्वापत्ति एतेना
स्यसव्यभिचारसामान्यलक्षणतयापत्तदत्तिप्रसक्तोऽसाधारण्यनापादकत्वात्संगतिरित्यपास्तंसपक्षा
वृत्तित्वेनसाधारण्यस्यकेवलान्वयिधर्मस्यपक्षतानवच्छेदकत्वाद्व्यपसंहारित्वस्यचासंभवात् परि
शेषेणासाधारण्यापत्तिरितिवार्थः तदानींसपक्षविपक्षव्यावृत्तत्वसत्त्वेदोषांतरावतारेपिसव्यभिचा
रत्वमसाधारण्यंचेष्टमेवतत्रविरहादित्यापाद्येनाह इष्टत्वादिति अन्यथापक्षधर्मताज्ञानस्यवा
विशेषणत्वे बाधासिध्योरिति बाधस्यासिद्धेर्वा वक्ष्यमाणायांहृदादौधूमादिसाधनेवह्न्यादेरसंग्र
हापत्तेरित्यर्थः साधारण्यस्यनित्यदोषतया नचेष्टापत्तिर्नसंभवतीतिभावः ननुदोषांतरावतारदशा
यांसव्यभिचारत्वेव्याप्तिनैव्यूनएवभवतुसाधारण्यस्यनित्यदोषत्वेन्यतआह अतिद्धीति साधारण्य
भ्रममादायेति यथायथंसाध्याभाववद्वृत्तित्वसाध्यवद्वृत्तित्वांशेभ्रमात्मकेसाधारण्यज्ञानमादाय

त्यर्थः धर्मिण्येकलीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नयद्रूपावच्छिन्नवत्ताज्ञा
नेयद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्ने साध्यसंदेहजनकमिति एतच्च संशयं प्रति कोट्यु
पस्थितिविशेषणज्ञानादिमध्ये एव हेतुः साधारणधर्मवद्धर्मिज्ञाने च साक्षादेव तथेति निष्कृष्टमते र
कोट्युपस्थितिजनकतया घटितमेव लक्षणं कर्तव्यमित्यभिप्रायेण यथाश्रुतमूलानुरोधेन संशयज
नककोटिद्वयोपस्थितिजनकमित्यपि व्याचक्षते तन्मते धर्मिणीति प्रकारतात्वेनावच्छेदकत्वला
येति ध्येयं अग्रे एवं साधारण्यादिघटककेवलसाध्यवद्वृत्तित्वाद्यवच्छिन्नत्वमादायातिप्रसंगो दुर्वारः
न च धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वमेव संशयतान
तिरिक्तावृत्तितद्वत्त्वस्य साध्यसंशयजनकतावच्छेदकीभूताया धर्मितावच्छेदकावच्छिन्नविशेष्यता
निरूपितप्रकारतानवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वस्य वा निवेशान्नातिप्रसंगः संशयप्र
तिकोटिद्वयसहचर्याद्यवच्छिन्नप्रकारताशालिज्ञानत्वेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्यै
कैकहेतुताकल्पनादेकैककोटिसहचर्याद्यवच्छिन्नप्रकारताशालिज्ञानस्य संशयाजनकतयोभ
यकोटिसाहचर्यादेरेव तादृशधर्मत्वादिति वाच्यं उक्तरूपेणैकैकहेतुताकल्पनेऽप्येककोटिसह
चर्याद्यवच्छिन्नत्वविशिष्टापरकोटिसाहचर्यावच्छिन्नत्वेनैव प्रकारतायां निवेशनीयतयाऽव
च्छिन्नत्वयोर्विशेषणभावे विनिगमनाविरहात् व्याप्यसंशयस्य धारणधर्मवत्ताज्ञानान्तर्भावानुप
पत्तेश्च तत्र व्याप्यतदभावयोः प्रत्येकमुभयकोटिसहचरितत्वाभावात् न च व्याप्यसंशयस्य ष्टयथक्रा
कारणतामत एवेदं लक्षणमिति वाच्यं व्याप्यसंशयस्योत्पादेऽयथाविरोधात् न च यद्यद्रूपावच्छि

गदा. 1

त्वप्रकारकज्ञानत्वेन संशयजनकतातन्नद्रूपनत्वस्य संशयजनकतावच्छेदकप्रकारतापर्याप्तिमत्तीयेये
धर्मास्तन्नद्धर्मवत्त्वस्य वा विवक्षया नातिप्रसंग इति वाच्यं सत्तावत्समवेतजातिमात्मत्वाभाववत्समवेतजा।
तिमानयमित्यादिभ्रमविषयतावच्छेदकसत्तावत्समवेतत्वाद्यादायसत्तादिसाध्यकेज्यात्वादवति व्याप्तेः।
सत्ताभावत्वस्य तेन तत्वस्याप्रसिध्यापत्यदेन तद्रूपाद्यानासंभवात् वस्तुतस्त्वेवं विवक्षणेऽसाधारण्यादेरपि।
ताहृशयावत्धर्मवत्त्वाभावात् असंभव एव तादृशप्रकारतावच्छेदकयावद्धर्मवत्त्वविव।
वक्षया साधारण्यादिवारणं व्याप्यसंशयेत्यादिग्रंथासंगतिश्चासंभवति साधारण्यादेरप्यसाधारण्यादिप्रकार
कज्ञानस्य संशायकत्वात् एतेन संशयजनकतावच्छेदकीभूता या या प्रकारता तदवच्छेदकतापर्याप्त्यधिक
रणधर्मवत्त्वानवेशेऽपि न निस्तारः धर्मिणि यद्रूपावच्छिन्नप्रकारकज्ञानस्य यद्रूपावच्छिन्नप्रकारकज्ञानस।
हकारेण साध्यसंशयजनकत्वं तदुभयरूपवत्त्वस्य विवक्षितत्वेऽपि व्याप्यसंशयस्येत्यादिग्रंथासंग
तिरेव शाक्यसमाधिरेव व्याप्यत्वावच्छिन्नप्रकारकज्ञानसहकारिणो धर्मिविशेष्यक स्वनिष्ठरूपान्तरा।
वच्छिन्नप्रकारताकज्ञानस्याप्रसिद्धेर्व्याप्यत्वमादाय व्याप्तेः न प्रसंगाप्रसक्तेः मैवं यत्किंचित्साध्यसंदे
हजनकतानिरूपिता या जनकता या यवच्छेदका या या धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारता।
तत्तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वं सव्यभिचारत्वसाधारण्यादिविशिष्टहेतुमत्ताज्ञानज।
न्यसंशयजनकतावच्छेदकीभूतानादृशीं प्रकारतां साध्याभाववद्वृत्तित्वाद्यवच्छिन्नामपि तदवच्छेदकाव
त्वाभावान्नव्याप्याद्यावतिप्रसंगः यत्किंचित्संशायनवेशात् साधारण्यादेः साधारण्याद्यवस्थत्वेऽपि नक्षत।
तिः व्याप्यसंशयस्य च व्याप्यवत्ताज्ञानत्वेनैव हेतुतानन्तत्वव्याप्याभावप्रकारकत्वमपि तत्र निवेश्यते ।

व्याप्यवत्तानिश्चयदशायां तस्य प्रतिबंधकत्वादेव संशयापत्त्यसंभवात् अतो व्याप्याभाववत्त्वावच्छि
न्नप्रकारतायाः संशयजनकतानवच्छेदकतया व्याप्याभाववत्त्वस्य व्याप्यसत्वेपि न तत्र वह्नेमाणायात्र
तिव्याप्तेरप्रसक्तिः न च व्याप्यसंशयहेतुतायामप्रामाण्यनिश्चयानास्कंदितत्वस्यैव निवेशाद्यावज्ञा
निश्चयादप्रामाण्यशंकास्कंदिताद्व्यापकसंशयापत्तिस्तस्याविरोधित्वादिति व्याप्यसंशयहेतुत्वमावश्य
कमिति वाच्यं यादृशविषये व्याप्यवत्तानिश्चयदशायां व्यापकसंशयस्येतरसकलकारणसमवधाने ता(
दृशनिश्चये प्रामाण्यसंशयएवनजातः ततोऽज्ञानिप्रसंगासंभवेन निश्चयसाधारण्यव्याप्यवत्ताज्ञानत्वेन हे
तुतायाः निष्प्रत्यूहत्वात् तादृशस्थलीयातिव्याप्त्यभिप्रायकतयैव ग्रंथस्य व्याख्येयत्वात् नचतत्रापि
व्याप्यवत्ताज्ञानत्वेन व्यापकसंशयहेतुतानसंभवति तथा सति धर्मितावच्छेदकसामानाधिकरण्यमात्रा
वगाहिव्याप्यवत्तानिश्चयात्तदवच्छेदेन व्यापकवत्तानत्सामानाधिकरण्यमात्रेण व्यापकाभावमव(
गाहमानस्य संशयस्यापत्तेस्तादृशसंशयेनादृशनिश्चयस्याविरोधित्वादिति वाच्यं धर्मितावच्छेदकाव(
च्छेदेन व्याप्यवत्तावगाहिनः संशयादेव तदवच्छेदेन व्यापकवत्तावगाहिसंशयोदयात् तादृशव्यापक
वत्तावगाहिसंशये तादृशव्याप्यवत्तावगाहिनः संशयादेव तदवच्छेदेन व्यापकवत्तावगाहिसंशयोदया
त् तादृशव्यापकवत्तावगाहिसंशये तादृशव्याप्यवत्तावगाहिज्ञानत्वेनैव हेतुत्वोपगमात् उक्ताय
तेरप्रसक्तेः अथवा संशयजनकतावच्छेदकप्रकारतायाः सव्यभिचारितात्वटकसंबंधावच्छिन्नत्वनि
वेशात्स्वावच्छेदकतया वह्निव्याप्यधूमवान्नवेति संशये अभावप्रकारतायाः संयोगादिसंबंधानवच्छिन्न(
तया तत्संबंधावच्छिन्नव्याप्यप्रकारतैव संशयजनकतावच्छेदिकेत्यतिव्याप्तिप्रसंगनप्राव्याप्यसंशयेत्या

गदा. 8

देवसंगतिः अथ साधारणधर्मवत्ताज्ञानस्य संशयजनकत्वे धर्मैव प्रयोजकतामते तत्संबंधे व्यस्याप्य-
प्रयोजकतया तन्मते संशयजनकतावच्छेदकया प्रकारतास्व प्रत्येकमवच्छेदकीभूतानि यानि द्व-
याणि तद्वत्त्वनिवेशे अप्रमात्वाज्ञानादित्यादौ विषयतया आत्मत्वाभावसमनाधिकरणज्ञानवत्ताज्ञानस-
हकारेण साध्यसंदेहजनकं च तत्समवायेन साध्यसहचरितज्ञानादिमत्ताज्ञानं तदीयप्रकारतामादाय स-
मवायेन ज्ञानादेर्व्यभिचारित्वापत्तिरिति चेन्न तस्यापत्तिरिति चेत् तत्त्वं यत्किंचित्साध्यसंशयनिरूपितज-
नकतावच्छेदकीभूता धर्मितावच्छेदकावच्छिन्ना या या विशेष्यता तन्निरूपितसव्यभिचारिताघटकसं-
संबंधावच्छिन्नप्रकारतावच्छेदकधर्मवत्त्वमेव विवक्षणीयं तथा सति उक्तस्थले विषयतासंबंधाव-
च्छिन्नज्ञानप्रकारतानिरूपितविशेष्यताया अपि निरुक्ताया वह्निविशेष्यतान्तर्गततया तन्निरूपितसव्य-
भिचारताघटकसंबंधावच्छिन्नप्रकारत्वाप्रसिद्ध्या नातिव्याप्तिः एवं च संशये समुच्चयवैलक्षण्या-
य उभयप्रकारतानिरूपितैकविशेष्यतास्वीकारं मते व्याप्यसंशयीयकोटिद्वयप्रकारतानिरूपित-
विशेष्यतानिरूपितव्याप्यताघटकसंबंधावच्छिन्नप्रकारतावच्छेदकव्याप्यत्वमात्रमादायातिःसंभवती-
त्याशंक्य व्याप्यस्पार्थेत्यादिकमभिहितं वस्तुतस्तु जनकतावच्छेदकया वत्प्रकारतावच्छेदकवत्त्वा-
दिनिवेशो धूमतदभाववसहचरितकांचनमयवह्निमानित्यादिज्ञानीयप्रकारताया अपि धूमसहचरि-
तवह्निमानित्यादिज्ञानजन्यसंशयजनकतावच्छेदकधूमसहचरितवह्नित्वावच्छिन्नप्रकारतात्वादिना-
निवेशेन निरुक्तयाद्रत्प्रकारतान्तर्गततया तदवच्छेदकतायत्थोस्याधिकरणकांचनमयत्वादिघटितधर्म-
वत्ताया वह्न्यादौ उपपादनया असंभवदुर्नियत्किंचित्संशयनिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताघटि-

तद्धर्मावच्छिन्नाया याज्ञनकतानतद्वच्छेदकीभूततानादृशाविशेष्यतानिरूपितप्रकारतावच्छेदकताप-
र्याप्तिमद्वत्त्वमेव विवक्षणीयं एवं च कोचनमयत्वाद्यवगाहितदनवगाहिज्ञानसाधारणकारणताया
ऐक्ये तदवच्छेदकीभूतकाचनमयत्वाद्यनवगाहिज्ञानीयप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मव-
त्त्वमादाय वह्निधूमादिसाध्यकवस्त्रादौ लक्षणसमन्वयः संशयप्रतितन्त्रकोटिसाहचर्यावच्छिन्नप्रकारताशा-
लिज्ञानत्वेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्य कारणतानाद्ययीति व्याप्यविरुद्धयोरतिव्याप्तिनिरासः
एवं च व्याप्यसंशयनिष्ठायाउभयकोटिप्रकारत्वावच्छिन्नायाजनकताया रोकव्यानवच्छेदकीभूतव्याप्य-
प्रकारतावच्छेदकव्याप्यत्वमादाय व्याप्येऽतिप्रसंगोऽतु वारणपवैत्याशंकव्याप्यसंशयस्य हेतुत्वका कार-
णतामतेज्ञानपदस्य निश्चयपरत्वमुपदर्शितं नच व्याप्यसंशयस्य उभयप्रकारत्वेन नैकहेतुताविशेषण-
भावे विनिगमनाविरहात् घटितप्रत्येकप्रकारतानिवेशपहेतुतानाद्वयमेव कल्पनीयमिति नातिव्याप्तिप्र-
सक्तिरिति वाच्यं हेतुतानाद्वयकल्पने पत्र व्याप्यवत्तानिश्चयस्य स्वांशेऽप्रामाण्यसंशयात्मकस्यानन्तरव-
णो व्याप्याभाववत्तानिश्चयः तदुत्तरक्षणे व्यापकसंशयापत्तेः एतेन यावत्प्रकारतात्वेन निवेशेऽयमा-
त्मज्ञानादित्यादौ उत्तरीत्यातिव्याप्त्या वर्णितद्वारणाय यावद्विशेष्यताघटितकल्पनादरणीयः अपित-
निरुक्तजनकतावच्छेदकीभूतायावत्यः प्रकारताः सव्यभिचारत्वाघटकसंबंधावच्छिन्नानां तासां प्र-
त्येकावच्छेदकरूपवत्त्वनिवेश्यं एवं चायमात्माज्ञानादित्यादौ नोक्तक्रमेणातिव्याप्तिसंभवः विषयता-
संबंधावच्छिन्नज्ञानादिप्रकारतानामपि निरुक्तयावत्प्रकारतांतर्गततया सव्यभिचारत्वाघटकसं-
१८ बंधावच्छिन्नत्वस्य तत्रासत्वेन नेनरूपेणातद्याज्ञाना संभवात् तथाच तावताव्याप्यसंशयस्य हेतुता

मादाय्यातिप्रसंगः वारणसंभवेन विशेष्यतानां यावत्त्वेन निवेशानं ज्ञानं ज्ञानपदस्य नियमपरत्वं च न यत्ना॰
मितिपर्वपत्तानवकाशः अथवा व्याप्यत्वसंशयस्य साधारणधर्मवत्ताज्ञानान्तर्भावेन नैकैककोटिसामाधि
करण्यमादाय सङ्केतावतिप्रसंगवारणाय यत्किञ्चित्संशयजनकतावच्छेदककोटिप्रकारतापर्यंतनिवेश
नीय व्याप्यसंशयस्य यत्प्रकारतामतेऽत्रनोक्तक्रमेण सङ्केतावतिप्रसंगस्यानवकाशः तन्मते कोटि
द्वयसामानाधिकरण्यावच्छिन्नत्वेनैव प्रकारताया जनकतावच्छेदकत्वोपगमात् प्रत्येकैककोटिसह
चर्यावच्छिन्नप्रकारतायाः संशयजनकतानवच्छेदकत्वात् अतो या प्रकारतानिवेशनं संश॰
ये च यत्किंचिन्निवेशनं च न कर्तव्यमेव अपि तु व्याप्यसंशयहेतुतामादाय अतिप्रसंगवारणाय ज्ञानपदमे
व निश्चयपरतयोपगंतव्यं इत्थमेव व्याप्यसंशयेत्यादिना अभिहितेन च धर्मेण प्रसक्तसंशयजनकतायां तत्र तामे॰
तेपि कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेनैकत्र विवक्षयते विशेष्यविशेषणभावे विनिगमनाविरहा
त् अपि त्वेकैकसामानाधिकरण्यावच्छिन्नत्वं प्रत्येकं निवेश्य कारणताद्वयमेव कल्प्यते धूमसहचरि॰
तवह्निमत्त्वज्ञानधूमाभावसहचरितवह्निमत्ताज्ञानत्वावच्छिन्नयोः परस्परसहकारित्वान्न कोटिद्वयस
हचरितविभिन्नधर्मवत्ताज्ञानात् संशयप्रसंगः धूमसहचरितवह्निमान् तदभावसचरितवह्निमा॰
निति ज्ञानद्वयादितोपि संशयः स्वीक्रियते तथा च सत्वे तावतिप्रसंगवारणाय यावत्प्रकारतानिवेशनं य
त्किंचित्वनिवेशनं चावश्यकमिति वाच्यं विभिन्नहेतुत्वे साहचर्यधर्मितावच्छेदकवह्नित्वइत्यत्वादिधर्मा
णां विशिष्यानिवेशो कोटिद्वयसहचरितधर्मवत्ताज्ञानयोः परस्परसहकारित्वोपगमेपि विभिन्नधर्मव
त्ताज्ञानात् संशयापत्तेरुद्धारतया तादृशधर्माणां विशिष्यनिवेशनीयतया कारणतानंत्यापत्तेरिति॰

संक्षेपः अथवद्रव्यं विशिष्टसत्त्वादित्यादेः सव्यभिचारताप्रसंगः विशिष्टस्यानतिरिक्ततया विशि
ष्टसत्त्वनत्वादौ साध्यतदभावसहचरितत्वनवद्वृत्तित्वोः सत्त्वादिति चेन्न गुणकर्मान्यत्वसामाना
धिकरण्यरूपेण हि विशिष्टं हि क्वाचित्कद्विदलक्षणतया हेतुतावच्छेदकं क्वाचिद्विशेषणतया तत्राद्यप
क्षानुमित्यादिलक्षणप्रविष्टतद्व्यक्तिसमवेतत्वादिकं तद्विशिष्टानुमितित्वादिजातेः व्यर्थत्वे तदेः सत्त्वेन
भागासिद्धेस्तस्य विशेषणत्वायोगात् अत एव तादृशजातावन्यभवत्त्वान्यत्वादिविशेषणं व्यभिचारवा
रकतया सार्थकं द्वितीयं च यथा प्राहुः नित्यः वाच्यकारणकप्रत्यक्षत्वे सति सत्त्वादित्यादौ सत्त्वं तादृश
स्य च विशेषणत्वे एवं सद्धेतुत्वानिर्वाहात् तथा च दूषितस्य वैशिष्ट्यस्य उपलक्षणतया हेतुतावच्छे
दकत्वे सव्यभिचारत्वमिष्टमेव विशेषणत्वे च विशिष्टनिरूपितसमवायादिरेव हेतुतावच्छेदक
संबंधो वाच्यः अन्यथा यद्धर्मविशिष्टनिरूपितसमवायादिरेव हेतुतावच्छेदकसंबंधो वाच्यः अन्य
था यद्धर्मविशिष्टनिरूपितत्वानवच्छिन्नसमवायादिर्हेतुतावच्छेदकसंबंधः तस्य हेतुप्रकारस्य उप
लक्षणतया हेतुतावच्छेदकत्वात् विशेषणतानुपपत्तेः न च विशिष्टनिरूपितसमवायादेर्हेतुतावच्छे
दकसंबंधत्वे तेन संबंधेन शुद्धसत्त्वादेरव्यभिचारितया तद्विशेषणवैयर्थ्यमिति गुणकर्मान्यत्वस
ति सत्त्वादिति हेतुप्रयोगे निग्रहप्रसंग इति वाच्यं विशिष्टविशेषणशुद्धावेव विशिष्टनिरूपितत्वस
संबंधातावच्छेदकतया तद्रूपविशिष्टनिरूपितसमवायादिना तद्रूपानवच्छिन्नस्य हेतुत्वासंभवात्
एवं च विशिष्टनिरूपितसमवायादिना सद्धेतौ विशिष्टसत्त्वादेर्नैतेन सव्यभिचारताप्रसंगः यादृशेन सं
बंधेन पक्षधर्मताविषयकं यत् ज्ञानं तस्य तादृशेन संबंधेन कोटिद्वयसहचारावगाहितायाः संशय

९ गदा.

यकताप्रयोजकत्वात् समवायसामान्यसंबंधेन साहचर्यावगाहिनो दर्शितविशेषसंबंधेन पक्षधर्म-
ताज्ञानस्य च संशायकत्वविरहात् तादृशविशेषसंबंधेन पक्षधर्मताज्ञानस्य च संशायकत्वविरहात्
तादृशविशेषसंबंधेन वह्न्यत्वाद्यभावसाहचर्यस्य सत्त्वावभावात् तादृशसाहचर्यावगाहिभ्रमसा-
यातिप्रसंगानवकाशात् अथ यथा हेतुतावच्छेदकोपलक्षिते व्याप्तिज्ञानस्यापि पक्षे तद्विशिष्टवैशिष्ट्य-
ज्ञानादनुमितिरधिकं त्वित्यादिन्यायात् तथा विशिष्टसत्तात्वोपलक्षिते सहचारोपग्रहस्य तेन तद्विशि-
ष्टवैशिष्ट्यस्य धर्मिण्याज्ञानादपि संशयोत्पत्तिः संभवितेति चेन्न उभयस्थलयोर्विशेषात् तथाहि सामान्यरू-
पेण सामान्यसंबंधेन वा व्याप्तिग्रहे सामान्यघटितेन विशेषरूपेण विशेषसंबंधेन वा पक्षधर्मताज्ञानादनुमि-
तिर्यत्यने हेतोस्तत्संबंधस्य वा संकोचे व्याप्तेरव्याप्तेर्व्याघातात् सामान्यरूपेण सामान्यसंबंधेन सहचार-
ग्रहे विशेषरूपेण विशेषसंबंधेन वा पक्षधर्मताज्ञानान्न संशयः संकोचस्यासाधारण्यव्याघातकत्वात् अ-
नपेक्षवह्नित्वादिना धूमतदभावादिसहचारग्रहे आर्द्रेन्धनप्रभववह्नित्वादिना धर्मिवृत्तित्वज्ञानान्न धूमा-
दिसंशयः नवा संयोगसामान्येन धूमतदभावादिसहचरितत्वग्राहे महानसानुयोगिकसंयोगेन धर्मिणि ज्ञा-
नात्संशयः नवा तथासाधारण्यप्रसंगात् इति अथ द्रव्यगुणकर्मान्यत्वे सति सत्त्वादित्यत्र सद्धेतौ द्रव्यगुणान्यत्वे स-
ति सत्त्वादित्यत्र विरुद्धे चातिव्याप्तिः विशेष्ये साध्यतदभावोभयसामानाधिकरण्यसत्त्वेन विशिष्टेपि
तत्सत्त्वादिति चेन्न साध्यतदभाववद्वृत्तितावच्छेदकविशिष्टवत्ताज्ञानस्यैवासाधारणधर्मदर्शनविधया सा-
ध्यतदहजनकत्वात् यत्किंचित्साध्यसंशयजनकतावच्छेदकीभूता या या प्रकारतावच्छेदकता न तदव-
च्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टप्रकृतहेतुतावच्छेदकावत्त्वविवक्षणे नातिप्रसंगविरहात् विशि-

10

ष्टसज्ज्ञात्वरूपप्रकृतहेतुतावच्छेदकस्य उभयवद्वृत्तितावच्छेदकत्वविरहात् तथा सति यादृशयादृशध
र्मावच्छिन्नप्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन यत्किंचित्संशयजनकता तादृशता
दृशरूपविशिष्टज्ञानत्वस्य विवक्षणीयत्वात् यत्रोभयसहचरितवृत्तित्वं प्रकारतावच्छेदके भासते तत्र
उपलक्षितनत्वज्ञाताज्ञानस्यापि हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेनाजनकत्वात् उभयवद्वृत्तितावच्छेद
कत्वेउप्रकारतावच्छेदकस्य यत्र भानं तत्रोभयसहचारघटकतदवच्छिन्ननिरूपिताधिकरणतावगाहिज्ञा
नस्यैव हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेन हेतुत्वमावश्यकमिति तादृशहेतुतायसाधारणे उभयवद्वृ
त्तितानवच्छेदकविशिष्टवैशिष्ट्यबोधत्वेन हेतुतामादाय चासाधारण्ये लक्षणं संगमनीयं प्रकृतपक्षधर्मता
ज्ञानानिवेशे च घटज्ञानं सविषयकमित्यादिनि स्वयकालेन घटज्ञानं सविषयकं न वेत्यादिसंशयप्रति
घटज्ञानधर्मिकसविषयकत्वज्ञानं प्रमा न वेत्याद्याकारकसंशयो हेतुः प्रथमेन स्वघटितपद्यं संशयेन
द्धर्मिकप्रामाण्यसंशयस्य हेतुत्वात् सवप्रमाण्यसंशयः सविषयकत्वतदभावरूपकोटिद्वयोपस्थि
त्यात्मकः सविषयकत्ववति सविषयकत्वप्रकारकत्वरूपप्रामाण्यस्य सविषयकत्वेन तदभाववति तत्प्र
कारकत्वरूपाप्रामाण्यस्य च तदभावेन घटितत्वात् तादृशप्रामाण्यसंशये च सविषयकत्वादिज्ञानधर्मि
कप्रामाण्याप्रामाण्यसहचरितज्ञानत्वादिमज्ज्ञानं हेतुरिति सविषयकत्वादिरूपसाध्यसंदेहजनककोटिद्व
योपस्थितिजनकधर्मिवृत्तिताज्ञानविषयत्वे ज्ञानत्वादावक्षतमेवेति प्रकृतपक्षधर्मताज्ञाननिवेशस्त्वावश्यकः
तन्निवेशे च सविषयकत्वादिज्ञानधर्मिकज्ञानत्ववत्ताज्ञानस्य तादृशज्ञानविषयघटज्ञानादिरूपप्रकृतपक्ष
धर्मताविषयकत्वान्नातिव्याप्तिरिति मिश्रमतं हृदयनिहितं सविषयकमिति सविषयकत्वस्य स्वरूपसंबंधात्म

११ गदा. कत्वेनाननुगतत्वात्तस्मिन्साध्ये ज्ञानत्वादिकं सव्यभिचारमेवेत्यत आह आत्मवृत्तिरेवेति अप्रामाण्यं भ्रमत्वं
तत्प्रमात्वाभावः तस्य साध्याभावावच्छेदकत्वात् तज्ज्ञन्यकोट्युपस्थितेर्वेतिमतभेदेन तज्ज्ञानस्य प्रामाण्यप्रा-
माण्यसहचरितज्ञानत्ववत्ताज्ञानस्य तादृशसंशयाहेतुत्वात् सविषयकत्वादिसंशयजनककोटिद्वयोपस्थि-
तिजनकत्वेपि प्रामाण्यसंशयस्य कथितार्थसंशयहेतुतायाः अप्रामाणिकतया तादृशकोट्युपस्थितेः साध्य-
संशयाहेतुत्वादिभावः नन्वविना साधारणधर्मज्ञानं प्रामाण्यसंशयस्थले विषयसंशयो दुर्यात् साधारणा-
दिधर्मज्ञानादिवत् प्रामाण्यसंशयस्यापि संशयजनकत्वमावश्यकमित्यत आह प्रामाण्यसंशयेति ज्ञानव-
लक्षणसमानधर्मदर्शनात् प्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानात् प्रामाण्यस्य संदेह इति योजना एतच्च दृ-
ष्टान्तविधयोक्तं ज्ञानविषयतात्मकसाधारणधर्मदर्शनात् तत्प्रकारकज्ञान/विशेष्यत्वरूपतदभावसहचरित-
धर्मवत्ताज्ञानात् विषये घटज्ञानादौ तद्वत्त्वस्य सविषयकत्वादेः तादृशधर्मवत्ताज्ञानासत्त्वेच संशयोः सिद्धप्रवे-
तिभावः नन्वेवमर्थनिश्चयदशायामपि साधारणादिधर्मज्ञाने प्रामाण्यसंशये सत्यर्थसंशयः असतितत्त-
स्मिन्नेत्यन्वयव्यतिरेकाभ्यां विधानेनोपपद्यत इत्यत आह अप्रामाण्यसंशयेति तदर्थसाधारणधर्मज्ञानतादृशवि-
शिष्टप्रतिबन्धकाभावसंपादकत्वनिबन्धनेन तथाच प्रयोजकत्वेनैवान्वयव्यतिरेकाभ्यां विधानोपपत्तेर्नन्तत्कार-
णसाधकमिति भावः व्याप्यसंशयस्येति व्याप्यतदभावयोर्व्यापकतदसहचरितत्वमासाधारणधर्मदर्शनवि-
धयैव व्याप्यसंशयो व्यापकसंशये हेतुः धर्मस्यैकतायाः ज्ञानस्य निश्चयतायाश्चाप्रयोजकत्वात् परावव्याप्या-
भावस्य व्यापकाभावसहचरितेन प्रतिसन्धानेन तद्धर्मिणि तद्व्याप्यधर्मप्रमानोपि न तत्संदेहः इति स्वीयमते स्व-
धर्मसंशयजनकतावच्छेदकप्रकारतावच्छेदकसाध्याभाववद्वृत्तित्वस्य व्याप्यैःसत्वेनानिव्याप्त्यनवकाशात् य

योगादिहेतु त्वविशेषणस्य कार्यकारणतामते व्याप्तिमाहायातिव्याप्तिः प्रागेवोपपादितात्ताज्ञानपदं
निरूपपरमितिताादृशजनकतायांनिरूपयावच्छिन्नत्वविशेषणंदेयमित्यर्थः सद्धेतावतिव्याप्तेर्वाल
वसाधारणधर्मादिमत्वाभावेनाप्रसक्तेर्हेतुत्वाभिमतपदोपादानवैयर्थ्यमित्याशंकायामाह हेत्वितितेनसं
बंधेनसव्यभिचारत्वघटकतयाभिमतसंबंधेनजनकतासत्त्वेनाधेजनकतायालक्षणघटकतालाभा
र्थेन तथाचतादृशपदोपादानस्वरसात् यादृशरूपावच्छिन्नपक्षसंबंधावच्छिन्नप्रकारताशालिज्ञानेसा
ध्यंसंदेहजनकंतादृशरूपवात्तेनसंबंधेनव्यभिचारइत्येवलक्षणार्थकांतेव्याप्तिभावः समवायेनहेतोसम
वायेनचव्याप्ते एतेनालक्षणत्वंदूषितंज्ञानघटादेर्नातिप्रसंगइतियोजनानसमवायेनसव्यभिचारत्वप्रसं
गइत्यर्थः अतिप्रसंजकंविशेषणमाह विषयत्वसंयोगादिनातत्संदेहजनकइतिविषयत्वसंयोगादिसं
सर्गघटितसाध्यतदभावसाहचर्यप्रकारेणानादृशसंबंधेनस्वप्रकारकंयत्संशयजनकज्ञानंनहिविषये
त्यर्थः नचतेनसंबंधेनतद्वत्ताज्ञानस्यलक्षणघटकत्वेपिसमवायेनज्ञानघटादेःप्रकारज्ञानमादायाति
प्रसंगइतिवाच्यंतेनसंबंधेनतद्वत्ताज्ञानस्यतत्संबंधघटितसहचारविषयकस्यैवसंशयजनकतयास
मवायसंबंधावच्छिन्नायांसंशयजनकतावच्छेदकप्रकारतायांसमवायसंबंधघटितसाध्यतदभाव
सहचारस्यैवावच्छेदकतयातद्वत्तायाःज्ञानघटादावसत्त्वेनातिव्याप्त्यनवकाशात् विप्रतिपत्तिस्थित्या
दिकूलेतथापदस्यकोटिव्यापकत्वपरत्वे संगतिस्तद्घटकसाध्यतदभावव्यापकपदयोःप्र
त्येकंप्रत्येकोटिव्यापकत्वात् प्रत्येकमनन्वयात्त्वेपिवाक्यंतत्रनलक्षणसत्त्वमित्यपिस्फुटमितिनकुत्र
धर्मधृत्त्वेवदर्थधूरापित्वाव्याचष्टे विप्रतिपत्तेरितिविप्रतिपत्तिघटकतानन्यदज्ञानस्येत्यर्थः तदन्यद

गदा. विषयकप्रत्येकज्ञानयोः कोटिद्वयोपस्थापकत्वविरहे विसदृशज्ञालंबनज्ञानस्य तथात्वात् नहाद्यायेवा-
12 तिव्याप्तिर्भविष्यतीत्याशंकायां न वा पक्षवृत्तिरिति मूलावतार इति सूचयितुं पूरणसंवलितं तदर्थमाह मि-
लितस्येति मिलितविषयकज्ञानस्येत्यर्थः तदुपस्थापकत्वेपि कोटिद्वयोपस्थापकत्वेपि तद्व्याज्ञानं
तादृशवाक्यप्रकारताशालिज्ञानत्वावच्छिन्नं तथा कोटिद्वयोपस्थापकं न तथा च पक्षधर्मतापदोपादानादे-
व न तत्रातिव्याप्तिरिति भावः पक्षधर्मतापदानुपादानेपि न तत्रातिव्याप्तिः संभवति पदद्वयविषयकज्ञा-
नस्य कोटिद्वयोपस्थितिजनकतावच्छेदकत्वविरहात् लक्षणे च कोटिद्वयोपस्थितिजनकतावच्छेद-
कीभूताया विषयतायाः तदाश्रयत्वमिति पर्यवसितार्थः ननु विप्रतिपत्तिघटकप ज्ञानां प्रतिपाद्यत्वादि-
संबंधेन कोटिद्वयसहचरितत्तथा तेन संबंधेन तद्वत्ताज्ञानस्य संशयहेतुत्वात् तेषां प्रत्येकं संदेहजनकको-
टिद्वयोपस्थितिजनकतावच्छेदकविषयताश्रयत्वमक्षतमेवेत्यत आह तथात्वेपीति विप्रतिपत्तिघटकपदा-
नां प्रत्येकं तादृशविषयताश्रयत्वेपीत्यर्थः अवयवेष्वव्यभिचारत्वमिति तथा च लक्ष्यतैव न तत्रातिव्याप्तिरिति
भावः ननु उपसंहारीपक्ष एवेति मूलमसंगतं संबंधनिश्चयस्यैव संबंधिस्मारकतया पक्षे साध्यस्य तदभा-
वस्य च संदिग्धतया न तदेतद्भावेन हेतोस्तत्सामानाधिकरण्यस्य निश्चेतुमशक्यत्वेन हेतोः कोटिद्वयोप-
स्थापकत्वासंभवात् अतोभिप्रायं व्याचष्टे उपसंहारीति अनुपसंहारितादृशायां पक्षे साध्यसंदेह-
दशायां उक्तक्रमेण तादृशलक्षणसमन्वय इति योजना यद्वा पविशिष्टवं ज्ञानं साध्यसंदेहजनकं वा लक्षव-
तद्रूपस्यैव लक्षणार्थं तयोः प्रवर्तितत्वात् सर्वमनित्यं प्रमेयत्वादित्यादौ पक्ष एव क्वाचित्साध्यस्य क्वाचित्सा-
ध्याभावस्यानिश्चयदशायां नित्यत्वतदभावसहचरितप्रमेयत्ववत्सर्वमित्यादिज्ञानस्य संभवेन तद्धि-

ध्यतावच्छेदकोभयसहचर्यमादाय साध्यसंदेहदशायामपि लक्षणसमन्वय इत्यर्थः अनुपसंहारि
णोतीयांतदुभयसाहचर्यसत्त्वेपीदानीं तादृशहेतोः साधारणतयानसामानिलक्षणातिव्याप्तिरिति भावः
साधारणएवविषयकज्ञानत्वावच्छिन्नस्यैव संशयान्वयव्यतिरेकाभ्यां विधायित्वात्तेनैव रूपेण संशयहे
तुतानतु तद्विषयकनिश्चयत्वेन तदवच्छिन्नस्यान्वयव्यतिरेकविधायिताया असिद्धत्वात्तथा च साध्यसं
शयकाले साहचर्यनिश्चयासंभवेपि तद्रूपसंशयात्मकसंशयजनकज्ञानमादाय लक्षणसमन्वयः संभव
तीति केचिदाहुस्तन्मतमुपन्यस्यति केचित्त्विति वस्तुतो वस्तुगत्या साधारणज्ञानेपि यन्साधारणेतत्त्व ता
नेपितत्त्वतस्तत्तायामविकारेऽनवच्छेदकंपक्षतावच्छेदकंतांतर्भावेणैव तत्संशयेति साहचर्यांशेसंशयेत्यर्थः
साहचर्यज्ञानात् साहचर्यविशिष्टप्रकारकज्ञानात् तथात्वसव्यभिचारत्वे तच्चित्यमितिसंबंधांशेनि
श्चयात्मकसंबंधज्ञाने संबंधस्तु स्मारकंशानमादि संशयात्मकदार्थस्मरणायत्तत्वमत्रोरिति साधारणसंशये
कोट्युपस्थापकत्वेन संभवति एवं संशयसाधारणसहचरज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयानास्कंदितत्वम
वावच्छेदककोटौ निवेशनीयं तन्निश्चयत्वेन हेतुत्वे तु अप्रामाण्यज्ञानानास्कंदितत्वमेवेति लाघवात् संश
यात्मसहचारज्ञानेन हेतुरेवं अनुपसंहारि तादृशायां संशयजनकज्ञानसंपादनप्रयासोपि विफलः तादृश
ज्ञानासत्त्वदशायां साधारण्याव्याप्तिभयेन तादृशज्ञानस्यापि लक्षणविधेयेव लक्षणघटकत्वादिति चिंताबी
जमुद्भावनीय केवलान्वयीत्यादिहेतुलमवतारयति नन्वित्यादिना अथ घटपतत्वादिस्थलेपक्षतादशायां संश
यजयोजकानिश्चितसाध्यतदभाववद्वृत्तित्वस्य सत्त्वाद्व्याप्यस्य प्रसक्तेस्तस्यालक्ष्यतयाऽव्याप्तिपरिहारो न सं
गच्छत इत्यत आह निश्चितसाध्यवद्वृत्तित्वं संपादयति एवमिति हेतुमत्तेदृत्त्ववतिपूर्वं घटत्वग्रहे एव तन्मूल

गदा०

13

कात् सद्घटइत्याकारकस्मरणाद्द्वयघटत्वेनैव तद्घटभेदोऽन्यघटे गृहीतं प्राक्यते नान्यथा प्रतियोगितावृ
च्छेदकप्रकारकप्रतियोगिज्ञानविरहादिति धर्मिणि पूर्वं घटत्वग्रहस्यानुसरणात्तद्घटभिन्नोऽयमिति भ्रमपर्यंते
तद्घटानवस्थानेनाहार्यभ्रम एव न संभवति विशेष्याविरहादतस्त्विदंत्वेनोक्तं तद्घटभिन्नोऽयमिति भ्रमदर्पणाया इ
दंत्वावच्छिन्ने घटत्वग्रहे इदंत्वस्य साध्यसहचरितत्वेन निश्चितत्वात्तद्घटभिन्नोऽयमिति भ्रमानुधावने इदंत्वस्य
निश्चिते साध्यवत् धर्मिव्यावृत्तत्वज्ञानसंपादनायात साधर्मिणि घटत्वनिश्चयसत्व एव संशयप्रयोजकस्यत
त्कालीनतत्संशयीय साध्यनिश्चयविषयव्यावृत्तस्येदंत्वासत्त्वमतः केवलतद्व्यक्तित्वेन प्रतियोगिविषयात
द्घटमानुरूपे त्वयघटत्वेन तज्ज्ञानानुसरणे तथा सति ताहार्यभेदभ्रम एव तद्व्यक्तित्वविशिष्टेव धर्मिणि घ
टत्वस्य निश्चयइति तत्रिशिष्टेदंत्वे दर्शितसंशयप्रयोजकरूपाभावाद व्याप्तिप्रसक्तिः इदंत्वविशिष्टे घटसामान्य
भेदभ्रमे इदंत्वो विपक्षवृत्तित्वानिश्चयसंभवात् व्यावृत्तत्वज्ञानासंभवादसाधारण्ये न शंकस्य दर्पणीतियोगि
कोटौ तन्नाभानानुधावने इदंत्वेऽपीति अव्याप्तिरित्यनुषज्यते वस्तुतस्तद्व्यावृत्तत्वाभावेन वास्तविकस्य सा
ध्यनिश्चयविशेषीभूतधर्मिव्यावृत्तत्वस्याभावेन लक्षणायोगादिति वास्तवसंशयप्रयोजकरूपवत्त्वस्य लक्षण
घटत्वादिति भावः अतएवेत्यत्रेदंपदेन पूर्वाभिहितायाः सत्त्वे नत्वाज्ञानस्य पक्षधर्मतायाः परामर्शः संग
तिः तस्यासाधारण्यादेरनित्यदोषतायामनुपष्टम्भकत्वात् अतः तत्परामर्शनीयं व्याचष्टे अतएवेति पक्ष
धर्मताधीनेपक्षधर्मतिपक्षे च साध्यतदभावानिश्चयसाध्याभावव्याप्यवत्ताभ्रमाधीनतद्दोषत्वे हेतोरसा
धारण्यसत्प्रतिपक्षरूपदोषवत्वे तस्य असाधारणस्य सत्प्रतिपक्षस्य चानित्यदोषत्वदर्पणाविशेषरूप एव हेतोर्दु
ष्टतासंपादकत्वं साहजिकत्वेनाहार्यापक्षधर्मदोषविरहदशायामपि हेतोर्दुष्टतासंपादकत्वे का हानिरित्यनित्यक

दाविदेवहेतोर्दृष्टतासंपादकत्वं एतावताऽयंचरटइत्यादेर्दृष्टाविशेषेप्रकृतदोषादोनदृष्टत्वशंकायाश्चनिहृ
त्तैस्तन्निवृत्त्यर्थं अन्यथेत्यादिग्रंथसंगमनायेप्रूरयति एवंचेति दोषताप्रयोजकनिश्चितसाध्यवद्यावृत्त
त्वादिकंहेतोरितिष्टतीतिशेषः तथानित्यदोषत्वमपितत्रैवानित्यदोषत्वमपिभ्रमादोषताप्रयोजकरूपस्येति
अन्यथापदार्थंव्याचष्टे भ्रममात्रादिति तादृशरूपभ्रममात्रादित्यर्थः कोविदित्यस्वरसस्तूचनायचनिश्चि
तसाध्यतदभाववद्यावृत्तत्वस्यसंपाद्यप्रयोजकतायाः अयोग्यत्वाभावात् असाधारण्यादेः प्रकृतदोषाधीन
दोषतायाः प्रकृतानुपयोगितयामलानुपपन्नातथाचानर्गलैवत्यचेदंपदेनतत्परामर्शेसदर्थविरोधाच्चतस्यधा
रणस्यधर्मस्यवृत्तिमतः ननुतादृशहेतोः संपाद्यप्रयोजकरूपशून्यत्वेऽसाधारण्यमेवकथंबीजाभावादित्य
तआह असाधारण्येत्विति अतइत्याशंकातः नन्वयंचरपतत्वादित्यादेरिवतत्पक्षत्रयापाहेतोः नित्यपाह
त्वादित्यादेरपिसत्त्वेतत्त्वमेवशब्दोनित्यः पाहृत्वादिकमपिविरुद्धमेवनत्वसाधारणंसाध्याभाववद्यावृ
त्तत्वाभावादित्युदाहरणाभावादसाधारणहेत्वाभावस्यैवाप्रसिद्धिरित्यतआह एवंचेति अवृत्तीति अव्यती
तिवृत्तिमतः साध्यतदभाववद्यावृत्तत्वासंभवादिभावः ननुपक्षधर्मताज्ञानविरहादेवगगनादिहेतुकस्य
लैःनुमित्यनुत्पाददनिर्वाहादसाधारण्यज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वमेवनास्तीतिकथंतस्यहेत्वाभा
भासतेत्यतआह पक्षवृत्तित्वेतिअसंकरः इतरानधीनानुमित्यनुत्पादप्रयोजकज्ञानविषयत्वेनन्नूभयव्या
वृत्तत्वस्यवृत्तिमत्त्वविरुद्धतयातदुभयज्ञानस्यनैकदासंभवः मिथः प्रतिबंधकत्वात् नचैवंपक्षधर्मताज्ञा
नाभावसमपादकतयैवतस्यहेत्वाभासत्वेनिष्प्रत्यूहतयासत्यासिद्धावेवातभावेनसव्यभिचारप्रभेदत्वानुप
पत्तेरतआह नचोभयेतिस्वरूपतोविरोधः यस्यराभावव्याप्यत्वाविशेषितयोः परस्परज्ञानप्रतिबंधकीभू

गदा.

14

तज्ज्ञानविषयत्वं वा तद्वद्विशिष्टविषयकस्यापि ज्ञानस्य विरोध्यविषयकस्याप्रतिबंधकत्वादिति भावः न॰
नु निश्चितसाध्याभाववद्वृत्तित्वरूपसंशयप्रयोजकधर्मस्योक्तहेतौ सत्त्वात् कथं तत्राव्याप्तिशंका
कथं वा तस्य तत्त्वाभ्युपगमेन तत्सत्त्वे वा दूष्यत आह निश्चितेति साध्यतदभाववनिश्चयीभूतधर्मिव्या॰
वृत्तित्वेन साध्यसंदेहजनकतावच्छेदकविषयतावच्छेदकमित्यर्थः निश्चितसाध्यतदभाववद्वृत्तित्व॰
स्य साध्यतदभाववनिश्चयविषयवृत्तित्वस्य तथात्वे संशयप्रयोजकत्वे सद्धेतौ वह्न्यधिकरणवृत्तितया
निश्चिते धूमादौ धर्मिवृत्तित्वग्रहदशापर्यंतानुधावनं संशयजनकज्ञानस्याविशेषणाविषयालक्षणघट॰
कत्वेऽपि व्याप्तिः संभवतीत्यभिप्रायेणावस्तुतोपदाहृत्य मति साध्याभावभ्रमावतेने तदाहृतेतीनदध॰
वारणवृत्तित्वग्रहेऽप्यतिव्याप्तिः संभवतीत्याह यज्ज्ञानस्योपलक्षणत्वादिति ध्येयम् ताहशेति साध्य॰
तदभावविषयकेत्यर्थः तत्र संशयप्रयोजकतावच्छेदकरूपघटकं रूपं संदेहजनकतावच्छेदक॰
रूपे स्य संशयजनकतावच्छेदकप्रकारतावच्छेदकस्य विशेषणत्वे धर्मिविशेषणतया सव्यभिचारप॰
दप्रतिपाद्यत्वे महानसादिवृत्तिताहशामव्याप्तिः तत्कालीनतभावेण व्यभिचारित्वव्यवहारापत्तिः त॰
दानीं साध्याभाववद्वृत्तित्वाभावस्य तत्र सत्त्वान्नाहशव्यवहारविषयस्याबाधितत्वादिति भावः नच॰
द्रव्यं विशिष्टसत्त्वादित्यादौ प्रतिव्याप्तिवारणाय साध्यसंदेहजनकतावच्छेदकप्रकारतावच्छेदकताधर्म॰
वत्त्वघटितहेतुतावच्छेदकधर्मवत्त्वमेव व्यभिचारपदार्थो वाच्यः साधारणस्थले च ताहशो धर्मः साध्यत॰
दभाववद्वृत्तितावच्छेदकत्वमेव तादृशविशिष्टहेतुतावच्छेदकावच्छिन्नहेतुमत्ताज्ञानस्यापि संदेहजन॰
कतोपगमात् एवं च रासभादेर्महानसादिवृत्तिताहशायोवह्न्यभाववद्वृत्तित्वविरहेऽपि तदवच्छेदक॰

ग सभत्वादिसत्त्वेन तादृशाव्यभिचाराभावो नास्तीति कथमुक्तव्यवहारापत्तिरिति वाच्यं एवमपि श्रुति
स्यधर्मस्य हेतुतावच्छेदकत्वेन तद्ग्रहसत्त्वदशायामापत्तिस्तादृशावस्थानविशेषणत्वे कालविशेषावच्छिन्नतया
तदानीं व्यभिचारीत्यादिव्यवहारविषयत्वेऽव्याप्तिस्तत्कालान्तर्भावेण तादृशव्यवहारानुपपत्तिरिति तन्ना-
र्थः साधारण्यस्यानित्यदोषतया कालविशेषान्तर्भावेन व्यभिचारित्वव्यवहारजनकतायाः तद्वेष्टत्वात्
उपलक्षणत्वे अस्येनायोगव्यवच्छेदपरिहारकतया व्यभिचारपदप्रतिपाद्यत्वेन तादृशानुपात्यतायोगव्यव-
च्छेदस्य तन्त्रदार्थत्वोपगम इति यावत् असाधारण्यानैकान्तिकतादृशायां हेतुमति साध्यतदभाववान्यतरनिश्च-
यदशायां तत्कालान्तर्भावेनातिव्याप्तिः कालान्तरेण साधारण्यमादाय सव्यभिचारव्यवहारापत्तिरिति चेन्
न निश्चयविधेयपक्षेऽनित्यः शब्दत्वादित्यादौ पक्षे तादृशायां सव्यभिचारव्यवहारनियामकत्वात् घटनाग-
नादिव्यावृत्तत्वरूपमसाधारण्यं न तच्छब्दादौ साध्यादिनिश्चयदशायामप्यस्तत्वमेवेति विशेषणत्वेऽप्यत्र हे-
षतादवस्थ्यमप्यसपायप्रयोजकरूपस्य तथात्वेन व्यभिचारप्रतिपाद्यता किन्तु साध्यतदभाववद्वृत्तित्व-
निश्चितसाध्यतदभाववद्व्यावृत्तत्वरूपेण विभाजकमात्रवृत्त्यननुगतरूपं एवं च साधारण्यमुपलक्षणम-
साधारण्यं च विशेषणमित्यविरोधः निश्चयघटितरूपावच्छिन्नपरवाक्याच्च कालविशेषो निश्चयांशे एव वान्वे-
ति साध्यतदभावनिश्चयादौ विशेषाकांक्षीकारादन्वयबलात् साध्यतदभावनिश्चयविषयवृत्तित्वसा-
मान्याभावभिन्नस्यापि तत्कालीनतन्निश्चयविषयवृत्तित्वत्वावच्छिन्नाभावस्य लाभः व्यभिचारपदस्य
साधारण्यासाधारण्यरूपनानार्थकत्वमेवेति चेदुच्यते तदोपलक्षणत्वेऽपि नोक्तदोषावसर इति एवं च नि-
श्चयाघटितसाध्यतदभाववद्व्यावृत्तत्वमेव सपक्षप्रयोजकं तदवच्छिन्नप्रकारकज्ञानस्याविशेषदर्शने

गदा. 15 तथा संशयप्रतिबंधकत्वेपि तत्कोटिविशिष्टबुद्धौ तत्कोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानप्रतिबंधक-
तायां विपरीतकोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानस्योत्तेजकतया सत्प्रतिपक्षत्वइव संशयनिर्वाहः
तथा चायं च रूपतत्वादित्याहे साध्यतदभाववद्व्यावृत्तत्वस्यासत्वेनाव्याप्त्याशंकायाः अलक्षत्वाभ्युपगमेन
तत्परिहारस्य च नासंगतिरिति सद्धेतुलिंगतात्पर्यार्थः संशयप्रयोजकरूपं चेदानीमनुपलक्षणाविधयैव दुष्टव्यव-
हारनियामकतो महानसादौ रासभादिहेतुनिता हृशायां नाव्याप्तिः असाधारण्यस्य हेतुः सर्वदैव तथैति-
नातिप्रसंगोपीतिध्येयं अदुष्टहेतौवास्तवासाधारप्रकरणसमत्वाभावात् साधारणप्रकरणसमयोरिति-
व्याचष्टे असाधारणेति भ्रमाविषयस्य न व्यमतेदोषत्वाभावादनित्यदोषत्वमिति व्याचष्टेति विशेषेति प्र-
योजकत्वं प्रयोजकज्ञानविषयत्वं अतएवेत्यत्रेदंपदार्थस्य सद्धेतोः सर्वदा अदुष्टत्वस्य भ्रमाविषयत्वस्यानुमित्य-
नुत्पादप्रयोजकतायामनुपष्टंभकतया तदुपष्टंभं सूचयति नत्विति तथाचयत एव सद्धेतोः सर्वदैव तथा-
नत्कदाचिदपि दुष्टलक्षणस्योतस्मावेत्येनतस्थलीयानुमितिविरोधीयो भ्रमरूपोग्रहः तस्यानुमित्यनु-
त्पादप्रयोजकत्वेपि न तद्विषयो न हेतुदोषः भ्रमदशायां सद्धेतोर्दुष्टत्वेऽभ्रमविषयस्य दोषत्वाभावस्य
कस्मादित्यत एवत्मादिमूलस्य पर्यवसितोर्थः ननु भ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेन तद्विषयस्य दोषत्व-
मभीष्टमेवेति भ्रमविषयो न दोष इत्येवासिद्धमित्याशंकायां अन्यथेत्यादिमूलावतारतात्पर्यशंकोद्धारे स्फु-
टीचिकीर्षुरन्यथापदं व्याचष्टे अन्यथेति मूले बाधादिज्ञानरूपतिपक्षविशेषाकसाध्याभावादि भ्रमदशाया-
मित्यर्थः हेत्वाभासाधिक्यापत्तिः अतिरिक्तहेत्वाभासस्वीकारापत्तेः बाधादेरनित्यदोषतायां सर्ववादि-
सिद्धया भ्रमाविषयस्य तदंतर्भावासंभवादिति भावः अभेदे साध्ये प्रमेयत्वस्यानित्ये साध्ये शब्दाकाशान्यतर-

त्वस्यचवास्तवसाध्यवद्वृत्तित्वविरहेणविरुद्धत्वासंभवात् प्राचीनमताभिप्रायकतयातयोर्विरुध
त्वमुपपादयति दीधितौअनवगतेति एवंचसाध्यवद्वृत्तित्वेनेतिमूलस्यसाध्यवद्वृत्तितयाऽनवगतत्वे
नेत्यर्थः तादृशस्थलेपक्षतादृशाधायांहेतौतदभावोभयसहचारस्यापाक्यनिर्णयत्वेपिकालांतरीयत
न्निर्णयविषयवास्तवतदुभयसहचारमादायलक्षणगमनसंभवात् अलक्ष्यतयाऽव्याप्तिपरिहारेणच
टतत्राह अभ्युपगमेति संशयजनकपक्षधर्मताज्ञानस्यविशेषणविधयालक्षणघटकत्वमभ्युपग
मेत्यर्थः यथाश्रुतेव्याप्तिग्रहदशायांसद्धेतावतिव्याप्तिवारणायतादृशज्ञानेविशेषणविधयैवनिवे
शनीयं तादृशज्ञानदशायामतिप्रसंगस्यास्त्वेव नचतादृशज्ञानविरहदशायांचागत्यासाधारण
स्यापिसव्यभिचारत्वेनोपगंतव्यमेवेत्यतोवर्णितेति यथाव्याख्यातेत्यर्थकंअनुमितिविरोधिज्ञानाविषय
स्यापिहेत्वाभासविभाजकत्वेनातिविरहादितद्ज्ञानेपीत्यादिनाउक्ताविभाजकधर्मज्ञानस्यानुमित्यवि
रोधित्वकथनमकिंचित्करमित्याशंकामभिप्रायोपवर्णनेननिराकरोति यद्रूपज्ञानमिति यद्रूपावच्छि
न्नविषयकज्ञानमित्यर्थः तदेवतद्रूपावच्छिन्नमेव एतेननिरुक्तपक्षताज्ञानविषयतावच्छेदकधर्मवत्त्वस्यैव
विभाजकतयासाधारणादिरूपतादृशधर्मविषयकज्ञानस्यचानुमितिविरोधितयातादृशनियमोपगमे
पितथाविधधर्मस्यस्यनविभाजकत्वानुपपत्तिरितिपरास्तं साधारण्यत्वादिनैतत्साधारण्यादिज्ञानस्यवि
रोधितयातादृशपक्षधर्मताज्ञानविषयतावच्छेदकत्वेनतस्यविभाजकत्वानुपपत्तेः एवंचतदज्ञानेपीति
मूलस्यानिरुक्ताविभाजकतावच्छेदकावच्छिन्नाज्ञानेपीतिसाधारण्यादिप्रत्येकस्येत्यस्यसाधारण्यत्वा
दिप्रत्येकधर्मावच्छिन्नस्येत्यर्थइत्यवधेयं अन्यथातादृशरूपावच्छिन्नस्यापिविभाजकत्वेऽतिप्रसंगः

गदा०

16

अनुमितिकारणीभूतज्ञानविरोधिधर्मवत्त्वादिना अन्यतमधर्मवत्त्वादिना वा सव्यभिचारविरुद्धादी-
नामैक्यप्रसंगः मूले प्रतिबन्धादित्यस्य निरुक्तमात्रान्यधर्मज्ञानस्याप्रतिबन्धकत्वादिति शेषः तस्यैव
दोषत्वाच्चेत्यस्य प्रत्येकधर्मस्यैव विरोधित्वादित्यर्थः तत्रैव प्रतिबन्धादित्यन्तो हेत्वविवक्षितेन सत् दोष
त्वाच्चेत्यस्य प्रत्येकधर्मस्यैव विरोधित्वादित्यर्थः तत्रैव प्रतिबन्धादित्यन्तो हेत्वविवक्षितेन सत् दोषत्वाच्चे
ति चकारासंगतेः तस्यैव दोषत्वाच्चेत्यस्य प्रथमं तस्यैव दोषत्वयोर्भावयितव्यत्वात् नत्वनुगत
धर्मस्येत्यर्थः एवं च दोषविधया यादृशधर्मो ज्ञायते स एव विभाजकः अनुगतधर्मस्य चानुज्ञाय-
ते स एव विभाजकः अनुगतधर्मस्य चानुज्ञायमानीयतया त्वमिति हृदयं नन्वनदत्तानदृष्टायामन्यत्ता
दनुमितिप्रतिबन्धस्य तज्ज्ञानीयानुमित्यविरोधिताबीजत्वं मणिनाभिहितं न च घटते तत्र यामतिसव्यतिप-
ज्ञानादिज्ञानस्यानुमितिविरोधित्वयाथादिज्ञानस्यापि तथात्वापत्तेरतः स्वयं तद्बीजमाह वस्तुतस्त्विति
उपस्थापकत्वादीति कोटिद्वयोपस्थापकज्ञानविषयत्वादित्यर्थः आदिपदात्त्वयं निष्कर्षि-
तताहृशाज्ञानविषयतावच्छेदकरूपवत्त्वपरिग्रहः विरोधिविषयकत्वाभावात् यास्यनिरूपि-
तप्रतियोगितावच्छेदकावच्छिन्नतद्व्याप्यत्वावच्छिन्नाविषयकत्वात् इत्थं च वक्ष्यं मूले प्रतिब-
न्धादित्यनेन तत्तत्समानाभावेन निरुक्तज्ञानस्यानुमित्यप्रतिबन्धकत्वादिति शेषः एवं च प्रत्येकज्ञा-
नस्यानुमिति प्रतिबन्धकत्वेनानुगतधर्मज्ञानस्यानुमित्यप्रतिबन्धकत्वसंपादकतापादकतया मू-
लेऽभिहिते किन्तु तथात्वेन प्रमाणाभावे कथितेः नेतरेतरप्रत्येकं नानाधर्मज्ञानस्यानुमितिविरो-
धित्वकल्पनापेक्षया विरोधविषयकस्याप्यनुगतधर्मज्ञानस्यैकस्य तथात्वविशेषप्रदर्शितासाधार-

णादिहेतुकानुमितिवारणाय कल्पयितुमुचितमित्याशंकावतारात्तस्यापि जिहीर्षया प्रत्येकं ज्ञानस्याव
ष्टंभकल्पनीयप्रतिबंधकताकत्वदोषत्वाच्च प्रतिबंधात्वेनेनाभिहितं एवमीदृशायुक्तेः उत्रापि निवेश्य
मानानुगतधर्मान्तरेऽपि अनुमितिविरोधिज्ञानाविषयत्वं बोध्यमिति शेषः विरोधिपदस्य प्रतिबंधकता
र्थकत्वे संगतिः साधारणादेस्तथात्वादतो व्याचष्टे विरोधित्वमिति विरोधिज्ञानेति प्रतिबंधकीभूतज्ञा
नेत्यर्थः अनुमितिविरोधित्वमिति विरोधिज्ञानेति प्रतिबंधकीभूतज्ञानेत्यर्थः संबंधनिवेशेनैवोपप
त्ताव व्यावृत्तिपदमनर्थकमित्याशंकां निराचिकीर्षुस्तस्य व्यभिचारिणि साध्याभाववद्वृत्तित्वादिविरहदशाया
मव्यभिचारकतया संपादनाय तद्व्याचष्टे अव्यावृत्तीति अत्यंतयोगः प्रतियोगिवैयधिकरण्यावच्छिन्नो
अभावः नाप्रसंग इति रासभादौ महानसादिवृत्तितादृशाया अवश्य भाववद्वृत्तित्वासत्त्वेऽपि प्रतियोगिवैयधि
करण्यावच्छिन्नतदभावस्य तत्रासत्त्वेन तदव्यवच्छेदस्य तदानीमपि सत्त्वादिति भावः नन्वव्यावृत्तिपदस्याः
त्यंतायोगव्यवच्छेदार्थकत्वे ग्राह्ये अनित्यः शब्दत्वादित्यादौ असाधारणेऽपि तादृशाया मतिप्रसंग इत्यत
आह साध्यवद्वृत्तित्वेति नासाधारण इति निश्चयागर्भितस्य साध्यतदभाववद्व्यावृत्तत्वस्यैवासाधारण्यपदा
र्थत्वादिति शेषः तथा चोक्तस्थले तत्र कथंचिदपि असाधारण्यसत्त्वान्नातिप्रसंग इति भावः बाधादिवारणा
यविवक्षणीयस्य पक्षे साध्यवैशिष्ट्यग्रहाविरोधित्वस्य लाभाय पक्षपदं व्याचष्टे पक्ष इति संदिग्धसाध्यवि
शिष्टः धर्मी पक्षतावच्छेदकावच्छिन्नः विशिष्टहेतौ हेतुतावच्छेदकावच्छिन्नत्वेन हेतुवृत्तित्वेति नादृशसा
ध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षवृत्तित्वसार्थकं वैशिष्ट्यवैषज्ञानिकं तेन बाधादिसंकरस्थले साध्य
विशिष्टपक्षाप्रसिद्धावपि न क्षतिः बाधादिज्ञानस्य साध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयकज्ञानविरो

गदा. 17

धित्वान्न बाधादिकमादाय पक्षो वह्निमान् धूमादित्यादौ अतिव्याप्तिरिति भावः अत्र च साध्यवद्वृत्तित्वरूप
साधारण्यस्यासंग्रहः तज्ज्ञानदशायां हेतौ साध्यविशिष्टपक्षवृत्तित्वज्ञानानुदयात् एवं साध्यांशे संशयविषय
त्वविशेषणमप्यनर्थकमतस्तत्परित्यज्य निष्कृष्टार्थमाह तथा चेति पक्षतावच्छेदकेति पक्षतावच्छेदकाव-
च्छिन्नपक्षविशेष्यतानिरूपितासाध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतायाश्च तादृशी हेतुतावच्छेदकाव-
च्छिन्नहेतुप्रकारतानां निरूपकलौकिकासंनिकर्षाजन्यज्ञानाविरोधित्वस्य लाभादित्यर्थः तादृशज्ञानावि-
रोधित्वं च न तादृशज्ञानसामान्यानिरूपितप्रतिबंधकतानतिरिक्तवृत्तिविषयित्वानिरूपकत्वं हेतुमन्निष्ठसाध्या-
भावादिरूपव्यभिचारस्यापि पक्षनिष्ठसाध्याभावत्वादिना बुद्धेस्तादृशज्ञानप्रतिबंधकत्वात् तादृशविषय-
तानिरूपकत्वेनासंभवप्रसंगात् किंतु न तादृशविषयतानिरूपकतानवच्छेदकधर्मवत्त्वं तदनवच्छेदकत्वं
च तदवच्छेदकतापर्याप्त्यनधिकरणत्वं तेन हेतुमन्निष्ठसाध्याभावत्वादेः तादृशप्रतिबंधकतानतिरिक्तवृ-
त्तिविषयतानिरूपकतावच्छेदकपक्षनिष्ठसाध्याभावत्वादितो न तिरिक्तत्वेपि न क्षतिः बाधादिनिष्ठानामनु-
मितिविरोधितानवच्छेदकधर्माणां प्रमेयत्वादीनां तादृशविषयतानिरूपकतानवच्छेदकत्वेपि तादृश-
विषयतानिरूपकतानवच्छेदकीभूतानुमितिविरोधितावच्छेदकरूपावच्छिन्नत्वस्य समुदायार्थत्वान्नाति
प्रसंगः तादृशं यत्किंचिज्ज्ञाने यादृशरूपावच्छेदकधर्मस्तदवच्छिन्नत्वं वा समुदायार्थः वस्तुतस्तु निरुक्त
तादृशज्ञानाविरोधित्वमनुमितिविरोधिनि तादृशाविरोधितानवच्छेदकत्वं वा अनुमितिविरोधितावच्छेदकेन नि-
वेशनीयं परं तु अनुमितिविरोधितावच्छेदकानुमितिनिष्ठप्रतिबध्यतायामेव तादृशज्ञानत्वन्यूनवृत्तित्वं निवे-
शनीयं लाघवात् बाधादिज्ञाननिरूपितप्रतिबध्यतानां च तादृशसकलज्ञानसाधारणतया न तादृशज्ञा-

तत्वन्यूनवृत्तित्वमतोनातिप्रसंगः व्यभिचारज्ञानप्रतिबध्यत्वंचन्यूनवृत्त्येववास्यविषयकतादृश
ज्ञानावृत्तित्वात् अग्रेपिसर्वत्रैतादृशादिपदानिसार्वणीयमिति अत्रचइदंव्यत्वाभाववद्वृत्तिइदंवाच्यंप्रमेय
त्वादित्यादौप्रकृतपक्षेव्यभिचाराभावोनिविष्टः तत्रव्यभिचारोऽसिद्धिमध्येएवनिवेश्यतइति हेतु
यपक्षसाध्यसाधनानामप्रसिध्यासमन्वयः निरासइति तेषांज्ञानस्ययथोक्तज्ञानप्रतिबंधकत्वादितिभा
वः असिद्धिसंकीर्णः ह्रदादौधूमादिसाधनेवह्न्यादिहेतुः तन्मेयद्धः तत्रयथाश्रुतपक्षवृत्तित्वासत्त्वेपि
यथोक्तज्ञानाविरोधित्वविशिष्टानुमितिविरोधीचेत्यतिप्रसंगः नचविरुद्धोहेतुः साध्यवद्यावृत्ततयाऽ
साधारणएवेतिनतत्रसव्यभिचारलक्षणातिव्याप्तिप्रसक्तिरितिवाच्यं यथोक्तज्ञानाविरोधित्वविशिष्टानु
मितिविरोधित्वस्याविरोधसाधारण्ये तस्यव्यभिचारपदप्रवृत्तिनिमित्तत्वासंभवात् तदवच्छिन्नवतः सव्य
भिचारपदार्थत्वेनतत्पदस्यपारिभाषिकत्वापत्तेः व्यभिचारलक्षणातिव्याप्तेश्चापाक्यपरीहारत्वात् अ
तआह विरोधापीति फलतः तदभावव्याप्यवत्ताज्ञानाविषयानुमितिप्रतिबंधरूपफलप्रयोजनका
ज्ञानविषयत्वेनप्रतिरोधएवप्रतिरोधत्वंलभ्यएवातन्तयाचपक्षेसाध्यवत्ताज्ञानविरोधित्वान्नतत्रातिव्याप्तिरि
तिभावः पक्षवृत्तित्वेसतिसाध्यव्यापकीभूताभावप्रतियोगित्वंविरोधः तादृशाभावप्रतियोगित्वंचसाध्या
भावस्यव्यतिरेकव्याप्तिरितितज्ज्ञानंतदभावव्याप्यवत्ताज्ञानविधयापक्षेसाध्यवत्ताज्ञानंविरुणद्धीतिहृ
दयं साध्यासामानाधिकरण्यस्यैवचिंतामणिकारयतेविरोधतया तस्यपक्षेसाध्यवत्ताज्ञानाविरोधितया
तिव्याप्तिदुर्वारैवेत्यतः तन्मताभिप्रायेणप्रकांतरमनुसरति तदेमतत्वेनेति विरोधात्मत्वेनवेत्यर्थः विरो
धि अत्रमितिविरोधि अयेतन्मतेनोकिमसाधारण्यंनतावत्पक्षवृत्तित्वेसतिसाध्यव्यापकीभूताभावप्रतियो

गित्वं तज्ज्ञानस्य पक्षे साध्यवत्ताज्ञानं प्रति साध्याभावव्याप्यवत्ताज्ञानस्येव विरोधित्वेन सत्वं तार्थविरहा
त् । नापि निश्चितसाध्यवद्वृत्तित्वेन तज्ज्ञानस्यानुमितौ तत्कारणीभूतज्ञाने वा प्रतिबंधकताविरहेत्वाभा
ससामान्यलक्षणस्यैतल्लक्षणस्य च तत्साधारण्यविरहादनुमितिकारणीभूतसाध्यसामानाधिकरण्यज्ञानं
प्रति साध्यवद्व्यक्तिविशेषावृत्तित्वज्ञानस्याप्रतिबंधकत्वात्कथंचित्प्रतिबंधकत्वे साध्यसामानाधिकरण्य
ग्रहाविरोधितद्रूपविरोधान्यत्वस्य तत्रासत्वेन प्रकृतलक्षणस्य तत्साधारण्यासंभवात् । नापि पक्षवृत्तित्वा
विशेषितसाध्यव्यापकीभूताभावप्रतियोगित्वं तज्ज्ञानस्यानुमितौ तज्ज्ञानकाज्ञाने चाविरोधात् । यदि च
पक्षधर्मिकप्रकृतहेतुमत्ताज्ञानसहकृतं प्रकृतहेतौ साध्यव्यापकीभूताभावप्रतियोगित्व ज्ञानमनुमिति
प्रतिबध्नाति स्यात्तत्वाभावव्याप्यकवारिकवारिकवाद्दिमांश्चायमित्यादिज्ञानद्वयदशायामपि ग्रंथस्याप्र
तिज्ञानानुदयात् धर्मिविशेषाकातद्धेतोर्ज्ञानविशिष्टतादृशधर्मिकायाद्व्याभावव्याप्तिनिश्चयत्वेनैव तदभा
वव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादिति चेत् तदा तादृशधर्मस्य पक्षसाध्यवत्ताज्ञानविरोधित्वात् सत्वं
तार्थ्याविरह इति । अत्र केचित् पक्षवृत्तित्वविशेषिते साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यं
सत्वं तत्र च विरोधिताघटकप्रतिबंधकतायां तादृशासाधारण्यविषयकत्वानवच्छिन्नत्व विशेषणेन प्रति
पत्तत्साधारण्यं प्रकृतलक्षणस्योपपादनीयमित्याहुः । परे तु हेतावेव साध्यव्यापकीभूताभावप्रतियो
त्वमेवासाधारण्यं तद्विषयकत्वस्य पक्षधर्मिकहेतुमत्ताज्ञानविरहकालीनानुमित्यप्रतिबंधकज्ञानसा
धारणतयानुमितिबंधकतातिरिक्तवृत्तित्वेपि पक्षधर्मिकहेतुमत्तानिश्चयविशिष्टयादृशविशिष्टवि
षयकनिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशत्वस्य सामान्यलक्षणे । अत्र च विवक्षणीय

तथा सामान्यलक्षणस्य प्रकृतलक्षणविशेष्यदलस्य च तत्साधारण्येन निर्वाहः पक्षतावच्छेदकावि-
शिष्टपक्षे साध्यतावच्छेदकाविशिष्टसाध्यवत्ताज्ञानाविरोधित्वस्य च तादृशयत्किंचिज्ज्ञाने तादृशधर्मावच्छि-
न्नविषयकनिश्चयसामान्याप्रतिबध्यतादृशधर्मवत्त्वरूपस्य शरीरे निश्चयांशे पक्षधर्मिकहेतुमत्ता-
निश्चयवैशिष्ट्यानिवेशात् तादृशनिश्चयविरहकालीनहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगि-
त्वविषयकनिश्चयस्यापि तद्विषयकनिश्चयसामान्यांतर्गतत्वेन पक्षे साध्यवत्ताज्ञानस्य च तदप्रतिबध्यत-
यातद्दलस्यापि तत्साधारण्येनोपपत्तिरित्याशयः वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्र-
तिबंधकताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्तितादृशान्यमेव विवक्षणीयं अथवा स्वव्यापकतत्कत्व-
रूपानतिरिक्तवृत्तित्वनिवेशो यादृशविशिष्टविषयकनिश्चयत्वव्यापकः पक्षधर्मताज्ञानकालीनत्वानुमित्य-
प्रतिबंधकत्वोभयाभावः तादृशान्यमेव विवक्षणीयं अन्यथा स्वरूपासिद्धिवारकस्य हेतुमत्ताग्रहा-
विरोधित्वदलस्यैव वैयर्थ्यापत्तेः पक्षधर्मिकहेतुमत्तानिश्चयकालीनतद्विषयकनिश्चयस्याप्रसिद्ध्या या-
दृशविशिष्टविषयकपदेन तस्योपादानासंभवात् एवं सामान्यलक्षणस्याप्यव्याप्तेः यथाविवक्षितेन तत्त-
द्विषयकपदेन तस्योपादानासंभवात् एवं सामान्यलक्षणस्याप्यव्याप्तेः यथाविवक्षितेन तत्तद्विषयकनि-
श्चयत्वस्यापि अनुमितिप्रतिबंधकताशून्यपक्षधर्मिकहेतुमत्तानिश्चयकालीनज्ञानावृत्तित्वेन तत्राति-
व्याप्तिवारकतया तत्सार्थक्यात् सामान्यलक्षणस्यापि संगमाच्च अत्र वह्नीत्यादिनिष्ठकाल्ये पक्ष-
वृत्तित्वासहितो यो ज्ञातृपक्षस्तद्विषयकनिश्चयो व्यवहितो न तदानुमिति सामान्ये उभयाभावसत्त्वात् सामा-
न्यलक्षणाक्रांतत्वं विशेषलक्षणाक्रांतत्वं च निर्वहति हेतोः साध्यव्यापकीभूताभावप्रतियोगित्वज्ञा-

गदा॰

19

ज्ञानानंतरहेतुमात्रसाध्यवामित्यनाहार्यज्ञानस्यकदाप्यनुदयात् एतादृशाविशेषणप्रदानेऽपि हेतुलक्ष
तः संमतिमाहुर्वक्ष्यतीति ननुहेतुनिष्ठसाध्यसामानाधिकरण्यग्रहाभावः तद्धेतुदसाध्यनिष्ठहेतु-
सामानाधिकरण्याभावादिसाध्यसामानाधिकरण्यविशिष्टसाधनादिरूपविविधविरोधिनामेकस्यभेद-
निवेशः न्यत्रातिव्याप्तिरुर्वीरवएवं साध्यसामानाधिकरण्यविशिष्टसाधनादिरूपविरोधभेदनिवेशे साध्या
भाववद्वृत्तित्वविशिष्टसाध्यतदिरूपविरुद्धस्थलीयव्यभिचारस्यासंग्रहः गोत्ववद्वृत्तित्वविशिष्टा-
श्वत्वादिनो गोत्वाभाववद्वृत्तित्वादिविशिष्टाश्वत्वादेरनतिरिक्तत्वादित्यतआह हेत्विति हेतुतावच्छे
दकावच्छिन्नधर्मिकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यप्रकारकज्ञानाविरोध्यर्थकमित्यर्थः
तेनविरोधग्रहदशायामपि रूपान्तरेणसाध्यहेतुविषयकयासामानाधिकरण्यग्रहोत्पत्तावपिनक्षतिः १
नचाः वृत्तिहेतुकस्थलेतदुभयसामानाधिकरण्याप्रसिध्यातत्स्थलीयासाधारण्यासंग्रहः सामाना-
धिकरण्येपिसाध्यतावच्छेदकावच्छिन्नीयत्वेवैज्ञानिकमेवनतुवास्तवं तेनतादृशसाध्यकसाधारण्या
संग्रहः श्वविरुद्धहेतुकस्थलीयव्यभिचारलक्षणे चैतद्विशेषणमनुपादेयमेवतेननत्रहेतुसाध्यसा
मानाधिकरण्यग्रहविरोध्यप्रसिद्धावपिनक्षतिः वस्तुतस्तुतादृशसामानाधिकरण्यग्रहत्वत्वन्तु नहे
त्तित्वस्येवानुगमितिविरोधित्वघटकानुमितिनिष्ठप्रतिबध्यतायांनिवेशनीयतयाधूमवान्वह्नेरित्या-
दौसामानाधिकरण्यग्रहविरोधिताः प्रसिद्ध्यावपिनक्षतिः केचित्तुमतत्यंतस्याविशिष्टहेतौविशिष्टप
दवृत्तित्वग्रहाविरोधित्वमेवार्थं वर्णयंतोवाधादिवारणायपंथानमन्यमेवाश्रयंते तेनन्मतमाहुरियंनिसं
वंधपदेतिप्रकृतिहेतुसंबंधितयाविरोधित्वे प्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतानिरूपितयदु

पावच्छिन्नप्रकारताशालिनिश्चयत्वमनुमितिप्रतिबंधकतावच्छेदकं तद्रूपावच्छिन्नत्वे यत्किंचि-
द्रूपावच्छिन्नहेतुविशेष्यतानिवेशे इयं वह्निमद्धूमादिमादौ पक्षतावच्छेदेन साध्यसिद्धावुद्देश्यायांद्र-
व्यत्वाद्यवच्छिन्नधूमादिविशेष्यतानिरूपितसाध्याभावादिप्रकारताशालीनिश्चयत्वस्यानुमितिप्रतिबं-
धकतावच्छेदकत्वात् साध्याभावादिवारणासंभव इत्यतः प्रकृतानुमितिप्रयोजकहेतुतावच्छेदकावच्छिन्नेत्य-
र्थकं अथैवं हेतुत्वघटितसाध्याभाववद्वृत्तित्वादिकमेव व्यभिचारः स्यात् न चेष्टापत्तिस्तस्य सामान्यलक्ष-
णानाक्रान्तत्वात् हेतुतावच्छेदकावच्छिन्नहेतौ निष्ठत्वस्य विरोधिविशेषणत्वोपगमेन तादृशातिप्रसंगवा-
रणेऽपि साध्याभाववद्वृत्तित्वविशिष्टसाधनादेः साध्याभाववन्निष्ठसाधनसामानाधिकरण्यादेश्चासंग्रहः न च
हेतुतावच्छेदकावच्छिन्नघटितत्वे सति विरोधित्वमेव प्रकृतहेतुसंबंधितया विरोधित्वं तच्च विशेषणविशे-
ष्याभावभेदभिन्नसकलव्यभिचारसाधारणमेवेति वाच्यं तथा सति ह्रदो वह्निमान् अभावादित्यादौ व-
ह्न्यभाववदवृत्तिह्रदादिरूपबाधादौ गगनवान् अभावादित्यादौ गगनवान् भावादित्यादौ अवृत्तित्ववत् गगना-
नादिरूपपक्ष्यवृत्तित्वासिद्धौ चातिव्याप्त्यापत्तेः नैवं व्यभिचारलक्षणस्यानेतादृशातिव्याप्तिपरिहारः अपि त्वव्य-
भिचारिलक्षणस्यैवेति न साध्याभाववन्निष्ठसाधनसामानाधिकरण्यासंग्रहे हेतुत्वघटितसाध्याभाववद्वृत्तित्वा-
देः संग्रहे वा क्षतिः अथवा रेत्ननिष्ठत्वविशेषिततादृशविरोध्येव व्यभिचारपदार्थः अन्यथा व्यभिचारा-
ल्पतन्मते व्याप्यत्वासिद्धावेवान्तर्भावेन तत्रातिविरहात् प्रापयादित्यस्य प्रयोजनं स्वयमेव प्रकाशयिष्य-
ते बाधादावित्यादिना सत्प्रतिपक्षादिपरिग्रहः तत्साध्यकतद्धेतुकानुमितिसामान्यं प्रति हेतुसंबंधितया विरो-
धित्वविवक्षणात् तादृशबाधादिवारणासंभवात् असाध्यत्वमपेक्ष्य प्रयत्नसाध्यत्वकथनं नचैवं हेतुसंबंधि-

२० गदा॰ 20

तथेत्यस्यैववैयर्थ्यमिति वाच्यं तदनुपादाने साध्यनिष्ठावृत्तित्वरूपव्याप्यत्वासिद्धावतिप्रसंगापातात् न
स्यतत्साध्यकानुमितिमात्रएवविरोधित्वात् नचतदनुपादानेपिहेतुनिष्ठावृत्तित्वातिप्रसंगोदुर्वार इति
वाच्यं सत्यंतद्दलेनैववतद्वारणात् अतएव हेतुनिष्ठपक्षावृत्तित्वादेः तादृशानुमितिसामान्याविरोधि
त्वादेववारणे सत्यंतवैयर्थ्यमित्यपिपरास्तं काञ्चनमयवह्निमान्वह्नेरित्यादौ साध्याप्रसिद्धिवारणेनवि
शिष्टसाध्यग्रहाविरोधित्वविशेषणप्रक्षेपेणैव संभवतीति हृदयं तत्रवाधादिवारणं अन्यत्रचव्यभिचा
रज्ञानस्यप्रकृतपक्षेप्रकृतसाध्यानुमित्यविरोधितयाऽनुमितिपदस्यप्रकृतपक्षेप्रकृतसाध्यप्रकृतसाध्यव्या
प्यप्रकृतहेतुवैशिष्ट्यावगाहि अनुमितिपरत्वमावश्यकं तत्रचनिष्प्रयोजनकं साध्यवैशिष्ट्यावगाहित्वंनिवे
शनेत्रिवेधनवाधाद्यतिव्याप्तिवारकविशेषणान्तरप्रक्षेपः प्रक्षालनाद्धीत्यादिन्यायेनाथकत्वादित्यतो
ज्ञानेसाध्यवैशिष्ट्यावगाहित्वंविरोधिनिवाधादिवारकाविशेषणंचपरित्यज्जतिवृत्ततरित्यवति आश्रयासि
द्ध्यादीत्यादिनास्वरूपासिद्धिपरिग्रहः यथाश्रुतेआश्रयासिध्यादिवारणासंभवात् असिद्धिसंकीर्ण
व्यभिचारासंग्रहाच्चसत्यंतार्थंव्याचष्टेतादृशेति प्रथमंतादृशपदं पक्षतावच्छेदकविशिष्टेत्यर्थकंउद्दे
श्यंतेइतुतावच्छेदकविशिष्टार्थकं ननुवह्निमान् ह्रदत्वादित्यादौहेतुनिष्ठसाध्यसामानाधिकरण्या
संग्रहः तज्ज्ञानस्यसाध्याभावकपक्षतावच्छेदकविशिष्टेहेतुमत्ताग्रहाविरोधित्वात्राहानयेति अनुमितिका
रणीभूतंव्याप्तिः पक्षधर्मतायास्वज्ञानं तथाचपक्षधर्मताज्ञानाविरोधित्वकथनेनपरिशेषात् व्याप्तिग्रह
विरोधित्वमेवलभ्यतइतिभावः नन्वेतत् साध्यसाधनयोरप्रसिद्धावतिव्यापकंअन्योन्याभावाभावगर्भ
व्याप्त्यादेकतरोपादानेऽन्यतरासंग्राहकेसाध्याव्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्याभावरूपत्वा

ष्यत्वासिद्धावतिव्यापकं चेत्यत आह विवेचयिष्यत इति विशिष्टसाध्यसाधनग्रहाविरोधित्वं निवेश्यसा
ध्याप्रसिध्यादिकं वारयिष्यते इदं द्रव्यं द्रव्यत्वाव्यभिचारिसत्त्वादित्यादौ विशिष्टसाधनग्रहविरोधिव्यभि
चारोऽसिद्ध एवान्तर्भावनीयः स्वमूलालम्भनात्मकनानाविधव्याप्तिज्ञानमादायान्योन्याभावगर्भवि
विधव्यभिचारसंग्रहो ध्वनितो व्याप्यभावो व्यभिचार एवान्तर्भावयिष्यते तस्य बहिर्भावनीयत्वे विशकलितपा
रेवा व्यभिचारसामानाधिकरण्ययोर्ज्ञानं प्रयोज्यमिति न कस्यचिदपि दोषस्यावकाश इति भावः ननु
सपक्षवृत्तित्वज्ञानस्यानुमित्याद्यविरोधितया सपक्षवृत्तित्वज्ञानस्यानुमित्यादिविरोधित्वोक्तिर्न सं
गच्छते नच विपक्षवृत्तित्वज्ञानस्यानुमितिप्रतिबन्धकतया तद्घटितविशिष्टस्यानुमितिविरोधित्वमस्
त्वमेवेति वाच्यं तथा सत्यपि विपक्षवृत्तित्वमत्र स्यादिति तथात्वे दूरादायेवलक्षणगमनसंभवे विशिष्टमा
दायलक्षणसंगमनस्यानुचितत्वात् विपक्षवृत्तित्वमात्रस्यान्यथाज्ञानदादायविरुद्धोऽनित्याप्रसंप्र
सक्तो विरुद्धोऽपीत्याद्यग्रिमग्रन्थासङ्गतेश्चेत्यत आह सपक्षेणेति तथा च विपक्षवृत्तित्वमात्रं विव
क्षितमिति भावः अत एव सपक्षवृत्तित्वस्याविवक्षितत्वादेव मूले एतज्ज्ञानं इति दर्शितविषयोक्ते
तथा च एतादृशानुगतधर्मज्ञानरूपायामिव एतज्ज्ञानरूपायामपि अत एव कल्प्यप्रतिबन्धकताकस्य प्र
त्येकज्ञानस्यैव दोषत्वात् अनुमित्यनुत्पादप्रयोजकत्वात् इत्यर्थः तथा चानुगतधर्मज्ञानरूपायां
प्रत्येकज्ञानस्यासत्त्वेऽनुमितिरिष्टैव तत्सत्त्वे न तथा वानुमित्यनुत्पाद इति तज्ज्ञानस्य प्रतिबन्धकतायाम
प्रामाणिकत्वात् तस्य विभाजकत्वमिति भावः व्यर्थविशेषणत्वादिति मूले विशेषणपदस्यानुमिति
विरोधित्वरूपविशेषणपरत्वं न संभवति तद्रूपादाने सहेतोर्व्यभिचारात् अतो व्याचष्टे विशेषणमिति

गदा०

21

स्वरूपासिद्धहेतोरप्यसाधकतया तत्र व्यभिचाराप्रसक्तेस्तद्वारकं विशेषणं व्यर्थमेवेति भावः सद्धेतोः सा
ध्यव्याप्यतया न तत्रातिव्याप्तिप्रसक्तेः हेत्वाभासपदं व्यर्थमित्याशंकां निराचिकीर्षुर्दोषलक्षणे सिद्धिवि
शेषात्मकावृत्तित्वातिव्याप्तिकरं क तत्सार्थकीकर्तुं तदर्थमाह हेत्ववृत्तीति दृष्टाविशेषव्याप्यविरुद्ध
योरप्यसाधारण्यात् तयोः प्रत्येकं यथाश्रुतलक्षणाच्च दकारद्वयविरहाद्व्याप्तिः एवं हेत्वाभासपद
स्य वृत्तिमदर्थकत्वे वृत्तेरपि साध्यतदभाववद्व्यावृत्तत्वेनासाधारण्यात् तयातत्राव्याप्तिरतः पर्यवसितार्थमा
ह एवं चेति तत्र साध्याभाववद्वृत्तित्वं साधारण्यं साध्यवद्वृत्तित्वं चासाधारण्यं तत्र च साध्यव्याप्तिग्रह एव
विरोधिनस्तु साध्याभावव्याप्तिग्रहेऽपीति कथं तत्संग्रह इत्यत आह साध्येति साध्यतदभाववद्व्यावृत्तत्वस्य
वृत्तिमत्त्वविरुद्धतया तज्ज्ञाने वृत्तिमत्त्वग्रहप्रतिबंधकमित्यभिप्रेत्याभिनिश्चितेति तच्चतादृशं साधारण्यमसाधा
रण्यं वा व्याप्तिद्वयेति साध्यव्याप्तिसाध्याभावव्याप्तीत्यर्थः साध्यस्य साध्याभावाभाववत्तया साध्याभाववन्निवृ
त्तित्वव्याप्तिग्रहे साध्यवद्वृत्तित्वस्य ज्ञानं प्रतिबंधकमिति तद्घटितस्यासाधारण्यस्य साध्याभावव्याप्तिग्रहविरो
धित्वं एवं साध्याभाववद्व्यावृत्तित्वस्य ज्ञानमपि साध्याभावसामानाधिकरण्यघटितसाध्यभावव्याप्तिग्र
हे प्रतिबंधकमिति तद्घटितस्यासाधारण्यस्यापि तथात्वमिति भावः द्वयमित्यस्वरससूचनाय तद्वी
जेतु साध्याभावाभाववत्त्वेन साध्यविषयकतद्वृत्तित्वज्ञानस्यैव साध्याभावाभाववद्वृत्तित्वघटितस्य सा
ध्याभावे हेतुसमानाधिकरण्याभावप्रतियोगित्वघटितस्य वा साध्याभावव्याप्यत्वस्य ग्रहे प्रतिबंधकतया
साध्यतावच्छेदकरूपेण साध्यविषयकतद्वृत्तित्वज्ञानस्य तत्प्रतिबंधकत्वे निश्चितसाध्यादिमद्व्यावृत्तत्वज्ञा
नस्य सामानाधिकरण्यसामान्याभावाविषयकतया साध्यादिव्याप्तिग्रहाप्रतिबंधकत्वं चेति विशेष्यदल

प्रयोजनं स्फुटयति असिद्धिविशेषइति स्वरूपासिद्धिर्व्याप्यत्वासिद्धिर्वेत्यर्थः एतच्चालक्ष्यताला
भाय ननु निरुक्त्याघटितस्य साध्यतदभाववद्व्यावृत्तत्वस्य वृत्तिमत्त्वग्रहविरोधितया एतदनन्तर्भावे
तस्याधिकहेत्वाभासत्वापत्तिरित्यत आह साध्येति यद्रूपेण यदि वृत्तिमत्त्वग्रहविरोधि वृत्तिमत्त्वग्र
हे यादृशाभावावगाहितया तत्सामान्याभावावगाहि ज्ञानमेव विरोधि न त्वेकविशेषाभावविशिष्टापरवि
शेषाभावरूपसाध्यतदभाववद्व्यावृत्तत्वाज्ञानमित्यस्वरमायहीति निष्कृष्टमताभिप्रायेणाह ना
चेति इदमेव निरुक्त्याघटितसाध्यतदभाववद्व्यावृत्तत्वमेव प्रकारेण निरुक्त्यघटितस्य व्यवच्छेदः नन्वव
साध्यादिव्याप्यत्वं यदि साध्यादिमदन्यावृत्तित्वं सत्त्व साध्यादिमद्वृत्तित्वं तदा द्वितीयलक्षणार्थाभेदः साध्यवत्सा
वृत्त्यादिपदस्यापि तात्पर्याव्याप्तिमदर्थकत्वादित्यत आह व्यापकेति द्वितीयलक्षणस्यापि यथाश्रु
तार्थपरत्वे पूर्ववद्व्याप्यविरुद्धयोर्दण्डविशेषेऽसाधारण्योरसंग्रह इत्यत आह रीतिरिति तत्रापि साध्य
तदभाववत्सामान्यवृत्तित्वग्रहविरोधिमत्त्वग्रहाविरोधिधर्मवत्त्वमेव विवक्षणीयमित्यर्थः उपाध्यायमतमाह
केचित्त्विति असाधारण्याभावकालः प्रकृतहेतुनिष्ठासाधारण्याभावस्यावच्छेदकक्षणः तेन यदाश
ब्दत्वादेरसाधारण्यं तदा हेतुलक्षणस्य घटत्वादिनिष्ठासाधारण्याभावावच्छेदकत्वेऽपि न क्षतिः अथ शब्दे
ऽसाध्यसंदेहदशायां शब्दत्वादावसाधारण्यव्यवहारप्रयोजकस्य तत्कालीनसाध्यादिनिश्चयविषयो
भूतधर्मिव्यावृत्तत्वरूपासाधारण्यघटकतत्तत्कालादिविरहात् तदानीं तद्घटितासाधारण्यविरहोऽस्त
न एवेति वाच्यं प्रतियोगिकोटिप्रविष्टविशेषणसत्त्वस्य भावविशिष्टाभावाप्रयोजकत्वात् अन्यथा दंड
घटत्वादंडविशिष्टघटाभावादेरिव दंडविशिष्टघटाभावाद्यभावस्यापि सत्त्वप्रसंगात् यदि च प्रकृत

गदा. २२

हेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयत्वमेव साधारण्याभावकालेन तेन विवक्षितमित्यव्य
ते तदा शब्दोऽनित्यः शब्दत्वादित्यादौ यदा कदापि साध्यस्य तदभावस्य वा निश्चयो नास्ति तदा सव्यभिचा-
रित्वप्रसङ्गः तादृशलक्षणस्य प्रकृतहेतुमद्विशेष्यकसाध्यादिनिश्चयस्यापि अनधिकरणत्वेन तादृशानि-
श्चयत्वावच्छिन्नसाध्यादिव्याप्यभावस्य हेतौ सत्त्वात् तदा चासाधारण्यघटकसाध्यादिनिश्चयासा-
त्त्वेनासाधारण्यस्य विवक्षणे तु यादृशसाध्यकस्थले यादृशसाधारण्यस्य हेतोः कदापि नासाधारण्यं तत्रा-
व्याप्तिः प्रकृतहेतुनिष्ठासाधारण्यस्याप्रसिद्धेः मैवं तत्तत्कालावच्छिन्नत्वविशिष्टस्य तत्तत्कालीनसा-
ध्यादिनिश्चयविषयव्यावृत्तरूपासाधारण्यस्य प्रकृतहेतुनिष्ठाभावावच्छेदककाल एवासाधारण्याभा-
वकालः हेतुमति साध्यापि निश्चयदशायाः कालान्तएवच्छिन्नस्य कालान्तरे च यादृशासाधारण्यस्याभा-
वकूटो हेतौ सुलभ एव यादृशासाधारण्यहेतोः कदापि नासाधारण्यं तत्राप्यनन्तो गगनादिनिष्ठप्रकृ-
तसाध्यकासाधारण्यस्याभावः प्रसिद्ध एवेति न दोषः अथवा प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्य-
तरनिश्चयानधिकरणत्वं किंचिद्विशेष्यकसाध्यतदभावनिश्चयवत्त्वोभयाभाववान् क्षण एव साधार-
ण्याभावकाल इत्यनेन विवक्षितः शब्दो नित्यः शब्दत्वादित्यादौ यदा कदापि न साध्यस्य तदभावस्य-
वा निश्चयः तत्क्षणे प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयानधिकरणत्वे सत्त्वेऽपि सा-
ध्यतदभावनिश्चयवत्त्वाभावेनोभयाभावोऽक्षत एवेति तदा न सव्यभिचारत्वाप्रसङ्गः प्रकृतहेतुनि-
ष्ठासाधारण्यघटको यो यत्तदन्यक्षण एव विवक्षणीयः यत्साध्यकस्थले यस्यासाधारण्यस्य हेतोः क-
दाचिदपि नासाधारण्यं तत्साध्यकस्थलीयलक्षणेऽसाधारण्याभावकालावच्छिन्नत्वेनोपादेयमेव

साध्यसाधनभेदेन लक्षणभेदादित्यपि केचित् विशेषणाभावात् असाधारणाभावकालावच्छिन्नत्व
रूपयद्व्याप्तिसिद्ध्यस्यविशेषणांतरस्याभावात् संग्रहः नाद्दष्टाविशेषणविशिष्टव्याप्तिसिद्ध्यस्याभाववत्त्वेऽपि तन्म
तेनैव पूर्वलक्षणे साध्याभाववद्वृत्तित्वघटितताया उत्तरत्र च तद्वदन्यावृत्तित्वघटितताया व्याप्तेरत्र प्रवेशान्न ल
क्षणयोर्भेदः स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरभावस्य निवेशयितुमशक्यः नाद्दष्टव्याप्तेः स्वत्वघ
टितत्तया हेतुभेदेन भेदात् साधारणहेतुकस्थले तदप्रसिद्ध्याऽभावाऽसंग्रहात् शिरोमणिव्याख्यायां
च नाद्दष्टव्याप्तेरप्रसिद्धावपि तद्घटकपदार्थानां परस्परारोपस्यैवाभावगाहिज्ञानविरोधितायाः एव निवेशेनाउ
पपत्त्यभावात् व्यापकसामानाधिकरण्यमिह व्याप्यत्वमित्युक्तत्वात् एवमेतन्मतेऽपि लक्षणपरत्ववादि
ग्रंथेन तत्रैव लक्षणपरोऽपि नाद्दष्टव्याप्तिसिद्धिप्रयुक्तत्वस्य व्यभिचारपदार्थत्वाभावात् इत्यवधेयं तच्चि
न्त्यमिति चिंताबीजं चासाधारणपदार्थे तत्र तथोपनिरूपये निवेशस्यावश्यकत्वात् सामान्यलक्षणस्य तथावि
शेषानियंत्रितत्वे न चेष्टापत्तिः तथा सति साधारणहेतावप्यसाधारणहेतावित्यात्मकप्रत्ययव्यभिचारीति व्य
वहारप्रसंगात् एवं सव्यभिचारपदस्य पारिभाषिकत्वमपि तत्रैवेति इतरभेदानुमाने वैयर्थ्यसंभवेः
साधकतानुमाने वैयर्थ्यासंभवेः साधकतानुमाने वैयर्थ्यापत्त्या व्यर्थविशेषणत्वादिति मूलव्याख्यानमत्र
चिंत्यमिति आशयेनेतरभेदानुमाने वैयर्थ्यपरतयैव मूलं व्याचष्टे व्यर्थेति साध्याभावेत्यादीति साध्याभा
वव्याप्तिग्रहविरोधित्वं चेत्यर्थः तस्याविरोधादेः पार्थक्ये व्यभिचारपदार्थबहिर्भूतत्वे मानाभावादिति
तथा च विरोधादावपि व्यभिचारपदार्थरूपपदेन रभेदसत्त्वेन तद्व्यावर्तकविशेषणानवच्छिन्नस्यैवेतरभेदा
नुमायकत्वसंभवादिति भावः हेत्वाभासपदस्यामयाव्याख्यानादुष्टहेतुत्वरूपहेत्वाभासत्वस्य लक्षण

गदा.

23

त्वटकत्वात्प्रथममित्यादिदूषणस्यासंगतिः एवं गगनमनित्यं शब्दाश्रयत्वादित्यादौ हेतोः साध्याभावव्या
प्तिग्रहविरोधिदर्शितधर्मवत्त्वमलक्षणमेवेति तत्र व्याप्तिद्वानमप्यसंगतमित्यतो यथाश्रुतार्थे तादृशदोषह
र्यं संगमयति प्रथममिति एकमात्रसपक्षविपक्षस्थले सर्वसपक्षाद्यप्रसिद्धिरित्याशंक्य व्याचष्टे सपक्षे
तरेति सपक्षवृत्तित्वावच्छिन्नाभावो विपक्षवृत्तित्वावच्छिन्नाभावश्चेत्यर्थः सर्वतद्व्यावृत्तत्वे सर्वस
पक्षव्यावृत्तत्वपरार्थः तावतैव यत्किंच सपक्षविपक्षव्यावृत्तयोर्व्याप्यविरुद्धयोर्नातिव्याप्तिरेवं यथा
परत्ताव्यर्थविशेषणत्वादिति मूलस्याह सपक्षेति व्याप्यविरुद्धयोरिति शब्दोऽनित्यः शब्दत्वादित्यादौ
व्याप्यस्य हेतोः साध्यकमात्रवृत्तित्वेपि पक्षेपि वृत्तेः पक्षातिरिक्तसाध्यवत्त्यावृत्त्यन्यत्वमलक्षणमेव ।
एवं शब्दो नित्यः शब्दत्वादित्यत्र विरुद्धस्य हेतोः साध्याभाववन्मात्रवृत्तित्वेपि पक्षेवृत्तेः पक्षाति
रिक्तसाध्यवत्त्यावृत्त्यन्यत्वमलक्षणमेव एवं शब्दो नित्यः शब्दत्वादित्यत्र विरुद्धस्य हेतोः साध्याभावव
न्मात्रवृत्तित्वेपि पक्षेवृत्तेः पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यत्वमलक्षणमेवेति द्वयोः संग्रह इति भा
वः पक्षातिरिक्तेत्यत्र पक्षपदस्य तत्त्वेन मितिमात्रपरत्वे पक्षे साध्यतदभावान्यतरानिश्चयदशायां शब्दो नि
त्यः शब्दत्वादित्यत्रातिव्याप्तिः सिद्ध्यभावरूपपक्षताविशिष्टपरत्वे पक्षे सिद्धिदशायां तत्रविशिष्टानि
क्रान्तत्वसत्त्वोपगमात् ग्रतिरिक्तानस्य पक्षताशून्यपरत्वोपगमाद्वा इति प्रसंगवारणसंभवेपि शब्दोऽनित्यः श
ब्दत्वादित्यादौ वायनिश्चयदशायामतिप्रसंगोऽद्वोरप्य सिद्धिवाद्यान्यतराभावरूपपक्षताविवक्षणे च गौरव
मतः संशयरूपपक्षतापरतया व्याचष्टे पक्षत्वमिति संदिग्धसाध्यकत्वं साध्यसंदेहविशिष्टत्वं कालां
तरेण संशये संशयरूपविशेषणमत्त्वदशायां न हि शिष्टत्वमस्यागम्यते ग्रतिरिक्तांतवापक्षताशून्यत्वे ।

अतः साध्यादिनिश्चयदशायां नातिप्रसंगः गृहीतपक्षे साध्यतदभावयोर्न निश्चयः नापि संशयः तदा शब्दो
ऽनित्यः शब्दत्वादित्यादेरसाधारणतया किं तु तत्र यथायथं सत्प्रतिपक्षत्वं विरुद्धत्वं चेति नाव्याप्तिप्रसंग इति भा
वः पक्षातिरिक्तावृत्तिः यत्साध्यतदभाववत्मात्रवृत्तिर्न तदन्यतरत्वार्थकत्वे वह्निमान् धूमादित्यादौ नातिव्याप्ति
संभवः भेदप्रतियोगितावच्छेदकदलद्वयस्यैव तत्रासत्त्वेन तत्र विशिष्टभेदासत्त्वादतः पक्षातिरिक्तत्वस्य साध्या
दिपदद्विशेषणत्वाभिप्रायकतया स्वलक्षणं गमयति धूमेत्यादीति यथाश्रुते पक्षातिरिक्तोक्तौ साध्यादिमात्र
मात्रवृत्तिभिन्नमित्यर्थे समसीमसमासादित्यर्थे तु न दूषणमिति योजना समसीमसमासलभ्येतादृशार्थेन दूषण
मित्यर्थः ह्रदो धूमवान् वह्नेरित्यादिसाधारणे शब्दोऽनित्यः शब्दत्वादित्याद्यसाधारणे यथाश्रुतलक्षणस्याव्याप्ति
र्वाच्या पक्षवृत्तित्वादीति पक्षवृत्तिसाध्यसामानाधिकरण्यस्य च यो ग्रहस्तद्विरोधीत्यर्थः अनुमित्यौपयि
कस्येति समासेन लिङ्गजनकज्ञानविषयस्य तस्य सम्बन्धाय व्याप्त्यानन्तर्यमेव संभवति इत्यतो व्यासेन
लिङ्गं सपक्षसत्त्वादेर्नानुमितिजनकत्वमपि तु तज्ज्ञानस्यैव व्यापकपक्षस्य जनकार्थकत्वेन संभवतीति त
द्याचष्टे जनकज्ञानविषयस्येति सपक्षसत्त्वादेरित्यादिना विपक्षासत्त्वपरिग्रहः तेन द्व्यंशसत्त्वादित्यादौ स
पक्षसत्त्वाभावात्सत्त्वेऽपि विपक्षसत्त्वादेर्लक्षणसमन्वयः न त्वेवमसाधारणेऽव्याप्तिः तस्य पक्षव्यावृत्तत्व
घटिततया साध्यवद्वृत्तित्वग्रहविरोधित्वादित्यत आह सपक्षविपक्षव्यावृत्तत्वस्य चेति चस्त्वर्थः सपक्ष
त्वं साध्यसामानाधिकरण्यज्ञानविरोधित्वं साध्यवद्वृत्तित्वसामान्याभावज्ञानमेव साध्यसामानाधिकरण्य
सामान्यज्ञानविरोधि न तु तद्विशेषाभावात्मकसपक्षव्यावृत्तत्वज्ञानमपीति भावः अप्रयोजकविरुद्धहेत्वो
र्यद्यलक्ष्याः तदा सपक्षवृत्तित्वाद्यभावादिकमादाय सर्वेष्वेतेष्वतिव्याप्तिः तेषां लक्ष्यत्वे साध्यसामाना

गदा. 24

धिकरणग्रहाविरोधित्वोपादानमनर्थकमेवेति चेन्न दुष्टहेतुलक्षणे विरुद्धालक्ष्यापत्त्या उक्तविशेषणोपादानं चरो
पलक्षणे विरोधानिव्याप्तिवारणायैव सपक्षविपक्षव्यावृत्तत्वस्यासाधारणस्येतरत्र विपक्षपदं संपातायातमेवेत्य
वधेयं अत्र च यद्रूपविशिष्टविषयकत्वेनानुमितिजनकता तद्रूपावच्छिन्नाभावो वक्ष्यमाणविवक्षणीयः अन्यथा
सपक्षसत्त्वादेर्हेतुत्वाद्यवच्छिन्नाभावमादाय अतिप्रसंगापाद्यापायात् एवं च निश्चितसाध्यवद्वृत्तित्वत्वावच्छिन्ना
भावासंग्रहः निश्चयांशे ज्ञानस्यानुमित्यहेतुतया तद्घटितताहशधर्मविशिष्टविषयतावत्त्वेनानुमितिजनक
त्वाभावात् येनकेनापिरूपेण यद्रूपाश्रयनिरूपिता या विषयता तद्वत्त्वेन जनकताविवक्षणे च हेतुत्वाद्यव
च्छिन्नाभाववारणमशक्यमेवेति दूषणमशक्यमेवेति दूषणमशक्यसमाधानमित्यवधेयं उपदर्शितसाधार
णासाधारणयोः संग्रहाय मिश्रास्तु अन्यथैव लक्षणं व्याचख्युः तद्रूपन्यस्यति पक्षवृत्त्यावृत्ति पक्षावृत्तित्वं न
पक्षवृत्तौ विरोधश्चानविरुद्धभिन्नेवर्तते इति न पर्वतो वह्निमान् महानसत्वात् हृदत्वाद्वेत्यादयोः स्वरूपासि
द्धविरुद्धयोरतिव्याप्तिः सपक्षविपक्षवृत्तित्वं तद्व्यावृत्तत्वं च पक्षवृत्तौ विरुद्धभिन्नेववर्तत इति तदाद्योपद
र्शितसाधारणयोः संग्रहः पतत्कल्पेपि पूर्ववद्विरुद्धालक्ष्यापत्तेः विरोधस्य व्यभिचारतावारणायैव विरुद्धा
न्यत्वोपादानमित्यवधेयं अत्र च हेतुतावच्छेदकसंबंधेन पक्षवृत्तित्वाविवक्षणमावश्यकं अन्यथा हेतुताव
च्छेदकसंबंधेन पक्षवृत्तित्वविवक्षणमावश्यकं अन्यथा हेतुतावच्छेदकसंबंधेन पक्षावृत्तेरपि येनकेनचित्संब
धेन पक्षवृत्तितया स्वरूपासिद्धेरपि पक्षवृत्तिवृत्तितया न तद्वारणसंभवात् एवं च हेतुतावच्छेदकसंबंधेन पक्ष
वृत्तित्वं यत्राप्रसिद्धं तादृशव्यभिचारिण्यव्याप्तिः एवं गगने साध्यनिश्चयदशायां घटः शब्दवान् घटत्वादित्या
दावसाधारणेऽव्याप्तिः सपक्षव्यावृत्तत्वस्य विरुद्धपदवर्तमानत्वात् इत्यस्वरसः केचिदित्यनेन सूचितः नन्व

सर्वपक्षयंथोक्तलक्षणबलेनैवनेनसिद्धांतप्रणयननसंगतंउक्तदोषाणांजागरूकत्वात् इत्याशंकांनि
राकरोति सर्वेज्ञेतियथामतमितियद्यन्मतमालम्ब्ययत् लक्षणमभिहितंतेनतन्मतेनतत्रतत्रनाव्याप्तिसं
भावनेत्यर्थः तत्रसाधारणपक्षासाधारणपक्षयोर्व्यापकतामतेप्रथमलक्षणेव्याप्तिग्रहादिविरोधितामम
तेचतादृशाविरोधिताघटितलक्षणेनेनविरोधित्वघटितलक्षणलक्ष्येविरुद्धेसपक्षप्रयोजकस्यसपक्षवृत्ति
त्वघटितसाधारणपक्षविपक्षव्यावृत्तत्वघटितासाधारणविरुद्धेपिप्रथमलक्षणस्यनाव्याप्तिः प्रथमलक्ष
णस्यनाव्याप्तिः प्रथमलक्षणालक्ष्येतत्रतत्रविरोधित्वघटितलक्षणस्याभानान्नाव्याप्तिरितिभावः तेषां
कोटिद्वयोपस्थापकतावच्छेदकत्वादिरूपानुगतधर्मावच्छिन्नानांतादृशरूपघात्मकलक्षणानां हेत्वा
भासतावच्छेदकत्वं घटमितिप्रतिबंधकतायांविषयतयाऽवच्छेदकत्वं विभागमात्रेति मात्रपदेनउक्तव्य
वहारव्यवच्छेदः उक्तव्यवहारनियामकोऽनुमितिप्रतिबंधकतावच्छेदकधर्मएवविभाजकइतिनियमेमा
नाभावादितिभावः नन्वत्रलक्षणेपक्षधर्मतापदानुपादानान्नित्यत्वादिसाध्यकस्थलेकोटिद्वयोपस्थापका
साधारणधर्मवत्ताज्ञानविषयीभूतेद्व्यणुकादावतिव्याप्तिरित्याशंकांनिराचिकीर्षुरभिप्रायंवर्णयति संदेह
नित्यादिना एवकारेणकोट्युपस्थितेर्नाहार्यरूपेणाहत्वताव्यवच्छेदः नाहार्यधर्मेति साधारणादिविशि
ष्टधर्मेत्यर्थः मात्रपदेनधर्मविषयकत्वस्यकोटिद्वयोपस्थितिजनकतावच्छेदकत्वव्यवच्छेदः तथाचको
टिद्वयोपस्थितिजनकतावच्छेदकीभूततादवच्छेदकधर्मवत्त्वेनोक्तस्थलेद्व्यणुकादेश्रावणत्वादिविषयतया
एवतथात्वादितिननत्रातिव्याप्तिरितिभावः ग्रंथेतन्मतेसंशयेसाधारणधर्मवद्धर्मिज्ञानत्वेनहेतुतायाः
आधिक्यात् गौरवमितिचेन्न भवन्मतेपिकोटिद्वयोपस्थितिंप्रतितेनरूपेणहेतुतायाआधिक्यात् संवे

गदा॰

25

धिहत्यादिविशेष्यकज्ञानाङ्गीत्तियकादिस्मृतेरिव तत्कोटिसहचरितधर्मविशेष्यकज्ञानादपि तत्कोटिस्मृ
तेर्निर्विवादत्वेन तया साधारणधर्मविषयकज्ञानत्वेन संशयं प्रति च साधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थिति
त्वेन हेतुत्वमिति पूर्वपक्षलक्षणोपष्टम्भकमतेऽपि तथा संशयं प्रति साधारणधर्मवद्धर्मिज्ञानत्वेन साधारणधर्म
ज्ञानजन्यकोटिकोपस्थितित्वेन च हेतुतामतमेव सम्यक् यथा तत्कोट्युपस्थितौ साधारणधर्मज्ञानत्वेन
च हेतुता तथापि संशये धर्मिमानानियमात् तत्र साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वसफलकोट्युपस्थितेः
संशयहेतुतायां साधारणधर्मज्ञानजन्यत्वस्थाने साधारणधर्मवद्धर्मिज्ञानजन्यत्वनिवेशनादेव तन्नियमोपप
त्तेः स्वतन्त्रकारणत्वाकल्पनापेक्षया लाघवम् कारणतायामवच्छेदकगौरवस्यैवोचितत्वात् न च धर्मिज्ञा
नस्य संशये तादात्म्येन तायामपि लाघवमत्वात् तत्र साधारणधर्मप्रकारकत्वमात्रं निवेश्यते इति नासाकम
पि स्वतन्त्रकारणताकल्पनमानमेपि च विप्रतिपत्तिवाक्याधीनसंशये कोट्योरिव धर्मिणोऽपि पदजन्ये वो
पस्थितिः कारणमिति पदजन्यत्वेन धर्मिज्ञानस्यापि विप्रतिपत्तिवाक्याधीनसंशयेऽपृथक्कारणतायाश्चावश्य
कत्वात् इत्यसंशयकारणतायां साधारणधर्मादिविषयकत्वानर्भावे बाधकाभावादिति वाच्यं संशय
साधारणासाधारणधर्मवद्धर्मिज्ञानहेतुताद्वयस्यतो हि पृथग्धर्मज्ञानजन्यकोट्युपस्थितिमन हेतुताद्वयस्य
चकल्पने स्फुटतरलाघवात् एवं कोट्युपस्थितिकारणतायां तत्तत्कोटिसहचरितधर्मवद्धर्मिविशेष
विषयकज्ञानजन्यत्वनिवेशधर्मिभेदेन पृथग्धर्मावच्छिन्नकारणतायाः आनन्त्यापत्तेः तदपेक्षया धर्मिविशे
ष्यकत्वतभावव्यतत्तत्कोटिसहचरितधर्मज्ञानजन्यकोटिकोपस्थितित्वेन धर्मिविशेषमन्तर्भाव्य साधारणधर्म
वद्धर्मिज्ञानत्वेन च लघु[illegible]ारोपेण हेतुत्वकल्पस्य कल्प्यपितृयज्ञत्वात् न चोपस्थितिकारणतावच्छेदकशरी

द्धर्मिणोः नंतत्तभावेपि कार्यतावच्छेदकीभूतसंशयत्वस्य धर्मिविषयताघटितत्वात् कोट्युपस्थितेर्ध॰
र्मिभेदेन कारणताभेदस्यावश्यकत्वादिति वाच्यं संशयत्वशरीरधर्मिविषयताया विशेष्यतात्वेन किं विद्धर्मा
वच्छिन्नविशेष्यतात्वेनैव वा सामान्यतो निवेशनीयतया धर्मिभेदेन कारणताभेदानावश्यकत्वादिति दिक्
पूर्वलक्षणोक्तातिप्रसंगवारणाय साध्यसंदेहजनकत्वस्य कोट्युपस्थितिविशेषणतायाश्चावश्यकत्वात्ते
दूपस्थापकपदोपादाननिबंधनं तत्र निवेशभ्रमं निराकुरुते साध्यसंदेहेति प्रकृतप्रकरणवशात् सा
मान्यशब्दस्य विशेषपरतया प्राप्तं तथा च साध्यसंदेहजनिका या साध्योपस्थितिः तज्जनकतावच्छेदिका
सती तथाविधसाध्याभावोपस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेदकवत्तापर्याप्त्यधिकरणध
र्मवत्त्वं तत्त्वमिति पूर्वोक्तदिशा लक्षणार्थो निष्कर्षयितव्यः वह्निसाहचर्यवद्वृत्त्यभाववद्ध्याहृतत्वावच्छिन्न॰
धूमादिविषयतायाः पूर्वोपदर्शितरीत्या तथाविधसाध्यसाध्याभावोपस्थितिजनकतावच्छेदकत्वेपि॰
तामादायातिप्रसंगः पूर्ववदेव वारणीयः समवायादिघटितसाधारण्यमादाय संयोगादिना धूमादेर्व
ह्न्यादिसाध्यकसव्यभिचारतावारणाय प्रकृतहेतुतावच्छेदकसंबंधेन यत्साध्यवद्वृत्तित्वं साध्याभावव
द्वृत्तित्वं च तद्घटितत्वेन विषयतावच्छेदकधर्मो विवक्षणीयः असाधारण्यशरीरेऽभावप्रतियोगितयाते
न संबंधेन साध्यादिमद्वृत्तित्वं निवेश्यत तद्संग्रहः साधारणधर्मवद्धर्मिज्ञानसत्वेऽप्युद्बोधकानुराधीनको
टिस्मरणादनुभवात्मककोट्युपस्थितेश्च संशयोपयोगमेल्लातिविरहादिदोषेण ज्ञानादिमुद्रया कोट्युपस्थि
तिहेतुतयैवोपपत्तेः साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन स्वतंत्रहेतुताकल्पनमनर्थकमिति व्या॰
ख्यानकल्पे साध्यसंदेहजनकत्वरूपकोट्युपस्थितिविशेषणस्याव्यावर्तकतया विलक्षणजनकतायाश्चा

गदा· २२

26

सत्वेन निवेशनासंभवादुक्तातिप्रसंगो दुर्वार एवेत्यभिप्रेत्य तादृशनिष्कृष्टमते प्रकारान्तरेण लक्षणं व्या
चष्टे यथाकथंचिदिति · साधारणधर्मज्ञानजन्यात् तदजन्याद्वेत्यर्थः विशेषणतानादित्वद्वयानुक्रमकार
णतान एव निर्वाहो न तु स्वातन्त्र्येण तद्धेतुत्वमिति सूचयितुं स्मृत्यनुभवसाधारणीति नन्वेवं साधार
णादिविशिष्टधर्मवत्ताज्ञानशून्यकाले कथं न संशय इत्यत आह नियामकामिति नियामकं तादृशध
र्मदर्शनदशामेव संशय इति नियमनिर्वाहकं साधारण्यादीन्यस्य साक्षात्संशयहेतुत्वमित्यादिः आ
दिपदात् साधारण्यपरिग्रहः अनुभवानुभवसाधारण्याः कोट्युपस्थितेर्हेतुत्वादेवा धारावाहिसंदेहः
अविरलक्रमोत्पन्नसंदेहत्रितयादिकं साधारणादिधर्मज्ञानजन्यकोट्युपस्थितित्वेन संशयहेतुत्वे स्म
रणात्मककोट्युपस्थितेरेव तथात्वात् साधारणधर्मविषयकज्ञानजन्यैकोपस्थित्या संशयद्वयजननसं
भवेपि संशयान्तरोत्पत्तौ तथाविधस्मृत्यात्मकोपस्थितेस्तरस्यापेक्षणीयतायत्याः विरलसंशयत्रित
यादिकं नोपपद्यते एतन्मते तु संशयात्मककोट्युपस्थित्यादेरपि संशयान्तरोत्पादसंभवेनान्तराकोटिस्मरण
नपि लाणात्साधारणधर्मवद्धर्मिविषयकद्वितीयादिसंशयान्तरागनमक्षणेषु संशयान्तरोत्पादे बाधकाभावः
न चास्मन्मतेपि संशयात्मककोटिज्ञानस्यापि साधारणधर्मज्ञानजन्यतयान्तराकोटिस्मृतिं विनैव संश
यान्तरोत्पादः संभवतीति वाच्यं अवच्छेदकभेदभिन्नकोः स्मृतिसंशयनिष्ठतादृशज्ञानजन्यतयोरननुग
गततया स्मृतिनिष्ठजन्यताया एव निवेशनीयतया स्मरणापेक्षाया आवश्यकत्वादिति भावः स्वसामानाधि
करण्यावच्छिन्नस्वत्वावच्छिन्नतान्तरत्वसंबन्धेन साधारणधर्मज्ञानविशिष्टोपस्थितित्वेन हेतुत्वोपगमे संशया
द्यपि संशयः संभवतीति गौरवमेवोपस्थितेः स्वतन्त्रहेतुताया बाधकमित्यवधेयं धर्मिताववच्छेदकेति धर्मवा

न्पर्वतो वह्निमान्नवेति संशये धर्मितावच्छेदकप्रकारकज्ञानजन्यतायाः पर्वतत्वाद्यवच्छिन्नविशेष्यका-
धूमत्वादिविशिष्टवत्ताज्ञानस्य जनकतया धूमत्वत्वादिमत्त्वमादायातिप्रसंगवारणाय धर्मितावच्छेदकेति ध-
र्मितावच्छेदकपदफलीभूतसंशयधर्मितावच्छेदकेति धर्मितावच्छेदकपदफलीभूतसंशयधर्मितावच्छे-
दकतात्पर्याश्रयधिकरणधर्मपरं अन्यथा पर्वतत्वादेरपि दर्शितसंशयधर्मितावच्छेदकतयाऽतिप्रसंग-
वारणासंभवात् एवं च तद्धर्मपर्याप्तधर्मितावच्छेदकताकयत्किंचित्संशयनिरूपितायां जनकतायामव-
च्छेदकीभूतायां तत्तद्धर्मनिष्ठधर्मितावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यधिक-
रणधर्मवत्त्वमिति प्राञ्चः निष्कृष्टार्थः पर्यवसितः तेन सत्तावान् जातेरित्यादौ सत्ताभाववत्त्वमवेनत्वाश्रयसिद्ध्याय
रूपपदेन सत्ताववत्त्वमेवेतत्त्वमात्रोपादानसंभवेनातिव्याप्तिरिति परास्तं वस्तुतस्त्वायं एवं च मूलस्थं उ-
भयकोट्युपस्थापकपदं संशयकार्यकारित्यभिप्रायः मूलस्य पेक्ष्यनिष्टमते स्वातन्त्र्येणैव तल्लक्षण-
मिति केचित् प्राचीनास्तु साधारण्याद्यवच्छिन्नप्रकारताशालिज्ञानत्वेन न संशयजनकता गुरुधत्वतदभा-
वसहचरितत्वेन यदा कांचिज्ञानस्योद्भूतत्वादेर्ध्वत्वत्वादिमात्रेण ज्ञानादस्य यं उक्तेनैव संशयात् किं
त्वनुद्बुद्धसंस्कारादस्य साधारण्यादिप्रकारकज्ञानासत्त्वेपि तज्जन्यतथाविधसंस्कारविशिष्टेद्भूत्वादिज्ञा-
नात्संशयनिर्वाहः वैशिष्ट्यं च विशेष्यतावच्छेदकावच्छिन्नप्रकारकत्वस्वसमानाधिकरणोभयसंबं-
धेन तेन एकधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकज्ञानसहितात् अपरधर्मावच्छिन्नप्रकारकधर्मि-
ज्ञानात् न संशयः इदं प्रायतिवारणाय एकविशिष्टापरस्य हेतुताऽस्वीक्रियते न तु भयोः पृथक्कारणता
· एकविशिष्टापरत्वेन हेतुत्वे विशेषणाभावे विनिगमनाविरहेण कारणताद्वयमात्रपृथक्कारणता मते

गदा. तूपकधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकज्ञानादिसत्त्वात् अन्यधर्मावच्छिन्नप्रकारतार्धर्मिज्ञान
27 संशयापत्तेः तत्तद्धर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकत्वेन तत्तद्धर्मावच्छिन्नप्रकारकधर्मिज्ञान-
त्वेन च हेतुताकल्पनमंतरेणैवं वा तथा तादृशहेतुतास्वीकारे ऊर्ध्वत्वत्वादिरूपविषयतावच्छेदकानंतध-
र्मभेदेन हेतुताया आनंत्यं स्यादिति वदंति तन्मते यथा व्याप्तिलक्षणे शुद्धधूमत्वावच्छिन्नप्रकारताया
अपि वह्न्यादिसंदेहजनकत्वात् शुद्धधूमत्वादिकमादायातिप्रसंगवारणमशक्यमिति तन्मतेकल्पना-
तरमाह कोटिद्वयेति ऊर्ध्वत्वत्वादिनेत्यस्य केवलेनेत्यादिः तदानीं संशयप्राक्काले यद्रूपेति यद्रूपप्र-
कारकविशिष्टत्वेन यत्किंचित्संशयजनकतातद्रूपवत्त्वमित्यर्थः यत्किंचित्संशयजनकतावच्छेदकत्व-
निरूपितताया निरूपकत्वसंसर्गावच्छिन्नावच्छेदकतातदाश्रयज्ञानकतावच्छेदकत्वनिरूपिततायाविषय-
तापर्याप्त्यधिकरणधर्मवत्त्वमिति यत्किंचित्संशयजनकतावच्छेदकवैशिष्ट्यघटकविशेष्यतानिरूपितप्र-
कारतापर्याप्त्यधिकरणधर्मकत्वमिवापर्यवसितोर्थः नन्वित्यादिमूलग्रंथः साधारण्यासाधारण्यरूपसं-
शयप्रयोजकरूपमादायलक्षणसंगमनपरः तत्र प्रथमं साधारणस्य संशयप्रयोजकत्वविचारसहत्वा-
धेन साधारणमिति दोषलक्षणान्तरस्याप्याधिरेतादृशार्थे धारयति नन्वित्यादीति असाधारण्य-
संशयप्रयोजकीभूतासाधारण्यपदार्थः गृहीतमतमिति तथा च शङ्कानित्यः शब्दत्वादित्यादावसाधारण्य-
अव्याप्तिरिति भावः ननु गृहीतमतेनासाधारण्यमुपगंतव्यं किंत्वग्रहणे रेवेति नैतद्दोषावकाशइत्यत आ-
ह एककोटीति व्याप्यस्य व्याप्यतया गृहीतस्या व्याहृतस्य व्याहृतत्वेन गृहीतस्य एतेनैककोटिमद्ग्राहकत्व
स्यैककोटिव्याप्यतायाश्चावश्यकत्वेपि न भेदग्राहकतेवार्थासंगतिः नन्दत्वगृहीतित्वे च न तदभावव्याप्यतायाश्चाव

ण्यत्वेन तच्छरीरे तदभावाभाववत्त्वेन तस्यानिवेशात् इत्यवधेयं विशेषदर्शनेन तथाविरोधिधर्मदर्शनेन तया संशय-
विरोधित्वादिति प्रकृष्टत्वाभाववद्वृत्तिपर्याप्त्यादिमानयमित्याकारकनिश्चयदशायामिव प्रकृष्टवृत्तिपर्याप्त्यादि-
मानित्यादिनिश्चयदशायामपि प्रकृष्टत्वादिविशिष्टबुद्ध्यनुत्पादस्य सर्वानुभवसिद्धत्वात् द्वितीयविशिष्टबुद्धौ न हृद-
वृत्तित्वेन गृहीतधर्मवत्ताज्ञानस्य प्रतिबन्धकतायाश्च वपणकत्वादिभावः तथा च निरुक्तासाधारण्यविशि-
ष्टधर्मवत्ताज्ञानस्य संशयप्रतिबन्धकतया संशयजनकत्वासंभवात्कथं तादृशासाधारण्यस्य संशयप्रयोज-
कता न च तादृशज्ञानस्य संशयप्रतिबन्धकत्वेऽपि तज्जन्यकोटिद्वयोपस्थितेः संशयजनकत्वसंभवस्येव तज्ज्ञा-
नेन तज्जन्यकोटिद्वयोपस्थित्या संशयजननसंभवात् असाधारणधर्मवद्धर्मिज्ञानस्यात एव बाधकात् साक्षा-
द्धेतुत्वासंभवेन तज्जन्यकोटिद्वयोपस्थितित्वेन हेतुतायां गौरवस्याकिंचित्करत्वात् इति तादृशकार्यकरणा-
भावघटितलक्षणपरतयैव मूले व्याख्येयमिति वाच्यं अग्रे किंचित्यादिना वक्ष्यमाणासाधारण्यस्य बु-
द्धेः संशयाविरोधितया तज्ज्ञानस्यैव साक्षात्संशयजनकत्वसंभवेन गौरवादुक्तरूपेण कोटिद्वयोपस्थितेर्हेतु-
त्वात् स्मृतिजनकताघटितलक्षणस्यासंभवात् संशयजनकताघटितलक्षणकरणे च तादृशासाधारण्य-
मादाय व्याप्यविरुद्धयोरतिव्याप्तिः न तु सत्प्रतिपक्षसंवलनदशायामिव कोटिद्वयवद्व्यावृत्तधर्मवत्ताज्ञा-
नदशायामपि संशयोत्पत्तिरनुभवसिद्धैवेति तदभावव्याप्यवत्ताज्ञानस्येव तत्कोटिमद्व्यावृत्तिधर्मवत्ताज्ञान-
प्रतिबन्धकतायामपि तदभाववद्वृत्तिधर्मवत्ताज्ञानस्याप्रतिबन्धकत्वमगत्या कल्पनीयमिति कोटिद्वयव-
द्व्यावृत्तधर्मवत्ताज्ञानस्य संशयकत्वमव्याहतमेव येन रूपेण प्रतिबन्धकता तेनैव रूपेणाजनकत्वानभ्युप-
गमादित्यनस्वारस्यसत्त्वात्प्रतिपक्षे चेति विरोधिकोटिद्वयव्याप्यवत्ताज्ञानसमयपर इत्यर्थः परामर्शप्रामाण्य-

गदा०

28

संशयेति तथाचशङ्काया प्रहृतेपि तत्तत्कोटिमद्वृत्तित्वविशिष्टवत्ताज्ञाने प्रामाण्यसंशयादेश्च संश-
यः स्वीक्रियत इति नैककोटिमद्व्यावृत्तधर्मवत्ताज्ञानप्रतिबंधकतायामपरकोटिमद्व्यावृत्तधर्मवत्ताज्ञान-
स्योत्तेजकत्वं प्रामाणिकं अप्रामाण्यज्ञानस्योत्तेजकतयैवोपपत्तेः अप्रामाण्यज्ञानानास्कंदितस्यैव ज्ञा-
नस्य जनकतया निरुक्तासाधारण्यस्य बुद्धेर्जनकत्वोपगमे प्रतिबंधकतावच्छेदकरूपेणैव जनकताप्रसं-
ग इति भावः निश्चितसाध्यतदभाववद्व्यावृत्तत्वमिति असाधारण्यमित्यत्रोच्यते येन येन रूपेणेति यद्य-
द्रूपं धर्मितावच्छेदकीकृत्येत्यर्थः तेन तेन रूपेण तद्व्यावृत्तत्वं तत्तद्धर्मविशिष्टेन तद्धर्मिव्यावृत्तत्वं प्रमेय-
त्वादिसामानाधिकरण्येन घटादौ साध्यादिनिश्चयदशायामपि प्राप्तेः निरस्तः शब्दत्वादित्यादावसाधारण्यस-
त्वाद्धर्मिनिवेशः प्रथमपक्षे वक्ष्यमाणया निर्धर्मितावच्छेदककसाध्यनिश्चयविषयवृत्तिहेतोरसाधारण्या-
नुपपत्तेर्वारणाय घटत्वादिना साध्यादिनिश्चयदशायां रूपान्तरावच्छिन्नघटादिव्यावृत्तत्वज्ञानात् संशया-
पत्तिवारणाय च धर्मितावच्छेदकानिवेशः साध्यव्याप्यवत्त्वेन पक्षतातिरिक्तमात्रविषयकसाध्यनिश्चयदशा-
यामसाधारण्यानुपपत्त्यनवकाशात् पक्षस्यापि निश्चयविषयत्वमाविष्कर्तुं सर्वाणीति सर्वपदेन सर्व-
त्वावच्छिन्नोद्देश्यताकबोधः केवलान्वयिपि सर्वत्वावच्छेदेनाविधेयविषयकपदजन्यत इति तथाविधबोधस्यैव
सर्वाणि साध्यवन्तीत्याकारकता तथाच विशिष्टपक्षे साध्यनिश्चयदशायामिव साध्यसंदेहाविरोधिनः सर्वाणि
साध्यवन्तीति निश्चयस्य सत्त्वेप्यसाधारण्याभावस्येष्टत्वात्साध्यव्याप्यवन्तीति तथा चैतादृशनिश्चयदशायां
विशिष्टपक्षे साध्यसंदेहस्यानिवृत्तेस्तादृशनिश्चयस्य नासाधारण्यज्ञाननिवारकत्वमिति भावः प्रथमपक्षे
धर्मितावच्छेदकस्यानिवेशात् सामान्यधर्मावच्छिन्नधर्मिकां विशिष्टसंशयानिवर्तकं निर्णयमिव नि-

धर्मितावच्छेदकतयाऽप्रसक्तसंशयनिवर्तकतावान्निश्चयमादायापि दोषवद्धानं संभवतीत्यभिप्रेत्या
ह सर्वाणीवेति पूर्ववत्साध्यवत्त्वेन पक्षस्यापि निश्चयाविषयत्वं स्फुटीकर्तुं सर्वाणीति साध्यव
त्वावच्छिन्ने सर्वत्वविधेयकस्यैवानि सर्वाणीत्याकारकज्ञानस्य पक्षाविषयकस्यापि संभवात् सर्वसाध्य
वदुद्देश्यकप्रमेयत्वविधेयकज्ञानानाश्रयवत्तेनाहूपज्ञानस्य वस्तुत्वव्याप्यवति साध्याभाववतीत्यादि
पकसर्वत्वावच्छेदेन साध्यवत्त्वानवगाहितयात त्वत्सत्वेन पक्षे साध्यसंदेहनिवेके इति तदानीमसाधारण्यम
त्तमेवेति भावः आदिपदात् शब्दो नित्यः शब्दत्वादित्यादौ सर्वाणि साध्याभाववन्त्यप्यवेति साध्याभाववती
त्यादिनिश्चयपरिग्रहः साध्यादीन्यादिपदात् साध्याभावपरिग्रहः अन्यथात्वे असाधारण्याभावः द्वितीयपक्षे
तत्तद्व्यक्तित्वरूपधर्मितावच्छेदकाविवक्षयो प्रथमपक्षोक्तप्रथमदोषस्य द्वितीयदोषस्य च यथाश्रुतेप्यनवका
शावतानिश्चयं विना पक्षमात्रवृत्तिहेतौ साध्यवद्वृत्तित्वघटितव्याप्तिनिश्चयप्रयोजनसंभवतीत्यभिप्रेत्यैतदभि
हितं अथवा विशिष्यविशेषधर्मधर्मितावच्छेदकीकृत्य उक्ताविवक्षयो सामान्यधर्मधर्मितावच्छेदकनिश्च
यद्दशायामप्येतद्दोषस्य संभवात् नाददोषस्थलसंग्रहाय पदादशाधर्मस्य धर्मितावच्छेदकत्वानुसरणं विशेषणलक्ष
णस्येति विशेषणादित्यग्निमेणत्वयः वैशिष्ट्यं च सामानाधिकरण्यघटितसत्याबोध्यं तदविशेषितस्यैवत
स्यैतत्प्रायप्रत्याजकतया सव्यभिचारसामान्यलक्षणस्यातिव्याप्तिग्रहद्वारत्यप्रकृतेवप्रत्यपीत्यर्थः नचैतत्सर
णीयव्याप्तिग्रहाभावः तत्प्रकृषीयासाधारण्यादिलक्षणेनिवेशनीयइतिनायंदोषइत्यतआह स्यादिति तु
दपि सामान्यसव्यभिचारत्वमपि तत्तत्प्रकृषघटितमिति तथा चासाधारण्ये इव साधारणेऽपि प्रकृषविशेषनिय
त्तिसव्यभिचारव्यवहाराय यतिर्धूमादौ साध्ये वह्न्यादिरुपकं प्रति व्यभिचारीति व्यवहाराभावेनेष्टापत्तेरयोमा

गदा॰ 29

श्रुमा^

द्भिावः यथाश्रुते तत्काले प्रथमकालीयप्रथमदोषमप्याह आध्यादीति आदिपदात्साध्याभावप्रति-
ग्रहः ननु तदानीमसाधारण्याभावेपि तद्धेत्वादेर्व्यानुमितिप्रतिबंधकत्वाशंकानिरासिकीयथातद्धमाभा-
वमप्युपपादयति नहीति तदानीं पक्षे साध्यसंदेहदशायां तदानीं तत्र तद्व्याप्यवत्तासंशयस्यावश्यकत्वा-
वर्जिनत्वाद्व्याप्यवद्वृत्तित्वस्यापि हेतौ संशयादिति भावः एतेन उक्तास्थले लक्षणाव्याप्तिवत् असाधारण्य-
निश्चयद्रूपकारणाभावेन संशयानुपपत्तिरपि प्रदर्शिता उक्तविवक्षया मेतद्दोषानवकाशात् साधारणे-
प्युक्तनिश्चितसव्यभिचारत्वव्यवहारे कदाचिदिष्टापत्तेः संभवात् दोषांतरमाहाभिहितेचेति एतेत्वित्या-
दिना ग्रंथं त्रुटणात्वादित्यादिग्रन्थव्याख्यावसर इति शेषः ननु संशयप्रयोजकमिति तथा च तदाद्यासाधारणे
नलक्षणसंगमनसंभव इति भावः ननु तर्हि कीदृशमसाधारण्यं संशयप्रयोजकमत आह किंत्विति त-
त्सहचरितेति साध्ये तदभावे सहचरितेत्यर्थः एतादृशासाधारण्यस्य चनहेत्वदोषसामान्यलक्षणाक्रांतत्वा-
च्चेति भावः ननु व्याप्यविरुद्धसाधारणस्यैतादृशधर्मस्य संशयप्रयोजकत्वे व्याप्यादिदर्शनादपि संशयापत्तिरि-
त्यत आह व्याप्यविरुद्धयोरिति व्याप्यादिग्रहशून्यकाले व्याप्यादिदर्शनं स्य संशयाप्रतिबंधकतयातत्वेन
निश्चितयोरिति व्याप्यत्वादिना निश्चितस्य व्याप्यादेर्निरुक्तरूपज्ञानात्संशय इष्ट एवेति भावः विरुद्धा-
न्यत्वस्य हेतु विशेषणत्वे असाधारणसंग्रहः विरोधपदार्थं साध्यासामानाधिकरण्यत्वादिना निवेशयन्नदन्यत्वे-
नानुमितिविरोधिविशेषणेपि साध्याप्रसिध्यादिवारणासंभव इत्यत आह विशिष्टेति साध्यतावच्छेदकादिवि-
शिष्टेत्यर्थः एतदर्थः पूर्वपक्ष एव विवक्षितः यथाश्रुतमूलतो धर्मिविशेषणतायाएवलाभात् अर्थन इति ता-
त्पर्यबलं बलत इत्यर्थः विरोधिविशेषणं अनुमितिविरोधिविशेषणं अहृतित्वे पक्षस्य वा सामानाधिकरण्ये च साध्य-

साधनयोर्नित्यत्वं च ज्ञायते पक्षतानिवेशे प्रयोजनाभावादाह पक्षपदमिति पक्षवृत्तित्वस्य धर्मिविशेषणत्वे स्व
रूपासिद्धस्य व्यभिचारिणः संग्रहप्रसंगः हेतौ पक्षवृत्तित्वग्रहानिरोधित्वेन विरोधिविशेषणेपि बाधसं
ग्रहेति पक्षातिप्रसंगवारणमशक्यमेवेति पूर्ववत् पक्षवृत्तित्वे सत्यनुमितिविरोधिसंबंधाव्याहृतिरिति दल
द्वयेन व्याप्तिग्रहविरोधिधर्मवत्त्वस्य विवक्षणे च मणिकारमतसिद्धस्य साध्यव्यापकीभूताभावप्रतियोगित्व
रूपासाधारण्यस्यासंग्रहः विशेषणांतरं प्रक्षिप्य बाधादिवारणे च गौरवमित्यभिप्रेत्य पूर्वपक्षोक्तरीतिं परित्य
ज्य प्रकारांतरेण बाधादिकं वारयितुं उक्तदलद्वयनिष्कर्षार्थमाह तथा चेति यद्धर्मीति सधर्मितावच्छे
दकाकहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकानिश्चयसामान्ये स्वसमानकालीनहेतुमत्तानिश्च
यसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबंधकता हृष्यधर्मवत्त्वमित्यर्थः समूहालंबनात्मकोटीसी
नपदार्थविषयकानिश्चयसामान्यस्यापि तद्विपरीतविषयकसमूहालंबनात्मकाप्रकृतानुमितिप्रतिबंध
कतयातत्रातिव्याप्तिवारणाय सामान्यपदद्वयं हेतुमत्ताज्ञानासमानकालीनव्यभिचारनिर्णयस्य व्यभि
चारनिर्णयसामान्यांतर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानाप्रसिध्याऽसंभवः स्यादिति प्रथमं कालीनां
तं निश्चयविशेषणं निधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनव्यभिचारनिश्चयकालीनहेतुमत्ताज्ञान
धर्मितावच्छेदकाप्रसिध्या न दोषस्तादृशस्य मतौ हेतुमत्ताज्ञाने सधर्मितावच्छेदकत्वविशेषणं त्वनुमिति
सामान्यांतर्गतायां स्वसमानकालीनहेतुमत्ताज्ञानासमानधर्मितावच्छेदककसाध्यानुमितौ हेतुतावच्छे
दकसाध्यानुमितौ हेतुतावच्छेदकावच्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानेन प्रतिबंधकं नित्य
त्वव्यापकीभूताभावप्रतियोगिशब्दत्वमित्यादिज्ञानदशायामयं नित्य इत्यादिज्ञानोत्पत्तावविवादादित्य

२॰ गदा॰

30

साधारण्याव्याप्तिरतः समानधर्मितावच्छेदकत्वमनुमितिविशेषणं तथा च इदंत्वादिधर्मितावच्छेदककानि
त्यत्वादिविशिष्टह्रदवह्न्यशब्दत्वादिधर्मिकानित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपानित्यत्वीयव्यतिरेक
व्याप्तिनिश्चयविशिष्टस्य तद्धर्मितावच्छेदकशब्दत्वादिमत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानमुद्रया प्रति
बंधकत्ववाद्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशब्दत्वादिमत्ताज्ञानविशिष्टस्य तथाविधव्याप्ति
निश्चयस्यापि प्रतिबंधकत्वे तथाविधसाधारण्यनिश्चयस्यात्तमेवेति असाधारणसंग्रहः अनुमितिपदं सा
ध्यव्याप्यहेतुः साध्यवांश्च पक्ष इत्येतादृशसद्धेतुस्थले वानुमितिपरं तेन साधारण्यज्ञानस्य साध्यवत्ताज्ञाना
प्रतिबंधकत्वेऽपि न तत्संग्रहः एतेनानुमितिविरोधित्वं यादृशविशिष्टविषयकनिश्चयत्वेनानुमितिप्रति
बंधकत्वं तादृशत्वं तत्र चावच्छेदकत्वं प्रागुक्तयुक्त्या अनतिरिक्तवृत्तित्वरूपमेव विवक्षणीयं एवं च साध्यव्याप
कीभूताभावप्रतियोगिहेतुर्वृत्तिज्ञानस्य हेतुमत्ताज्ञानासमानकालीनस्य साध्यवत्ताज्ञानाप्रतिबंधकतया
तादृशज्ञानविषयस्य निरुक्तलक्षणानाक्रान्तत्वेन न साधारणत्वरूपतोपपद्यते एतद्वृत्तित्वविशेषितस्य च
तस्य वह्न्यादिवद्धर्मिविशेष्यघटितवृत्तिकतया नियतपक्षधर्मिकानुमितिसामान्यविरोधित्वमिति न तथात्वसं
भव इति परास्तं यत्तु अत्र हेतुमत्ताज्ञानमतिवेश्य तत्तद्धेतुधर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वनिश्च
यत्वेनैव प्रतिबंधकतावच्छेदकं हृद्धर्मिविशेष्यविषयकत्वाघटिततद्धेतुमत्ताज्ञानजन्यानुमितित्वं अतः शब्दत्वं
नित्यत्वव्यापकीभूताभावप्रतियोगीति निश्चयसत्त्वे समानधर्मितावच्छेदककशब्दत्ववत्तानिश्चयस्य चासत्त्वे
नित्यत्वाद्यनुपपत्तिः तदानीं हेतुत्वं तद्ज्ञानेनैवानुमितिजननात्तस्याश्च शब्दत्वधर्मिकतादृशाभावप्रतियो
गित्वनिश्चयाप्रतिबंध्यत्वात् एवं च पक्षवृत्तित्वाविशेषितनिरुक्तरूपमेवासाधारण्ये लक्षणेऽनुमितिपदस्य प्र

ज्ञातहेतुकानुमितिपरतया प्रज्ञातहेतुकानुमितिसामान्यविरोधित्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकाव
घटितस्यापि तत्र सत्त्वेन तदसंग्रहात् प्रसक्तोविनिसमाधानं तत्र मनोऽङ्कविज्ञायां शब्दत्वादिधर्मिकतादृशप्रतियो
गित्वादिनिश्चयस्य शब्दत्वादिहेतुमत्ताधीजन्यानुमितित्वावच्छिन्नप्रतिबंधकत्वे तादृशनिश्चयसहकृतशब्दत्वा
दिप्रकारकनिश्चयदशायां तत्समानधर्मितावच्छेदकताकशाब्दबोधापत्तेरन्यहेतुकानुमित्यापत्तेश्च दुर्वार
त्वात् नचान्यहेतुकापि समानधर्मितावच्छेदककात्तद्वत्ताज्ञानजन्यैवेति न तदापत्तिसंभव इति वाच्यं व्याप्य
त्वानवच्छिन्नहेतुप्रकारकताशालिज्ञानस्यानुमितिजनकत्वे मानाभावात् शून्यलिंगकपरामर्शघटितसाम
ग्र्यां तत्तद्धर्मिकतादृशनिश्चयाभावस्यानंतर्भावेन तत्फलतापत्तेः कथामात्रेणवापि तमशक्यत्वाच्च एतेन समा
नधर्मितावच्छेदककात्तद्वत्ताज्ञानानंतरोत्पत्तिकत्वविशेषेऽपि न निस्तार इत्यलमत्यावेशेन एतच्चयं पक्षवृत्ति
त्वाविशेषितहेतुनिष्ठसाध्याभावीयात्वयव्याप्तिरप्यसाधारण्यमेवेति न तज्जातिव्याप्तिरित्यवधेयं तथानित्यत्वा
नुमितिसामान्यविरोधिधर्मिविशेषितत्वात् धर्मिविशेषघटितत्वात् तत्तादृशेन तत्तादृशानुमितिसामान्यविरो
धित्वेनत्वेवमपि सर्वमाकाशवत् प्रमेयत्वादित्यस्थलीयबाधप्रतिरोधयोरतिव्याप्तिः सर्वमाकाशाभाववदि
त्यादिनिश्चये क्वाचित्कपक्षाद्यनुमितेरनुदयात्तन्नभवाऽनुरोधेनासमानधर्मितावच्छेदककज्ञानेऽपि तत्प्रतिबं
धकत्वकल्पनात् तयोरनुमितिसामान्यविरोधित्वादित्यत आह सर्वमितीत्यादिकं इत्याकारकज्ञानमित्येवा
र्थः सामानाधिकरण्यग्रहीविरोधीति साध्यसामानाधिकरण्यसाध्यवत्त्वघटितत्वादिति शेषः तथा चाविरोध्यंतेने
वतद्वारणमिति भावः तिधर्मितावच्छेदककस्यज्ञानस्य बाधायप्रतिबध्यत्वे साध्यसामानाधिकरण्यज्ञानस्य सा
ध्यांशेतिधर्मितावच्छेदकतयातदविरोधित्वसंभवाधारे वृत्तनमेवेत्याशयेनाह नानुमितीतिव्यभिचारस्यापि प्रकृ

गदा०

31

तत्साध्यहेतुकानुमितिविरोधित्वात्तन्मात्रस्येति तथा च तत्साध्यहेतुकानुमित्यविरोधित्वं तद्वारणमिति भावः
यद्यपि शब्दत्वादिना नित्यत्वादिव्यापकाभावप्रतियोगित्वरूपासाधारण्यज्ञाने अन्यलिंगकानुमितावपि त-
त्समानधर्मिकधर्मिकशब्दत्वादिमत्ताज्ञानविशिष्टं सत्प्रतिबन्धकं इति प्रकृततत्साध्यकानुमितिसामान्यविरोधि-
त्वासाधारण्यं तथापि ज्ञानानन्तरवैशिष्ट्याविशेषितज्ञानसामान्यप्रतिबन्धकत्वाघटितविरोधितायाः एव श्रवनि-
वेशनीयतया तादृशविरोधिताशून्यत्वं असाधारण्यसाधारणमेव इदं त्ववधेयं सर्वं माकाशाभाववदित्यादिज्ञान-
स्यासमानधर्मितावच्छेदककानुमितिविरोधित्वे मानाभावः तादृशज्ञानकाले इदमपि सर्वोतगीनमित्यादि-
ज्ञानसत्वेऽपि इदं माकाशोवदित्याद्यनुमित्युदयात् तत्र च तादृशज्ञाने स्वेव व्याप्याभावावच्छेदकधर्मदर्शनविधया ता-
दृशानुमित्यभावनिर्वाहकत्वात् तथा च तादृशवाधबुद्धेर्निरुक्तानुमितिसामान्यविरोधित्वाभावादेव नातिव्याप्ति-
पूर्वोक्तेति वस्तुतस्तद्धर्मितावच्छेदककबुद्धेर्न तत्सामानाधिकरण्यमात्रेण व्याप्याभावावगाहिबुद्धेः प्रतिबन्धकतया
व्याप्याभावांशे तद्धर्मितावच्छेदकव्यापकतावगाहित्वमेव तन्त्रं तथा च व्याप्याभावे तद्धर्मव्यापकतानिश्चयस्य
ततद्धर्मावच्छिन्नांशे व्याप्याभावाप्रकारकस्यापि तद्धर्मधर्मितावच्छेदककानुमितिप्रतिबन्धकत्वे तद्धर्म-
व्यापकता च तद्धर्मसमानाधिकरणाभावाप्रतियोगित्वं तज्ज्ञानस्य प्रतिप्रतिबन्धकत्वे तद्धर्मव्यापकहृतिम-
द्वृत्त्येताभावाप्रतियोगित्वज्ञानमपि तथा सामान्यघटितविशेषाभाव यहस्य यत्र प्रतिबन्धकत्वं तत्र तत्सामान्या-
भावस्यापि तथात्वानुभवात् भवति सर्वं माकाशाभाववदिति बुद्धेश्चाकाशाभाववृत्तिमद्वृत्त्येताभावाप्रति-
योगित्वविषयः सपक्षबाधः तादृशानुमितिसामान्यविरोधि चेति मूलस्थेन नन्वित्यनेन संशयप्रयोजकयोर्वि-
भाजकीभूतसपक्षवृत्तित्वविपक्षव्यावृत्तत्वघटितसाधारण्यासाधारण्ययोः परामर्शोऽसंगतिः सपक्षवृत्ति-

त्वाद्यंशज्ञानस्यानुमित्यविघटितमात्रघटितस्य हेत्वाभासतानिरहादिति तस्यानुमितिविरोधितयाप्रक्रान्तं
विपक्षवृत्तित्वाद्यंशमात्रपरतापरामर्शकत्वमाह तेनेति विपक्षवृत्तित्वादिनाः प्रक्रान्तत्वात् प्रक्रान्ता
तालाभायानुमितिविरोधिनेत्युक्तं अनुमितिविरोधित्वावच्छिन्नस्यानुमित्यविरोधित्वनत्वस्य विपक्षवृत्ति
त्वात्वावच्छिन्नपरत्वमावश्यकमिति तल्लाभाय विपक्षवृत्तित्वादिनेति विपक्षवृत्तित्वत्वाद्यवच्छिन्नेनेत्यर्थः
तेनैवेत्येवकारस्य विभाजकधर्मस्यानुमितिप्रतिबन्धकज्ञानप्रकारकत्वव्यवच्छेदपरत्वेः संगतिः तादृशा
ज्ञानप्रकारीभूतविपक्षवृत्तित्वादेरेवानुगतधर्मप्रकारेण विभाजकत्वात् एवंप्रत्येकमेवेत्येवकारस्यापि वि
भाजकधर्मस्य हेत्वाभासतावच्छेदकत्वव्यवच्छेदपरत्वं नोपपद्यत इत्यनुमितिविरोधित्वादिरूपानुगमकविभा
जकतावच्छेदपरत्वं नोपपद्यत इत्यनुमितिविरोधित्वादिरूपानुगमकविभाजकतावच्छेदकधर्मस्य प्रतिबन्ध
कज्ञानप्रकारतावच्छेदकत्वहेत्वाभासपदप्रतिपाद्यतावच्छेदकत्वव्यवच्छेदपरतया एवकारद्वयं व्याचष्टे एव
वकारेणेति प्रथमेवकारेणेत्यर्थः व्यवच्छिद्यप्रतिबन्धकज्ञानप्रकारतावच्छेदपरतया प्रतिपाद्यहेत्वाभासस्येति
द्वयमेवं प्रत्येकमेवेति मूलस्य विपक्षवृत्तित्वादिप्रत्येकमात्रवृत्तिरूपावच्छिन्नस्यैवेत्यर्थः तेनासाधारणस्येत्यादि
मूलस्यानुमितिविरोधिताघटितलक्षणपरित्यज्य लक्षणान्तरकरणेनासाधारणस्य साध्यतदभावोपस्थापकतया
संपादकतया दूषकत्वपक्षेनाव्याप्तिरित्यर्थः कात्वेः संगतिः संभवत्संशयप्रयोजकताकसाध्यतदभाववत्त्वघ
टिताभावप्रतियोगित्वरूपासाधारण्यस्य तद्धेत्वसाधारणलक्षणघटकत्वाद्दोषत्वासंभवदोषेणैवानुमितिविरोधिता
घटितलक्षणस्यावतारितत्वात् तेनेत्यस्य संपादकताघटितलक्षणपरित्यागपूर्वकापरलक्षणद्वयकरणस्या
साधारणसंग्रहप्रयोजनकतार्थकत्वे साध्यतदभावोपस्थापकतयेत्यस्य च सत्प्रतिपक्षोपस्थापकतयेत्यर्थकत्व

गं.ह.

32

मपिन साध्ये असाधारण्यस्य सत्प्रतिपक्षोत्थापकतायां तेन साध्यव्यापकीभूताभावप्रतियोगित्वस्यैवासाधारण्यतया
तस्य व्याप्तिग्रहाविरोधितया विरुद्धसंकीर्णासाधारणाद्भेदेन व्याप्तिग्रहद्वयविरोधितापरं तथा व्याप्त्यग्रहस्याव्
वहितलक्षणस्य तत्राव्याप्तेरावश्यकत्वात् तत्परं मध्यमलक्षणमात्रपरतया व्याचष्टे तेनेति असाधारण्यस्येत्
थापकतापक्षे प्रथमलक्षणस्यैव साधुतानन्तु मध्यमस्यासंशयप्रयोजकस्य निश्चितसाध्यतदभाववद्व्यावृत्तत्वादेर
गमित्यविरोधित्वादित्थपक्षे भासेत इति भयेन साध्यतदभावोपस्थापकतयेत्यस्य संशयप्रयोजकतयेत्यर्थं परिज्यार्थान्तरमाह
सत्प्रतिपक्षोत्थापकतयेति इतरलक्षणयोः तन्मते असाधारण्यव्याप्तिसत्त्व एवोपष्टम्भसंगतेरुपष्टम्भकतास्वीक
रेतत्त्वसूचयति अन्यथा उक्तरीतिरितरलक्षणयोस्त्वित्यर्थः अव्याप्तेरेवेति सत्प्रतिपक्षोत्थापकतयासाधारणत्व-
पक्षे दूषणमुच्यते यथाश्रुतं साध्याभाववद्व्यापकत्वेन बाधसाधारण्यमतः तदर्थं व्याचष्टे साध्याभावेति व्यभिचारादि
व्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकताघटितविरोधित्वविरोधितापदार्थतालाभाय सा लक्षणादि इति
सव्यभिचारसामान्यनिरुक्तिः सर्वमनित्यं प्रमेयत्वादित्यादेः स्वमते साधारणत्वात् तत्रातिव्याप्तिप्रदर्शनासंगते पक्ष स-
प्रदायेति तन्मते निश्चितसाध्यतदभाववद्वृत्तेरेव साधारणतया अज्ञातहेत्वोरनुपसंहार्यत्वासाधारणत्वदूषणयामलस्य-
त्वमेवेति भावः ननु मणिकारमते वास्तवसाध्याभाववद्वृत्तिरेव साधारण इत्येवधारणं इत्येव कुतो वधारितमित्यत आ
ह्वातपवेति स्वमते तस्य लक्षणत्वादेवेत्यर्थः अग्रेस्तिक्वानग्रंथे निश्चितसाध्यवतदन्यवृत्तित्वमित्यत्र तत्पदस्य प्रक्रान्तनि
श्चितसाध्यवत्परामर्शकत्वे साध्यसंशयविषयीभूतपक्षे सपक्षे च वर्तमाने सद्धेतावतिप्रसंग इत्यतस्तस्य साध्यवत्मात्रप
रतां स्पष्टयितुं व्याचष्टे निश्चितइति साध्यादिमत्तया निश्चितइत्यर्थः एतच्च साध्यवद्भिन्नेष्वित्वेति अन्यथा निश्चितसा-
ध्यवतीति समासेन लाघवस्य परित्यागे बीजाभावात् न चानुपसंहार्यासाधारणयोरतिव्याप्तेः साध्यवतितद्विशेष-

णो नैव वारणात् साध्यवद्भिन्नत्वेन तस्य विशेषणत्वमप्रयोजकमिति वाच्यं साध्यवदन्यत्वस्य संशयविषयवृत्तित्वज्ञानस्या-
प्रतिबन्धकत्वात् स्वरूपसतो निश्चयघटितस्यैव विशेषणत्वमित्यभिप्रायेण तदुपादानात् साध्यवदिति तद्विशेषणोपा-
दानं च शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यादेर्न व्यवगतसाध्यसहचारत्वे सति व्यवगतसाध्याभावसहचरितत्वपा
विरुद्धत्वमेव न तु साधारणत्वमिति मताभिप्रायेण तद्वारणाय उपदर्शविकल्पेन तादृशविशेषणं प्रक्षिप्य लक्षणद्व-
यं करणीत्यभिप्रायेण समासोपेक्षणमिति पुनरर्थकत्वं तथा सति सपक्षविपक्षगतत्वरूपाग्रिमलक्षणे सपक्ष-
विपक्षगतत्वरूपाग्रिमलक्षणे सपक्षत्वविपक्षत्वोभयघटितेऽपि निश्चयांशप्रवेशत्यागप्रवेशेन तत्परिहारसम्भवात्
सपक्षत्वमात्रस्य च तद्धर्मतानिराकरणासंगतेः मूले इत्येवोद्भाव्यत इत्यत्र इति : त्यनेनैतदर्शितया विपक्षवृत्तित्व-
मिति स्मरणीयं अयोगोलके नात्यन्तिको वह्निरित्यत्र साध्यवदत्यावृत्तित्वमनैकान्तिकपदार्थः तेनैव च तद्वृत्ती-
यांशार्थायोगोलकनिरूपितत्वादेरन्वयो बोध्यः ननु तस्मादोद्भावनात्र वह्निनिरूपितेति न तस्मादेतद्दोष इत्या-
शंकां निराकरोति ततएवेति एवकारव्यवच्छेद्यं स्फुटयति उद्भाव्यत इत्यनेन घट्यते अनुपसंहार्ये सर्वमनित्यं मे-
यत्वादित्यादौ निश्चितसाध्यवदन्यवृत्तित्वदलासत्त्वात् सपक्षवात्तत्वमात्रस्य न तद्व्यावर्तकत्वमतः सपक्षगतत्व-
निश्चितत्वरूपसाध्यवदन्यविशेषणयोरन्यतरसार्थक्यपर्यंकापरत्वमनुपसंहार्य इति मूलस्य स्फुटयितुं निश्च-
याघटितसाध्यवदन्यवृत्तित्वस्य न तत्साधारण्यमाह दीधितौ साध्यवदन्येति तत्रापि अनुपसंहार्येऽपि न निश्चयग-
र्भमिति न निश्चितसाध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमेवेति नाभेदः नानि-
श्चितसाध्यवदित्याद्यग्रिमलक्षणभेद इत्यर्थः घटोऽनित्यो घटीकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यस्य केवला-
न्वयिधर्मावच्छिन्नपक्षकत्वाभावेनानुपसंहारित्वाभावादित्यनुपसंहार्ये सोऽतिमूलासंगतिमाशंक्यांतरमवतरयति

इत्यस्य विरुद्धस्येति विरुद्धत्वं चास्यानवगतसाध्यसहचारत्वे सति अवगतसाध्याभावसहचारी विरुद्ध इति मतेन अ-
नुपसंहार्यस्याविशिष्यानभिधानात् कस्येत्याकांक्षायामाह प्रसिद्धस्येति सर्वमनित्यं प्रमेयत्वादित्यादेरित्यर्थः
विरुद्धस्येत्यस्य विरुद्धसामान्यपरत्वे दर्शितद्विरूपविरुद्धहेतोः पृथगुपादानानुपपत्तिः तादृशद्वित्वरूपविरुद्धस्य
पक्षातिरिक्तसाध्यवद्वृत्तित्वविशेषणेन व्यावृत्तिरिति प्रदर्शनाय भेदेनोपादानमिति भावः केवलान्वयिधर्मावच्छि-
न्नपक्षकत्वेनानुपसंहारित्वं किन्त्वप्रतीतव्याप्तिग्रहानुकूलसहचारकत्वमिति मते कथितद्वित्वमनुपसंहार्येवे-
ति तन्मतमालम्ब्य यथाश्रुतमूलमुपपादयतो मतमाह अन्यत्र इति साध्यवद्वृत्तित्वांशव्यावर्त्यस्यापि विरुद्धस्येव प-
क्षान्यवृत्तित्वांशव्यावर्त्यस्य सर्वमनित्यं प्रमेयत्वादित्याद्यनुपसंहार्यस्यापि उपादानौचित्याद्यनुपसंहार्यविशेष-
स्योपादाने निर्बीजमित्यस्वरससूचनाय कश्चिदिति सिद्धान्तलक्षणे विपक्षपदस्य निश्चितसाध्याभाववदर्थकता
भ्रमं निराकरोति अन्येति निश्चयांशानिवेशफलस्यापि सम्यगनिर्दर्शयति अन्यपदमेवेति स्फुटतरमभिधानात्
वास्तवसाध्याभाववद्वृत्तित्वस्य साधारण्यरूपतास्फुटीकरणात् न त्विति निश्चयगर्भविपक्षत्वसंभवः दीधितिकमपीति
शेषः तज्ज्ञानस्य निश्चयांशज्ञानस्याप्रतिबंधकत्वात् व्याप्तिज्ञानप्रतिबंधकत्वात् व्याप्तेर्निश्चितसाध्याभाववद्वृ-
त्तित्वाघटितत्वादिति भावः ननु निश्चयांशज्ञानस्याप्रतिबंधकत्वेपि स्वरूपसत्साध्याभावनिश्चयविषयधर्मिवृत्तित्व-
ज्ञानत्वेन प्रतिबंधकतया तादृशधर्मिवृत्तित्वे साधारण्यरूपहेत्वाभासो भवेत् न च निश्चयघटितस्य विशिष्य
प्रतिबंधकज्ञानाविषयत्वेन सामान्यलक्षणानाक्रान्ततया न हेत्वाभासतेति वाच्यं मणिकारोक्तदोषसामान्यल-
क्षणस्य यथाश्रुतार्थपरतायाः ग्रन्थेनैव परित्यागात् तत्परित्यागे कार्यविघटनतया साधारण्यस्यापि संभवात् वस्तुतस्तु
साध्याभावनिश्चयविषयीभूतायोगोलकादिरूपधर्मिवृत्तित्वस्यायोगोलकादिवृत्तितात्वेनैवरूपेण दोषमान-

रूपविशिष्टविषयकज्ञानस्य योगोलकादिधर्मिकसाध्याभाववन्निश्चयविशिष्टत्वेन प्रतिबंधकत्वात् तथाच
साध्याभाववन्निश्चयविषयवृत्तित्वेन ज्ञानस्याप्रतिबंधकत्वेपि न क्षतिः तेन रूपेण दोषत्वानुपगमात् न चायोगो
लकादिवृत्तिताज्ञानस्याज्ञानिश्चयविशिष्टत्वेन प्रतिबंधकत्वेपि तद्विषयकत्वस्य तादृशप्रतिबंधकताशून्यता
दृशानिश्चयाविशिष्टज्ञानसाधारणतया नानुमितिभिन्नवृत्तित्वरूपं प्रतिबंधकतावच्छेदकत्वमिति न हेत्वाभाससा
मान्यलक्षणाक्रान्तत्वमिति वाच्यं सामानाधिकरण्यसंबंधेन यस्य यादृशप्रतिबंधकताया अवच्छेदकत्वं तत्त
दवच्छेदकाविशिष्टस्य यादृशाविशिष्टविषयकानिश्चयत्वस्य तत्प्रतिबंधकतानतिरिक्तवृत्तित्वमिति विवक्षणा
सामान्यलक्षणस्याकसाधारण्यसाधारण्यासंभवात् बाधबुद्धिप्रतिबंधकतायामप्रामाण्यग्रहाभाव एव सामाना
धिकरण्यसंबंधेनावच्छेदकः प्रसिद्ध इति न चैवं तत्कल्पयतन्याहेतुमत्ताज्ञानविषयधर्मिवृत्तिसाध्याभावादिकमपि त
थास्यादिति वाच्यं इष्टत्वात् अथैवं महानसादौ वह्न्याद्यभावभ्रमदशायां ह्रदादौ धूमादिभ्रमदशायां च ता
दृशभ्रमविषये धूमवन्न्यभावादेर्हेतुत्वेन वह्न्यादिसाध्यकधूमादेः साधारण्यं स्यादिति चेन्न दृष्टमेवेन चैवं साधा
रण्यस्यानित्यदोषताप्रवादविरोधः उक्तरूपेण साध्याभाववद्वृत्तित्वरूपविशिष्टविषयकज्ञानस्यापि प्रतिबंधकतया
तादृशाविशिष्टविषयस्य चाप्रतिबंधकत्वानाविषयत्वेन दोषतया तद्विरोधात् सद्धेतुनिष्टसाध्याभावभ्रमविषय
वृत्तित्वादिरूपस्य च तस्यानित्यदोषताया एवोपगमात् न चैवं सद्धेतौ पक्षतावच्छेदकादिभ्रमविषयवृत्तिसाध्या
भावादिकमपि बाधस्याद्विशेष्यविशेषादिति वाच्यं प्रतिबंधकप्रमाविषयस्यैव दोषत्वोपगमात् प्रकृते च लक्ष
नद्वयस्यापि मिलितस्य प्रतिबंधकतया एकज्ञानस्य भ्रमत्वेपि प्रमात्मकापरज्ञानविषयस्यापि दोषतासंभवात्
अतएव सद्धेतौ पक्षवृत्तिसाध्याभावव्याप्यस्य प्रसिद्धावपि पक्षवृत्तित्वादिभ्रमविषयनिष्टसाध्याभावव्याप्यत्वादेः

गदा०

34

सत्प्रतिपक्षतया तस्यानित्यदोषत्वं मिलितयोः समानधर्मिकसाध्याभाववत्ताग्रहे तु मातायहद्वयोर्व्याप्तिबुद्ध्या-
विवमिलितयोरेकधर्मिकसाध्याभावव्याप्तिपक्षधर्मताबुद्ध्योरप्रामाण्यमिति विरोधित्वात् नचैवं विरोधिव्याप्त्यादेरज्ञा-
यमानेनाहार्यायामपि सद्धेतोर्दुष्टतापत्तिरिति वाच्यं ज्ञानद्वयस्य यत्र प्रतिबंधकता तत्र प्रतिबंधकीभूतज्ञानाधिकर-
णकालावच्छिन्नस्यैव विषयस्य दोषत्वादिति नचानित्यदोषस्य बाधादेः सर्वदा दोषतया तदनिर्वाहभयेन प्रतिबं-
धकज्ञानाधिकरणकालावच्छिन्नत्वस्य सामान्यलक्षणेऽनिवेशनया अनित्यानामपि दोषाणां सर्वदा दोषतापत्ति-
ईर्वारैवेति वाच्यं यादृशज्ञानानां तादृशविशिष्टत्वेन यादृशविशिष्टविषयकज्ञानस्य प्रतिबंधकता तादृशज्ञानसहि-
तत्तादृशविशिष्टज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविशिष्टपर्याप्तविषयताः विरहविशिष्टत्वमतिया-
दृशविशिष्टनिरूपितविषयता सामान्यमत्रमिति प्रतिबंधकावच्छेदकं तादृशविशिष्टस्य सामान्यलक्षणेन यानि-
त्यदोषे च विशेष्यीभूतिनक्तविषयताः विरहेण तादृशज्ञानानधिकरणक्षणवृत्तित्वविविशिष्टतादृशविष-
यता विरहस्य सर्वदैन सत्त्वेन अनित्यदोषे च प्रतिबंधकज्ञानदशायामेव तादृशक्षणवृत्तिविशेषणविरहेण तादृ-
शविरहस्य सत्त्वेन सामंजस्यादिति मिश्रानुयायिनामाशंकां निराकर्त्तुं साधारणस्थले ज्ञानद्वयप्रतिबंधकतां वदय-
ति नचैतेन वैयर्थ्यः रूपांतरेणेतिद्वयं धूमाभाववद्वयो गोलकं वह्निमदित्यादिज्ञानेऽपि वह्निधूमे व्याप्य इति-
ज्ञानोत्पत्तेरित्यर्थः तद्रूपावच्छेदेन साध्याभावनिश्चयसहितेतद्रूपावच्छिन्नविशेष्यकहेतुमत्ताज्ञानं प्रतिबंध-
कमित्यत्रैनायं दोषः इति शंकते नच ज्ञानद्वयकालेऽपि फलानुमत्या तन्निर्वाहाय दर्शितरूपेण प्रतिबंधकताया
आवश्यकत्वे गौरवमकिंचित्करमेवानन्यगतिकत्वादित्यत आह हेत्विति ज्ञानद्वयस्थले ग्राह्यसाध्याभावव-
द्वृत्तित्वाभावविरोधितावच्छेदकसाध्याभवसामानाधिकरण्यत्वावच्छिन्नस्य हेतावभानेन व्याप्तिज्ञानोत्पादे बाध-

काभावादित्यर्थः न त्वेवं तदानीं व्याप्तिज्ञानानन्तरत्वादसौ वा सिद्धतया ग्रहरूपेण प्रतिबंधकत्वमप्रामाणिक
मेवेति भावः दर्शितरूपेण प्रतिबंधकत्वे सर्ववादिसिद्धप्रतिबंधकताकस्य ग्राह्यविरोधितावच्छेदकप्रकार
कज्ञानस्य साध्याभावांशे निरुद्धधर्मितावच्छेदकतयैव प्रतिबंधकतावच्छेदकानाक्रान्तत्वाद्दोषाभानसंभवावा-
त् तथा ह्यनुधावनेन च साध्याभावप्रकारतानिरूपितविशेष्यतानिरूपितायाः स्वसमानकालीनज्ञानीयप्रकारता
तदाश्रयधर्मावच्छिन्नवृत्तित्वावगाहि ज्ञानत्वेन प्रतिबंधकत्वोपगमादुक्तज्ञानसंग्रहः साध्याभावधर्मिता
वच्छेदकांशेव साध्याभावस्यापि विशिष्टप्रकारताश्रयत्वादिति वाच्यं द्रव्यत्वादिसामानाधिकरण्येन साध्याभा
वग्रहकालीनस्य द्रव्यवृत्तिर्हेतुरित्यादिज्ञानस्य प्रतिबंधकत्वापाताद्धर्मितावच्छेदकावच्छेदेन साध्याभावाव
गाहिज्ञानस्य निवेशे निरुद्धधर्मितावच्छेदककसाध्याभावज्ञानकालीनस्य तस्य दुःसंग्रहत्वात् विपक्षत्वं निश्चित-
साध्याभाववत्त्वमेव निश्चयांशे ज्ञानस्याविरोधित्वेऽपि न क्षतिः तदवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव दोषत्वोपग
मात् साध्याभावनिश्चितत्वाभिधानस्य च व्यभिचारज्ञानप्रतिबंधकतायां तादृशांशे व निश्चयत्वप्रवेशार्थत्वेन तत्प्रद
र्शनमात्रार्थत्वात् एवं च साधारण्यस्यानित्यदोषताप्रसक्तिरपीति मिश्राणां द्वितीयमतं दूषयितुमुपन्यस्यति
यत्त्विति साध्याभावांशे निश्चयरूपमिति यथा तत्र किं निश्चयत्वेन सामान्यतः साध्याभावसंशयान्यसाध्या
भावज्ञानत्वं महानसं धूमवन्न वा धूमाभाववदयोगोलकवृत्तिर्वह्निरित्येतादृशज्ञानासंग्रहात् नापि हेत्वधि-
करणप्रकारीभूतयत्किंचिद्धर्मावच्छिन्नविशेष्यकसाध्याभावसंशयान्यतज्ज्ञानत्वं यत्किंचित्त्वनिवेशात् वह्नि
मान् पर्वतो धूमवान्न वा धूमाभाववदयोगोलकवृत्तिर्वह्निरिति ज्ञानसंग्रहः तस्य तादृशायोगोलकत्वरूपयत्किं-
चिद्धर्मावच्छिन्नविशेष्यकसंशयान्यत्वादिति निर्दोषः साध्याभावांशे निर्धर्मितावच्छेदकस्य साध्याभाववद्वृत्तिहे

गदा०

३५

तद्वितिज्ञानस्यासंग्रहात् तद्धेत्वधिकरणांशे साध्याभावमात्रस्य प्रकारत्वात् तदवच्छिन्नविशेष्यकसाध्याभा
वसंशयस्याप्रसिद्धेः यत्किंचित्त्वनिवेशेनानुगमाच्चेति अथाऽऽधेयताविशेषणतापन्नस्याधिकरणस्य
यांशे संशयत्वनिरूपकविशेष्यतान्यविशेष्यता तन्निरूपितसाध्याभावप्रकारतापालित्वे तन्निश्चयत्वं संशयत्व
निरूपिका च विपरीतकोटिधर्मितावच्छेदकतापन्नधर्मावच्छिन्ना या विशेष्यता तदन्यत्वे च साध्याभाववद्वृत्ति
धूमवत्त्वादिज्ञानीयधर्मितावच्छेदकानवच्छिन्नविशेष्यतादावव्याप्तत्वमेव संशये च प्रत्येककोटिनिरूपीयविशे
ष्यताभ्यामतिरिक्तैव विशेष्यता अतो निरूपीयधर्मितावच्छेदकावच्छिन्नविशेष्यतायां तदन्यत्वमेव आधे
कमन्यत्रात्र संशये यो यांशे आधेयत्वांशे संशयसाधारणनिश्चयत्वविशेषणानवच्छिन्नेऽन्यथा साध्याभावां
शे निश्चयत्वानिवेशे मे सिद्धान्तैकान्तिकतापत्तेः पक्षांशे साध्याभावसंशयात्मकपक्षवृत्तित्वावगाहिव्य
भिचारज्ञानादनुमितिमात्रोच्छेदापत्तेः साध्याभावसंशयविषयहेतुमत्ताज्ञानस्याविरोधित्वे प्राचीनसंवादमा

६०

ह यदा ... इति पक्षे संदिग्धसाध्यकप्रवृत्तधर्मिणि पक्षसमे संदिग्धसाध्यकधर्म्यन्तरे व्यभिचारो व्यभि
चारग्रहः प्रतिबंधक इति शेषः व्याप्तिनिश्चये हेतुमति पक्षादौ साध्याभावसंशयानवतारदशायां नि
निश्चितायां व्याप्तेः स्मरणे व्यभिचारसंशयायोगादिति पक्षः साध्यवान्न वा पक्षवृत्तिर्हेतुरितिविशिष्टवि
षयकज्ञानेनाविरोधितावच्छेदकरूपाप्रकारकत्वात् किंतु साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रकारकज्ञान
मेव तच्च व्याप्तिनिश्चयप्रतिबध्यमिति तस्योत्पत्त्यसंभवादित्यर्थः यत्र व्याप्तिग्राहकसहकारसहचारदर्शनादि
दशायामदृष्टवशान्न हेतुमति साध्याभावसंशयस्तत्रानुमत्यनुमते पूर्वं व्याप्तेरनिश्चयेन पक्षे हेतुदर्शनदशायां
व्याप्तिस्मरणासंभवात् पक्षान्तर्भावेन व्यभिचारसंशयसत्त्वात् अतस्तन्निश्चयस्यासंभवादनुमितिर्न साध्य

भाव संशयश्चासीत् तत्र मन्मते पूर्वं व्याप्तेरनिश्चयेन पदित्यत्र दूषणापत्तिमाह तदनिश्चयदशायां त्विति ।
पूर्वं व्याप्तिरनिश्चयेऽपि पक्षे साध्यसंदेहदशायामनुकूलतर्कावतारेण परिशुद्धव्याप्तिनिश्चयः संभवति अ
नुकूलतर्कस्याविशेषदर्शनवत् संशयप्रतिबंधकतायामनुत्तेजकत्वात् तदाह अनुकूलतर्कास्फूर्ताविति ।
अस्फूर्तिरनवतारः अवगाहितत्वेवेत्येवकारेण निश्चयत्वस्य प्रतिबंधकतावच्छेदकत्वव्यवच्छेदः तथा च सा
ध्याभावांशे संशयात्मकमपि व्यभिचारज्ञानं प्रतिबंधकमिति भावः संशयायोगादिदूषणत्वादित्यंतं ग्रंथस्या
नैव हेतुत्वं बोध्यं अत एव साध्याभावांशे संशयसाधारण्यव्यभिचारज्ञानस्य प्रतिबंधकत्वादेव पक्ष इत्यादिग्र
न्थोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तशब्दधर्मातिरिक्तधर्मवाननित्यादय इत्यर्थः बाधप्रतिरो
धयोरनवतारेऽपि विप्रतिपत्तिदशायां पाक्षादौ अनित्यत्वतद्व्याप्तिविशिष्टयोरनिश्चयेऽपि अप्रयोजकाः नित्य
त्वाद्यसाधकाः गौरवे तेतां विवेके दिति शेषः दाहानुकूलेत्यादेरयं वह्निर्दाहानुकूलाद्विष्टाः तीन्द्रियधर्मसम
वायी दाहजनकत्वात् दृष्टविशेषवदित्यादय इत्यर्थः अजनकपरासवह्निनिष्ठानुभूतरूपमादाय सिद्ध
साधनवारणाय दाहानुकूलेति अदृष्टप्रयत्नवदात्मसंयोगमादाय सिद्धसाधनवारणाय द्विष्ठेति उष्णस्पर्शमादा
य सिद्धसाधनवारणायातीन्द्रियेति अन्यथा तादृशव्यभिचारज्ञानस्याप्रतिबंधकत्वे पक्षातिरिक्ते साध्यसं
शयविषये सर्वत्र हेतुमति साध्यवत्तानिश्चयात् क्वापि हेतुमति साध्याभावानिश्चयेन व्याप्तिग्रहस्यदुर्वारत्वा
त् एतेन द्वितीयानुमाने वह्निरूपपक्षातिरिक्तकरतलानलसंयोगादौ दण्डादौ च दाहानुकूलातीन्द्रियधर्मा
निश्चयेऽपि न दोषः पक्षविपक्षान्यतरत्वादिना पर्वतज्ञदान्यतरत्वतदुभयविशेष्यकप्रमाविषयत्वादिना स
र्वत्र पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ सत्प्रतिपक्षप्रसंगात् अत्रमिति विरोधप्रसंगात् तादृशान्यतरत्वादेर

गदा.

36

धिकरणे क्वाचित्कपिवृत्त्यादेव निश्चयेन प्रतिसाध्यवत्त्वाभावाद्व्याप्तेस्तत्र सद्ग्रहत्वादिति भावः एतच्च सर्वं प्र
त्मकत्वनिश्चये ग्राह्यसंशयस्याप्रतिबंधकत्वमते नाभिहितं अन्यथा एतन्मतेंऽशांतरविशिष्टबुद्धौ ग्राह्याभाव
ज्ञानस्येवाव्यभिचारभङ्गावपि व्यभिचारग्रहस्यापि निश्चयत्वेनैव प्रतिबंधकतानिश्चयत्वावच्छिन्नप्रति
ज्ञानत्वेन प्रतिबंधकत्वे संशये निश्चयत्वावच्छिन्नस्यापरप्रतिबाधकतायाश्चावश्यकत्वापातात्तत्संशयानेनत्वे
संशयो दृश्याज्ञानत्वावच्छिन्नं प्रतिज्ञानत्वेन प्रतिबंधकत्वासंभवात् निश्चयत्वे च हेत्वंशइव साध्याभावांशेपि नि
वेशे अधिकरणवृत्तित्वांशनिश्चयात्मकस्य अधिकरणांशे साध्याभाववद्रूपविशेषणसंशयस्यापि विशिष्टसंश
यसमर्पकतया विशिष्टाभावसंशयाविरोधित्वात् एवमप्युक्तमूलतर्कविरहिणा उक्तानुमानेनाप्रयोज
कत्वस्य उपपत्ति एव व्यभिचारसंशयसामग्रीसत्त्वे न व्याप्तिनिश्चयस्यात्यंतासंभवात् निश्चयत्वघटकाविपरीत
कोट्यप्रकारकत्वे विपरीतकोटिभानप्रयोजकाभावस्य प्रयोजकत्वात् उक्तमूलतर्कस्य विपरीतज्ञानविरो
धिनस्तत्प्रयोजकसामग्रीविघटनेनैव व्याप्तिनिश्चयोपयोगितेत्यवधेयं एकोपादानेनैकमात्रवृत्तिसाध्यात्यं
ताभाववद्वृत्तित्वत्वादेः साधारणलक्षणत्वे अन्यतराव्याप्तिः साध्यवदन्यवृत्तित्वादाववव्याप्तिः एतज्ज्ञानोन्या
न्यताभावगर्भव्याप्तिद्वयस्यैवाऽनुमितिप्रयोजकतामते राकाभावघटितव्याप्तेरेव तथात्वे अपराभावघटितव्य
भिचारस्य व्यभिचारान्तरोन्नायकतयैव विरोधितया हेत्वाभासत्वविरहात् साध्यवत्ताज्ञानेति तदनुमितावच्छेद
कावच्छिन्ने यद्रूपविशिष्टप्रकारकनिश्चयत्वं साध्यतावच्छेदकावच्छिन्नसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकं
तद्रूपावच्छिन्नत्वेन साध्यतद्वदन्यतान्योन्याभावावच्छिन्नसाध्यताद्रूपविशिष्टवृत्तित्वसाधारणमितज्ज्ञानावपीत्यर्थः
ताद्रूप्याभाववत्त्वस्यासाध्यतद्वदन्योन्यात्यंताभाववत्त्वस्य एतत्सर्वमसमानप्रकारकज्ञानस्यापि प्रतिबंधकता

यते अन्यथा साध्याभाववद्वृत्तिर्हेतुरित्यादिज्ञाने हेतुमति साध्याभाववत्त्वादिज्ञानस्य समानप्र-
कारकत्वेनाविरोधितया तद्विषयस्यानुमितौ तज्जनकज्ञाने वा साक्षादविरोधितया हेत्वाभासत्वाभावेन
साधारण्यरूपतानुपपत्तेः साध्यतद्वत्तादौ साध्यतावच्छेदकविशिष्टतदवच्छिन्नत्वादौ आदिपदात् साध्यता-
वच्छेदकतदवच्छिन्नपरिग्रहः प्रतियोगित्वादेरित्यादिना तदवच्छेदकत्वपरिग्रहः प्रकृतेति विशिष्टसा-
ध्यविशिष्टसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकावच्छेदकविषयि-
ताशून्यनिश्चयनिष्ठविषयितायां निरूपितत्वसंबन्धेन विशेषणीभूतान्वयव्याप्तिग्रहत्वावच्छिन्नप्रतिबध्य-
तानिरूपितप्रतिबन्धकतावच्छेदकत्वेनेत्यर्थः तादृशप्रतिबन्धकतावच्छेदकीभूततया विधनिश्चयवृ-
त्तित्वविशिष्टत्वनिरूपितविषयिताकत्वमिति यावत् अन्वयव्याप्तिनिवेशात् व्यतिरेकव्याप्तिग्रहाविरोधि-
त्वेनानुपसंहारित्वेनातिव्याप्तिः अन्वयव्याप्तिश्च स्वव्यापकसाध्यसामानाधिकरण्यं तद्घटकसिद्धावपि त-
द्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञानविरहेणानुपपत्तिः असमानप्रकारकं हेत्वादिधर्मिक-
साध्याभावसामानाधिकरण्यादिज्ञानमपि तादृशव्याप्तिधीविरोध्येवेति न तत्संग्रहः तस्य तदविरोधित्वे
व्यापकसामानाधिकरण्यसाध्याभावासामानाधिकरण्याद्यवगाहिसमूहालंबनज्ञानाविरोधित्वमेव विवे-
चनीयं तावद्व्याप्तिग्रहस्य व्यभिचारधीप्रतिबध्यतायां स्वरूपसंबन्धरूपावच्छेदकत्वविरहेऽपि न क्षतिः
अनतिरिक्तवृत्तित्वरूपावच्छेदकताया एव विवक्षणीयत्वात् साध्यसामानाधिकरण्यग्रहत्वावच्छिन्ना-
प्रतिबन्धकत्वशरीरेऽपि तादृश्ये वावच्छेदकत्वं निवेशनीयं अतः साध्यप्रसिध्यादिग्रहस्याविशिष्टसाध्य-
ग्रहत्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वेऽपि न तस्याविरोधित्वव्याघातानुपपत्तिः शेषं सर्ववत् साध्यप्रसि-

गदा.

37

ध्यादीनां साध्यनिष्ठावृत्तित्वस्य व्याप्यत्वासिद्धिविशेषस्य साधनाप्रसिद्धेः साधननिष्ठावृत्तित्वस्य तद्रूपासि
द्धिभेदस्य साध्यसाधनयोः परस्परसामानाधिकरण्यस्य विरोधात्मकस्यासाधारण्यरूपस्य वापरिग्रहः विशि
ष्टसाध्याद्युपादानस्य यथायथं साध्याप्रसिध्यादिवारणप्रयोजकत्वं बोध्यं धूमवान् धूमाभाववद्वृत्तिवह्नेरि
त्यादौ धूमाभाववद्वृत्तित्वादिकमसिद्धिरेव न तु साधारण्यमतो न तत्संग्रहः हृतिमावह्नितसाध्याभाववद्वृत्तित्वा
द्यवगाहि समूहालंबनव्याप्तिग्रहानिवेशपक्षे साध्याद्वृत्त्यन्ताभावाप्रतियोगित्वादिकमनुपसंहारित्वं साध्याद
वृत्त्यंताभावप्रतियोगित्वादिग्रहाविरोधित्वविशेषणं प्रसिद्ध्यवारणीयं नान्यतरगर्भव्याप्तिग्रहविरोधित्वा
दिति ग्राह्याभावानवगाहित्वेन मणिमंत्रादिन्यायेन विरोधित्वे मानाभावादिति ध्येयः सामानाधिकरण्य
घटितत्वेन अन्वयमिति ज्ञानकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसामानाधिकर
ण्यप्रकारतात्वरूपसाधारणधर्मेणान्वयव्याप्तयः अन्वयव्याप्तिप्रकारतात्यन्ताभावघटितव्याप
कतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्य तत्तदभावघटितव्यभिचाराभावविशिष्टसाध्यसामानाधिक
रण्यप्रकारता इति यावत् अनुगमनीयाः प्रतिबध्यग्रहविशेषणतया निवेशनीयाः अतो नैकाभावघटि
तव्याप्त्युपादाने अन्यघटितव्यभिचारासंग्रहस्यावकाश इति भावः यथाश्रुतग्रंथलभ्यो विषयानुगमो ना
नोपादेयः गौरवाद्व्यभिचारिणि हेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टव्याप्यप्रतिबद्धत्वं न त्वनुगत
रूपेण नानाविधव्याप्तिविषयतानामनुगमे असंभवः एकाभावघटितव्यभिचारज्ञानप्रतिबध्यतायाम
न्यघटितव्याप्तिज्ञाने असत्त्वेन कस्यापि व्यभिचारज्ञानप्रतिबध्यतायाः निरुक्तप्रकारताशालिग्रहव
व्यापकत्वासंभवात् सामानाधिकरण्यानवच्छिन्नादि व्यापकत्वादिज्ञानस्यापि व्यभिचारज्ञानप्रतिब

ध्यतया सामानाधिकरण्यविषयतायाः स्वरूपसंबंधरूपतदवच्छेदकतानाश्रयत्वेन तादृशप्रका
रताशालिग्रहत्वेऽप्यननिरिक्तवृत्तिताख्यायाः प्रतिबध्यतावच्छेदकतायाएवनिवेशनीयत्वात्
यदिच स्वरूपसंबंधरूपप्रतिबध्यतावच्छेदकताघटितसाध्यसामानाधिकरण्यविषयताघटितधर्मा
वच्छिन्नान्तमिति कारणतावच्छेदकत्वोपलक्षितविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधका
तावच्छेदकस्वविषयतात्वं विवक्ष्यते तदापि तद्धर्मत्वविषयत्वावच्छिन्नधीविरोधिन्यां स्वरूपासि
द्धावतिव्याप्तिः हेतुपक्षोभयवैशिष्ट्यविषयताबहिर्भूतत्वस्यजनकतावच्छेदकविषयतायां निवेशप
यासाधव्यमित्यनतात् कल्पं परित्यज्य सदूहालंबनव्याप्तिधीविरोधित्वेन सकलव्यभिचारान् संग्रह्णा
ति प्रातिस्विकरूपेणेति तद्व्याप्तित्वेनेत्यर्थः तथाच सदूहालंबनतावद्व्याप्तिबुद्धौ सकलव्यभिचा
रधीयोविरोधित्वात् सर्वत्र लक्षणसमन्वय इति भावः ननु साध्याप्रसिद्धिसाधनाप्रसिद्धिवारणा
नुरोधेन विशिष्टसाध्यसाधनग्रहाविरोधित्वमेवास्तु विरोधानतिप्रसंगस्य सामानाधिकरण्यविषय
कतावद्व्यभिचारावगाहिज्ञानाघादुतिनैव संभवादित्यत आह साध्येति तथाचाव्यभिरितसामाना
धिकरण्याभावस्य साधारण्यात् गौरवस्य संग्रहाय सामानाधिकरण्यविषयकज्ञानमेवोपादेयमेवं च विरोधा
तिव्याप्तिवारणाय वक्तावत्यंशे सार्थकमिति भावः अव्यभिचारविशिष्टसामानाधिकरण्यरूपवास्य
भानविरोधिनि तद्विरहे अतिव्याप्तिलक्षणतोपगमेन परिहरति साध्येति पाठान्तरं व्याप्यप्रसिद्धस्यत्वेनेनव
ह्निव्यापकधूमसामानाधिकरण्यादिरूपव्याप्तेरप्रसिध्यावह्न्यादिनिष्ठतदभावेऽप्रसिद्ध तथा नातिव्याप्ति
प्रसक्तिरितिसूचितं एतद्विशेषः साधारण्यविशेषः व्याप्यत्वासिद्धित्वसाध्याप्रसिध्यादिरेवेतिभावः ॥२

२८ गदा. ष्यव्याप्तिश्चेत् साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा न तु साध्याभाववदवृत्तित्वे व्याप्ति-
78 ज्ञानस्य हेतुतावच्छेदकावच्छिन्नांशे व्यभिचाराप्रकारकत्वेन तदवच्छिन्नधर्मिकव्यभिचारज्ञानाप्र-
तिबध्यतया व्यभिचारस्य दोषतानुपपत्तिः हेतुविशेषणतापन्नस्याव्यभिचारस्य साध्यसामानाधिकरण्यरूपद-
लद्वयस्य व्याप्तित्वे हेतौ तदुभयप्रकारकज्ञाने प्रकारतावच्छेदकप्रत्येकधर्मावच्छिन्नाभावप्रकारकज्ञानस्ये-
व प्रतिबंधकतया एकविशिष्टापराभावस्य दोषत्वानुपपत्तिरिति चेन्न यतो य उभयाभाव एव विशिष्टाभा-
वपदेन विवक्षितः हेतुविशेषणतापन्नाव्यभिचारसामानाधिकरण्योभयमेव व्याप्तिः उभयाभावज्ञान-
स्य च तदुभयत्वप्रकारकत्वमनिवेश्योभयप्रकारतानिरूपितैकविशेष्यताप्रतिबध्यतावच्छेदिका व्या-
ते लाघवात् तथा चोभयत्वाप्रकारकोऽपि युगपदेतादृशोभयविशेषितहेतुज्ञाने व्यभिचारादिरूपप्रत्येका-
भावज्ञानमिव तदुभयाभावज्ञानमपि प्रतिबंधकमिति प्रत्येकाभाववदुभयाभावस्यापि दोषत्वमुपप-
द्यत इति विशिष्टव्याप्तेरूपादाने सामानाधिकरण्यांशनिवेशे प्रयोजनविरहः व्यापकतांशमात्रोपा-
दानेनैव सकलसाधारण्यसंग्रहसंभवात् तथा चाव्यभिचरितसामानाधिकरण्याभावस्य व्याप्यत्वासिद्धि-
रेवः साध्यसाधनसामानाधिकरण्यग्रहाविरोधित्वपर्य्यन्तानिवेशेऽपि च न विरोधातिव्याप्तिरित्याशयेनाह
विशिष्टेति साध्यतावच्छेदकादिविशिष्टेत्यः आदिपदग्राह्यं साधनतावच्छेदकवैशिष्ट्यं साधनविशेषणं बो-
ध्यं वस्तुतः साधनपदमेव साधनतावच्छेदकविशिष्टपरं साध्यपदमपि विशिष्टपदार्थस्य साध्यसाधनपद-
योर्द्वन्द्वाश्रयणादेव साधनान्वयप्रसक्तत्वात् तथा च सति द्वन्द्वान्ते श्रूयमाणमत्वर्थस्य साध्येनान्वयस्यावश्य-
कत्वापातात् न च साध्यवत्त्वमत्र ग्रहविशेषणतया विवक्षितं साध्यवत्त्वस्य व्यापकत्वाघटकतया साध्य

स्य वृत्तित्वेऽप्रतिप्रसंगानवकाशेन निष्प्रयोजकत्वात् न चावृत्तिगगनादिवारकं वृत्तिमत्त्वमपि व्यापक-
ताघटकमिति मते तन्मात्रं वक्तुमिति वाच्यं अत्रापि मते वृत्तिमत्त्वघटितव्यापकतावगाहित्वेन हेतुत्वेऽपि प्र-
कृते लक्षणे तद्घटितव्यापकतानिवेशस्य साध्यवत्त्वग्रहाविरोधित्वनिवेशस्य प्रत्याख्यानाद्धीतिन्यायेनायुक्त-
त्वात् साध्याप्रसिद्धिसाधनाप्रसिद्ध्योर्वारणाय साध्यतावच्छेदकादिविशिष्टनिवेशनं व्यापकताघटकसा-
धनवत्त्वग्रहविरोधिनः साधननिष्ठावृत्तित्वस्य वारणाय साधनवत्त्वपर्यन्तानुधावनं साध्याभाववद्वृत्तित्व-
ज्ञानस्य व्यापकताज्ञानाविरोधित्वे साध्याभाववद्वृत्तित्वादिविषयकस्य ग्रहालंबनरूपव्यापकताग्रहाविव-
रणीयः अथवा व्यापकताघटितव्याप्तिधीरेवानुमितिहेतुः न तु साध्याभाववद्वृत्तित्वादिधीः
तया च साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादिकमेव व्यभिचारः न तु
हेतौ साध्याभाववद्वृत्तित्वादिकं स्यादनुमितिजनकज्ञानाविरोधित्वादिति मते नायं कल्पः नन्वेतत्क-
ल्पे अत्यन्तान्योन्याभावगर्भव्यापकतयोरेकोपादानेऽन्यतरगर्भव्यभिचारः संग्रहः एकाभावगर्भव्यापक-
ताबुद्धेरन्यगर्भव्यभिचारज्ञानस्य ग्राह्याभावानवगाहितयाऽविरोधित्वादित्यत आह शेषं पूर्ववदिति अ-
नुमित्यौपयिकसाध्यविशेष्यतानिरूपितप्रकारत्वात्त्वेन द्विविधव्यापकत्वप्रकारेऽनुगमनीये प्राति-
स्विकरूपेण वा तत्तद्व्यापकताप्रकारकत्वं ज्ञाने निवेशनीयमित्यर्थः साध्याभाववद्वृत्तित्वसाध्यवदन्या-
वृत्तित्वरूपव्याप्तिद्वयमेवानुमित्यौपयिकं न तु व्यापकताघटितमिति मते हेतौ साध्याभाववद्वृत्तित्वादिक-
मेव दोषः न तु साध्यतावच्छेदके हेतुव्यापकतानवच्छेदकत्वपर्यवसानं गौरवात् तन्मते चोक्तलक्ष-
णेऽलक्ष्यापरिग्रहोऽलक्ष्यपरिग्रहश्चेति तत्त्वादित्यत्र साध्यात्यन्ताभाववद्वृत्तित्वसाध्यवद्भिन्नवृत्तित्वसंग्राह

५
५
गदा॰

केवलत्वमाह साध्यतद्वतोरिति साध्याभावव्याप्ये हेतुसामानाधिकरण्यादिवारणाय साध्याभावव्याप्यादि
व्यावृत्तेनेति आदिपदात्साध्याभावावच्छेदकपरिग्रहः तत्र तादृशाविरोधिताश्रये यो हेतुसामानाधिकर
39 ण्याभावग्रहः तद्विरोधित्वं तदभावव्याप्यादिव्यावृत्ततज्ज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यताव
च्छेदिकासतीतद्वत्ताज्ञानप्रतिबंधकतावच्छेदिका या प्रकारता तदाश्रयत्वं तदभावव्याप्यवत्ताज्ञानस्य त
द्वत्तानिश्चयाप्रतिबध्यतया तद्विषयकत्वमतः वह्निव्याप्यकस्थले वह्न्यभावे हेतुसामानाधिकरण्यवारणा
य प्रतिबंधकतानिवेशः अथ घटाभावादेरपि वह्न्यभावत्वादिना ज्ञानस्य वह्निमत्ताज्ञानविरोधित्वात् घटा
भावादिसामानाधिकरण्यमादाय वह्न्यादिसाध्यके व्यभिचारः स्यात् साध्यवत्ताज्ञानविरोधितावच्छेद
कीभूतविषयतानिरूपिततद्धेतुसामानाधिकरण्याभावविषयताशालिग्रहविरोधितानिवेशे चासंभवः ध
र्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारतया एव साध्यवत्ताज्ञानप्रतिबंधकतावच्छेद
कतया साध्याभावो न हेतुसमानाधिकरण इति ज्ञानीयसाध्याभावविषयताया अतथात्वादिति चेन्न किं
चिद्दलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चय
त्वेन येन रूपावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानप्रतिबंधकता तद्रूपावच्छिन्नांशे हेतुसामानाधिकरण्य
ग्रहविरोधितानिवेशे नातिप्रसंगाभावात् साध्याभावत्वादेरेव तादृशरूपत्वात् कांचनमयधूमवान् वह्नेरि
त्यादौ धूमे न कांचनमय इति ज्ञानस्यापि साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानविरोधित्वेन कांचनमय
त्वाभावसामानाधिकरण्यातिप्रसंगः साध्यतावच्छेदकाविशिष्टसाध्यतावत्ताज्ञानविरोधित्वात् कांचन
मयत्वाभावसामानाधिकरण्यातिप्रसंगः साध्यतावच्छेदकाविशिष्टसाध्यतावत्ताज्ञानत्वेन यद्रूपावच्छि

न्नप्रकारकनिश्चयप्रतिबध्यतेत्युक्तौ तत्र विशेष्यधूमाभावसामानाधिकरण्यासंग्रहः धूमत्वावच्छिन्नाभाव
निश्चयप्रतिबध्यतावच्छेदककोटौ काञ्चनमयत्वविषयताया अनिवेशात् यत्किंचिद्धर्मावच्छिन्नविशेष्यकवि
शिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यतानिवेशे च धूमेन काञ्चनमय इति ज्ञानप्रतिबध्यतायाः काञ्चनम
यत्वविशिष्टधूमादिमत्ताज्ञानत्वव्यापकतया ज्ञानेन प्रसंगस्य दुर्वारत्वात् फलीभूतज्ञानधर्मितावच्छेद
कावच्छिन्नविशेष्यतानिवेशः यद्यपि धूमत्वादेरपि काञ्चनमयत्वादिविशिष्टधूमादिमत्ताज्ञानधर्मितावच्छे
दकत्वमक्षतमेव काञ्चनमयधूमवान् धूम इत्येतादृशज्ञानस्यापि कस्य विद्युत्पादात् तथापि विशिष्टसाध्यव
त्ताज्ञानादिधर्मितावच्छेदकायेये धर्मास्तद्धर्मावच्छिन्नविशेष्यतानिरूपितयद्धर्मावच्छिन्नप्रकारतात्वतद्धर्मा
वच्छिन्नविशेष्यकविशिष्टसाध्यवत्ताज्ञानप्रतिबंधकतावच्छिन्नकातद्रूपावच्छिन्नत्वस्य विवक्षितत्वान्ना
तिप्रसंगः हेतुसामानाधिकरण्यविषयतानिरूपितसाध्यवत्ताधीविशेषधितावच्छेदकतेनापि लक्षितधर्मा
वच्छिन्नविषयतायाः स्वरूपसंबंधरूपप्रतिबध्यतावच्छेदकत्वमेव निवेश्यं न त्वनतिरिक्तवृत्तित्वेन तिनान्योन्या
भावघटितव्यभिचारधियाज्यताभावघटितव्यभिचारधियः प्रत्येकं प्रतिबध्यतायास्तादृशविषयिता
त्वावच्छिन्नव्यापकताविरहेपि न क्षतिः अत एव साधनाप्रसिध्यादावपि नातिप्रसंगः साध्याभावादिविषय
तायास्तत्प्रतिबध्यतावच्छेदककोटावनिवेशात् हेतुसामानाधिकरण्यविषयतायां च धर्मितावच्छे
दकताभिन्नत्वस्य लक्षणाविषयानिवेशे न धूमासमानाधिकरणवह्न्यभावादौ च दादिसामानाधि
करण्येतातिप्रसंगः साध्याभावव्याप्यसाध्याभावावच्छेदकादिसामानाधिकरण्यवारणाय दर्शितम
कारापदत्वयाल्लघुप्रकारांतरमाह साहत्ताध्यवत्तेति तादृशाभावेति हेतुसामानाधिकरण्याभावेत्य

४. गदा.

40

र्थः हेत्वाभासत्वेनेति दोषत्वेनेत्यर्थः विशेष्यदलप्रयोज्यदलप्रयोजनं स्फुटयति साध्याभावेतिअविरोधित्वात्
अत्र च प्रकृतानुमितिजनकज्ञानविरोधित्वमेवाभासत्वेन तद्वाधादिसाधारणं गुरुशरीरानुमितिः साधार
णोज्ञानुगमकप्रकारघटितं प्रयोजनाभावाद्दनुमितिजनकज्ञानस्यापि अनुमितिजनकतावच्छेदक
कोटिप्रविष्टविषयतावच्छिन्नत्वेन निवेशः न तु विशिष्टपक्षे विशिष्टसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्या
वगाहिज्ञानत्वेन तथासत्यस्मेतान्योन्याभाववद्घटितनानाविधव्याप्तीनामननुगमेन तादृशनानाविधव्यभिचा
रसंग्रहासंभवाद्भावद्व्याप्त्यवगाहिसमूहालंबनानुमितानिवेशेन तत्संग्रहसंभवेपि विरुद्धधर्मत्वाद्यवगाहि
ताद्याः प्रयोजनाविरहेणानिवेशप्रसंगेन तादृशाभावग्रहविरोधित्वविशेषणवैयर्थ्याच्च नत्वेनत्कल्पेधू
माभावव्याप्यसमानाधिकरणवह्निमान्धूमवान्वह्नेरित्यादौ वह्निनिष्ठधूमाभावव्याप्यसमानाधिक
रणवह्निमान्धूमवान्वह्नेरुपाश्रयासिध्यादावतिव्याप्तिरित्यतआह विरोधित्वमिति सर्वोक्तदिशेति
विशिष्टपक्षग्रहाविरोधित्वान स्वविषयतयेत्यर्थः पक्षधूमवान्धूमाभावसहचरितवह्नेरित्यादेहेतुतावच
छेदकधूमाद्यभावसामानाधिकरण्यादिविशिष्टवह्निसामानाधिकरण्यस्यधूमाद्यभावेनाहार्यज्ञानाप्रसि
ध्यातत्र स्वव्यलीयसाधारण्ये व्याप्तिरित्याशंकायाविरोधित्वमित्यादिकमवतार्यनिवह्नि वह्निमानित्यादिस्य
लीयदोषे सामान्यलक्षणव्याप्तिवारकसर्वोक्तप्रकारानुसरणपरतयातद्व्याख्यानेतत्र शोभनंतत्सर्वमेवं
विधेव्वरीतिं उक्तत्वमसर्वत्र सव्यभिचारादिलक्षणेश्वनुसरतेव्यक्त्यभिधानेनयोनतत्र्यायातात् नन्वव्यभिचरित
त्वविशिष्टसामानाधिकरण्याभावस्यान्यभिचारज्ञानाविरोधित्वादव्याप्तिरित्याशंकांतलक्ष्यतामेगोहात्यप
रिहरति उपदर्शितेति व्याप्तिग्रहसंपाद्यसाधारण्यभिचारधियोविरोधित्वात्ज्ञानत्वेन प्रतिबंधकत्वमेव

लक्षणेप्रवेश्यं अन्येन साधनप्रसिध्यदशावतिव्याप्तिस्त्वेषां निश्चयस्यैव विशिष्टसाधनादिग्रहे विरोधित्वा-
दित्याशयेन विशिष्टसाधनवत्तादिग्रहाविरोधित्वमनिवेश्य अन्येन साधनप्रसिध्यदशावतिव्याप्तिस्त्वेषां निश्च-
यस्यैव विशिष्टसाधनादिग्रहे विरोधित्वादित्याशयेन विशिष्टसाधनवत्तादिग्रहाविरोधित्वमनिवेश्य लक्ष-
णं कुर्वतां मतमाह व्याप्तिग्रहेति अत्र व्याप्तिग्रहकारणत्वमेवाभावेप्यनन्तताहृशसहचारदर्शनसहकारि-
त्वमव्यावर्तकत्वान्न तदभिधानं च सहचारदर्शनस्य यथा व्यापकताप्रत्यक्षे स्थाने न्योन्यकारणता संशयसाधारण-
व्यभिचारज्ञानाभावस्यापि कारणतात् तथैवेति दर्शनाय व्याप्तिस्त्वविशिष्यो केवोपादेया मणिमंत्रादित्याशयेन प्र-
तिबंधकता यत एकैकविधव्याप्तिज्ञाने प्रत्यपि नानाविधव्यभिचारधियः विरोधित्वादित्यवधेयं मणिमंत्रादित्या-
येन विरोधितायामस्वरसात् केचिदित्युक्तेनत्र विना मणिकारमते सत्प्रतिपक्षोत्थापकतया साधारण्यस्य दूष-
कत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न स्वैवंत्वादिग्रंथासंगतिरित्यत आह प्रा-
चामिति साध्याभाववन्मात्रवृत्तेरिति पर्वतो वह्निमान् जलत्वादित्यादेरित्यर्थः तत्रापि यत्किंचिद्विपक्षव्या-
वृत्तत्वसत्वादितिभावः ननु भूर्नित्या गंधवत्त्वादित्यादौ परमाणुरूपविपक्षवृत्तित्वादव्याप्तिरितिविपक्ष-
दृश्यवासत्व साध्याभाववद्दर्शकत्वाभिमानमूलांशं को निपकरोति विपक्षत्वस्येति ननु पृथिवीरूपवती र-
सादित्यादिकं जलादित्यादिके जलादौ नीरसत्वभ्रमदशायामसाधारणमेव सपक्षजलादिव्यावृत्तत्वस्य त-
दानीं हेतौ ग्रहादिति तत्र व्याप्तिर्वास्तवसर्वपक्षजलादिव्यावृत्तत्वादित्याशंकामलक्ष्यतयापरिहृथिवीति-
मूलं तथापि शब्दो अनित्यत्वानित्यत्वयोः साध्यत्वे शब्दत्वस्य सद्धेतुत्वविरुद्धत्वेपि साध्यतदभावेति हेतुमति
पक्षे साध्यानिश्चयेन व्याप्तिग्रहाभावात् सद्धेतावपि तत्र साध्याभावनिर्णयेन साध्याभावव्याप्यत्वरूपविरो-

४१ गदा॰

41

धस्याग्रहेणविरुद्धहेतावपिअसाधारणस्यदोषत्वमक्षतमेवेत्यर्थः अन्यथातदानीमपिसाध्यतदभावोभय॰
स्यतत्रनिश्चयेपिसाधयिषाविरहविशिष्टसिध्यभावरूपफलतायाः साध्यनिश्चयदशायामपिसिसाधयि
षासत्वेबाधनिश्चयदशायामपिचानुगतत्वान्नतद्भङ्गइत्यतआहदीधितौपक्षत्वमितिमणिकारमतेविपक्ष
व्यावृत्तेरसाधारण्यघटकतयातन्मतेग्रन्थेतादिनातस्यदूषणोपयोगितानिप्रकरणमसंगतमितितत्त्रुटि
तासाधारण्यवादिप्राचीनमतेदूषणपरतयातत्संगमयतिमतमितिप्राचामित्यादिः मूलेदोषइति दोष
विषयोज्ञाप्यतइत्यर्थः तस्याःविपक्षव्यावृत्तेरनुगुणत्वात् प्रकृतसाध्यसिध्यप्रतिकूलेज्ञापनकत्वात्
प्रकृतविपक्षव्यावृत्तत्वेनोपन्यस्तलिंगव्यतिरेकिमुद्रयाप्रकृतसाधकमेवस्यात् तथाचपरार्थस्थलेविपक्ष
व्यावृत्तत्वसहितंसपक्षव्यावृत्तत्वमनुज्ञाप्यत्वेननासाधारण्येदोषइतिभावः केवलसपक्षव्यावृत्तत्वेकोटिद्वया
नुपस्थापकत्वेननसाध्यसंशयकंकिंतुमिलितमेवेतिदीपतपामिलितमेवोज्ञाप्यमित्याशंकातेनचेतिसंश
यकंअसाधारण्यंयद्यपिविपक्षव्यावृत्त्वघटितं तथापिताहशस्यदोषत्वंनोपपद्यतेविरोधितानविषयस्यैव॰
दोषत्वात् विपक्षव्यावृत्तत्वांशज्ञानस्यचाविरोधित्वादित्याशयेनाह व्याप्तीत्यादितदभावज्ञौवनदूभा
वप्रयोजनकज्ञानविषयतयैवपक्षकर्मणानुमितितज्जनकज्ञानसाक्षाद्विरोधिविषयत्वव्यवच्छेदः तद्व्यवच्छे॰
दकत्वंदीधितिकृतस्फुटयतितथाचेतिस्वतोदूषणत्वमत्वात् अनुमितौतत्करणज्ञानेसाक्षाद्रूपेविरोधित्वात्
नाभासत्वंसपक्षव्यावृत्तत्वस्यापिमहेत्वाभासत्वपत्तेनविपक्षव्यावृत्तत्वस्यदूषणानुपयोगित्वेनदर्शापरित्यागे
नैवहेत्वाभासतास्वीकार्येतिशंकानिराकृतापवंचस्वार्थानुमानेसर्वसपक्षव्यावृत्तिरेवदोषइत्यस्माकमित्यनि॰
मममूलस्यापिस्वार्थानुमानेपिविपक्षव्यावृत्तेर्नदूषणोपयोगिकात्वंसपक्षव्यावृत्तत्वस्यसहचारधीविरोधितयात॰

ष्टात्वेऽपि न हेत्वाभासत्वमित्यर्थो बोध्यः ननु सहचारग्रहविरोधित्वे व्याप्तेः सहचारग्रहादितयां नेतन्नुहे
पि साक्षाद्विरोधित्वमेव तस्येति न कथं हेत्वाभासत्वमित्याशंकां परिहरति पक्षधर्मिव्यावृत्तत्वं चेति निश्चितसा
ध्यवद्व्यावृत्तित्वाभावश्चेत्यर्थः सामानाधिकरण्येन साध्यवद्वृत्तित्वसामान्येत्यर्थः धर्म्यंतरे साध्यवद्वृ
त्त्यंतरं न न भाव्यन तत्संभवात् सामानाधिकरण्यग्रहोदयात् दृष्टान्तपक्षाणां साध्यवत्त्वरूपसामान्यधर्मपुरस्का
रेण तद्धर्मिणं संनर्भाव्यापितत्संभवोऽद्यष्टव्यः तथा च तद्धर्मिव्यावृत्तत्वरूपविशेषाभावग्रहस्य प्रत्येकं सा
ध्यसामानाधिकरण्यसामान्यग्रहाविरोधित्वेनाहृपाभावरूपात्मकासाधारण्यग्रहस्यापि न तद्विरोधित्वान्न
तस्य सामानाधिकरण्यसामान्यघटितव्याप्तिज्ञाने साक्षाद्विरोधित्वमेवेति भावः अन्यथा यत्किंचिद्विरोधिका
ण्णांतर्भावेन सामानाधिकरण्यग्रहविरोधिनोऽपि दोषत्वे सतोः समीचनयोः साध्यसाधनयोः वह्निधूमयोः
व्यतिरेकित्वग्रहस्य वृत्तित्वं दोषाय स्यादिति न तस्यापि हृदायुतभावेन सहचारग्रहविरोधित्वादिति भावः संशा
यकतयाविपक्षव्यावृत्तत्वघटितासाधारण्यस्य दोषत्वाशंकितुः संशयात्मकज्ञानस्यात्रमितिसाक्षात्प्रतिबंध
कत्वमभिप्रेतं अन्यथा शंकायाः प्रतिबन्धकतायाश्चेः तादृशानुपपत्त्यभिप्रायमबुद्ध्वैव व्याप्तिग्राहकमित्यादिना
दृशस्य दोषता मणिकारैर्निरकारीत्यतो नूतनाभंगाय तादृशाभिप्रायमाशंक्य निराकरोति अथायमित्यादिना
निश्चयस्येति दृष्टांतार्थे विरोधिसामग्रीत्वेन विरोधिज्ञानसामग्रीत्वेन विरोधिनीति लिंगविपरीतेनान्वयः
आदिमस्य संशयस्य सव्यभिचारस्य साधारण्येनासाधारण्येन वाविशिष्टस्य द्वितीयस्य साध्याभाववन्निश्चयस्य
प्रतिहेतोः साध्याभावव्याप्यस्य पक्षे परामर्शः तयोः तद्रूपाग्रहविषयव्यभिचारसत्प्रतिपक्षयोः अत एव व्य
भिचारस्य संशापकतया दोषत्वादेव पक्षवृत्तित्वविशेषणं यथाश्रुतमेव सम्यगिति बोध्यः पक्षावृत्तेः पक्षेसा

धर्मसंशयाप्रयोजकतया पक्षवृत्तित्वे सत्तान्यादिलक्षणसाध्यकत्वीत्यव्यभिचारस्य दूषकतापत्तेरेवोपग
मात्रदलस्य वैनतत्राव्याप्त्यप्रसंजकत्वादिति भावः एवं च यद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन साध्यव
त्तानिश्चयत्वावच्छिन्ने प्रतिबंधकतापत्तेर्वृत्तित्वे सति तद्रूपावत्त्वं तादृशलक्षणार्थः साध्याभावव्याप्यवत्ताज्ञा
नस्य न निश्चयत्वं प्रतिबंधतावच्छेदकमिति न सत्प्रतिपक्षातिव्याप्तिः बह्न्यभाववत्त्वाद्यवच्छिन्नवत्ताज्ञानस्यापि
निश्चयत्वेन प्रतिबंधकता न निश्चयत्वावच्छिन्नं प्रति अतो न ह्रदो वह्निमान्वह्न्यभावादित्यादावतिप्रसंगः
इत्यवधेयं ननु एवं पक्षवृत्तित्वेन साध्यवद्वृत्तित्वेन चाघटितस्य साध्याभाववद्वृत्तित्वस्य व्याप्तिज्ञानविरोधित
या हेत्वाभासस्याधिक्यापत्तिर्व्यभिचारान्तर्भावादित्यत आह साध्याभावे निरूपितवृत्तिरेवेति व्याप्यत्वासिद्धि
रेवेत्यर्थः तत्त्वात् तत्प्रसिद्धिस्थित्वात् यद्यपि परामर्शाविरोधित्वं साधारण्यस्यापि साध्याभाववद्वृत्तित्वोपघटि
तत्वात् तत्तमेव तथापि प्रमेयत्वादिविशिष्टस्य तिष्ठावतिप्रसंगभंगाय तादृशाविरोध्यंतराघटितत्वं निवे
शस्याव्याप्यकत्वाज्ज्ञानिप्रसंगाः प्रतिबंधकत्वानंगीकारादिति निश्चयत्वस्यार्थसमाजगतत्वतया संशयानंत
रमसति विशेषदर्शने निश्चयत्वावच्छिन्नापत्तेरयोगादिति भावः तथा च संशयसामग्र्या अपि प्रतिबंधकत्वम
सिद्धमिति भावः संशयसामग्र्याः प्रतिबंधकत्वमभ्युपेत्यापि दूषयति साधारणधर्मपक्षज्ञानस्येति तन्मात्र
स्येत्यर्थः ननु तन्मात्रे सामग्रीत्वपर्याप्तिविरहेपि प्रतिबंधकसामग्रीघटकत्वेन तस्यापि प्रतिबंधकत्वम
व्याहतमेत्यत आह सामग्रीत्वेनेति सातन्त्र्यंतर्गतत्वपतयेत्यर्थः हेत्वाभासतायोगादिति तद्विषयस्येत्यादिः यद्वा
शाविशिष्टविषयकानिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशत्वमेव हेत्वाभासत्वं प्रतिबंध
कसामग्रीघटकज्ञानविषयः साधारण्यादिश्च न तथा विशेषदर्शनादिकालीनतदप्रतिबंधकीभूतज्ञानवि

तद्विषयकानिश्चयत्वसत्त्वादितिभावः अन्यथायथार्थविलक्षणंपरिक्षात्यप्रतिबंधकसामग्रीघटकज्ञा-
विषयस्य हेत्वाभासत्वोपपादने मेयत्वादिहेतौ साध्यतदभावसहचरितन्मेयत्ववान्यत् इत्यादिज्ञानविष-
यस्य दोषतायाउक्तत्वात् सर्वत्रेति तथा च धूमादिहेतौ तस्यादोषत्वेन नेबाधाप्रसंभवः आभासीभवेदिति
धूमादिहेतुकानुमितावपि तज्ज्ञानस्य संशयसामग्रीत्वेन प्रतिबंधकत्वादितिभावः विरोधिज्ञानसामग्री
विषयायस्य ज्ञाने प्रतिबंधकं न त्वाभासतामायद्यविरोधिजिज्ञासासामग्रीविधया प्रतिबंधकस्याविषयस्य ता-
मापादयतितथेति प्रयोजकत्वे जनकेज्ञानकज्ञानविषयत्वं विपक्षव्यावृत्तत्वस्य व्याप्तिपक्षधर्मतायस्ता-
विरोधित्वेनानुद्भावनीयतायाः प्रागेवव्यवस्थापितत्वात् किंचेत्यादिग्रंथस्यतस्यारत्वेनघटनेपौनरुक्त्यप्र-
संगात् नचपूर्वंमतेप्यपिनिदर्शनतासंभवेनन्यूनतायाश्चावश्यकतयानतदुद्भावनंनिष्फलकतामितिनपौनरुक्त्य-
प्रसंगइति वाच्यं एवमपि व्यतिरेकिणि व्याप्तिपक्षधर्मत्वाप्रतिक्षेपकतयातदुद्भावनतिराकरणे पौनरु-
क्त्यस्यदुर्वारत्वादित्यतः केवलसपक्षव्यावृत्तत्वोद्भावननिराकरणपरतया किंचेत्यादिमूलं भवतारयति एव-
मिति एवं उक्तप्रकारेण विशिष्टस्याविपक्षव्यावृत्तत्वविशिष्टस्य न तु साधनविकलस्यापि घटादेर्विशेषाद्दृष्टा-
न्तदृष्टान्तयामिव विपक्षे बहिर्दृष्टान्तदृष्टान्तयामव्याहार्यसाधनवत्वधूमादिनादृष्टान्तविधयोपन्यासतः संभवेत्येवेति
तत्रन्यूनताविरहेण साधारण्योद्भावनं सार्थकं न च तत्र दृष्टान्तस्य साधनवैकल्योद्भावने नैववादिनिहृतिसं-
भवात्साधारण्यस्य दोषत्वमनावश्यकमिति वाच्यं दृष्टान्तस्य निश्चितसाध्यवतः साधनवैकल्यसंभवे वा साधा-
रणत्वादित्याशंकां निरस्यति वाक्ययादर्शितेति यावन्निश्चितसाध्यवति साधनवैकल्यमसाधारण्यमेवेति वा-
क्यप्रदर्शितत्वाभिधानप्रकादेशे साधनवैकल्यस्य यावति सधनवैकल्यानतिरिक्ततया न स्यासाधारण्यत्वनि-

५८ गदा.

43

धासंगतेस्तदुद्भावनेऽसाधारण्योद्भावनत्वप्रतिरोधः सपक्षांतरवृत्तित्वेपीति हेतोरिति शेषः तत्संभवात् वा
रूपदर्शितस्य दृष्टांतस्य साधनवैकल्यस्यासंभवात् ननु एवं दृष्टांतस्य साधनवैकल्यं हेत्वाभासबहिर्भूततया
व्यापिनोद्भाव्यतेत्यत आह तदुद्भावनेत्विति ननु प्रतिज्ञाहानिः प्रतिज्ञांतरमित्यादिनिग्रहस्थानविभाजक
त्वेप्यस्यापरिगणनान्नानिग्रहस्थानतेत्यत आह विमानज्ञकेति आभासताप्रदर्शनायैव तदुद्भावनमित्यनु
षंगेणान्वयः आभासता बाधितसाधनवत्त्वार्थकता साचाप्यर्थकत्वरूपनिग्रहस्थानमिति भावः ननु यथाद
ट इत्यादिदृष्टांतप्रयोगस्य समयबंधीनत्वेनानियमितत्वान्न न्यूनमेवोदाहरणं प्रयुक्तं तत्रैवासाधारण्यमुद्भा
वनीयमित्यत आह आवश्यकश्चेति तथा च तदप्रयोगे न्यूनत्वमेवेति भावः मूले ज्ञानमित्यस्य पक्ष इत्यादिः
व्यतिरेकिनयेत्यनंतरं वाकारा सत्त्वेप्यादित्यस्यार्थापत्तिविपत्तिविधये स्थाने नंगच्छते अर्थापत्तिव्यतिरेकव
न्नमानोभयविधयासाधकत्वस्यैकमतेऽसंभवादित्यतोऽन्यथा तत्र व्याचष्टे अर्थादितीति व्यतिरेकित्वेऽ
र्थादिति रेकित्वेऽर्थाधीनत्वान्वयप्रमेनिपकर्तव्य न्यस्य योजयति व्यतिरेकिप्रद्वयामर्थादिति साधयेदि
ति संभावनायां लिङ् सिद्धप्रधान संभावना च योग्यताधीनाइत्यर्थः तः सालभ्यत इत्याशयेन व्याचष्टे अर्थेव
रोति उभयसाधकत्वे उभयसिद्धियोग्यत्वं परस्परसिद्धिसामग्रीरूपपरस्परसिद्धिप्रतिबंधकाभावादिति विज्ञोभय
सिद्धिसामग्रीसमवधानमिति यावत् मूले ज्ञानमित्यंते हेतुगर्भविशेषणमिति स्फुटयति उभयेति मूले अन्य
येति साध्यतदभावव्यापकीभूताभावप्रतियोगित्वेन ज्ञातस्य विरोधिसामग्रीतिविज्ञप्रतिबंधकासमग्राभावा
निविष्टा साध्यतदभावासिद्धिसामवहितत्वेपक्षवृत्तित्वानुपपत्तिरिति पक्षवृत्तितया ज्ञातत्वानुपपत्तिरित्यर्थः
इति साध्यतदभावोभयव्यापकतया असाधारणो दोष इति मूलार्थं दीधितिकृद्व्याचष्टे एवं चेत्यादिना तत्र साध्यतद

भावव्यापकीभूताभावप्रतियोगित्वतयोर्मिलितोभयसिद्धिसामग्रीत्वशंकानिराकरणेनसाध्यतदभा
वव्यापकीभूताभावप्रतियोगित्वज्ञानात्तदुभयसाधनायोग्यत्वमिति संदेहयोक्तिद्वयेपितावितिधेनपरस्पर
विरोधेननैकमपिसाधयतीतिसाधारणादितिशेषः एवंचासाधकत्वमेवहेतोर्दोषत्वमित्यवधेयंसंदेहे
हेत्वोर्व्यापकत्वेतिउभयव्यापकतयाग्राह्यस्यशब्दत्वाभावस्याभावः शब्दत्वतद्व्यक्तित्वरूपस्यव्यभिचार
स्यस्यार्थः संदिह्यमानत्वादितिउक्तसंशयेनविषयीकरणादित्यर्थः आधारत्वाधायत्वयोस्तुल्यवित्तिवेद्य
त्वादितिभावः एतच्चव्याप्यधर्मिकव्यापकाभाववद्वृत्तित्वज्ञानमेवव्यापकताग्रहप्रतिबंधकमित्यभिमाने
नवस्तुतस्तुतादृशज्ञानवद्व्यापकाभाववद्धर्मिकव्याप्यवत्ताज्ञानमपिप्रतिबंधकमसमानप्रकारकत्वस्या
विपकाभाववद्धर्मिकव्याप्यवत्ताज्ञानमपिप्रतिबंधकमसमानप्रकारकत्वस्याविपकाभाववद्धर्मिकव्या
प्यवत्ताज्ञानमपिप्रतिबंधकमसमानप्रकारकत्वस्याविशेषादितिकथितसंशयेशब्दवृत्तित्वयानि
त्यत्वाद्यभावेपिनक्षतिरित्यवधेयंतादृशेतिशब्देनित्यत्वसंशयाभावदशायांचघटगगनादेःशब्दत्वाभा
वेप्रत्येकमुभयसहचाराज्ञानात् तथात्वेतिद्वयेशब्दत्वाभावेउभयव्यापकतानिश्चयेसतितज्जन्यसंस्का
रात् शब्देसाध्यसंदेहदशायामपितादृशव्यापकताद्वयस्मरणेःव्यापकत्वाभानसंभवेनव्यापकीभूताभा
वप्रतियोगिशब्दत्ववत्त्वस्यशब्देप्रतिसंधानेननिश्चेतुंशक्यत्वादित्यर्थः गगनघटादौशब्दत्वाभावेनित्य
त्वतदभावसाहचर्यग्रहः शब्दत्वोपस्थितावेवसंभवतिशब्दत्वज्ञानप्रतीतौचव्यक्तिमात्रेनियतमितिश
ब्देनित्यत्वतदभावसंशयजनकंधर्मिज्ञानमेकतरकोट्युपस्थितिनिश्चयवततेतस्यापिकारणांतराभावादेव
तत्रसंशयाविरहः अतोयत्साध्यहेतौकेहेत्वभावेसाध्यतदभावयोःसाहचर्यंदृश्यमाणेतत्रमतोधर्मे

४४ गदा. ५५

ण उपस्थित्यनैयत्येन तत्र धर्मिज्ञानाभावेनैव हेतुमति न साध्यतदभावसंशय इति तादृशस्थले त्व-
भावे साध्यतदभावव्यापकताग्रहे सौकर्यमाह स्वाश्रयमिति सहचारेण सहचारग्रहेण तादृशाभावेति
पृथिवीत्वमदभावव्यापकताविशिष्टाभावेत्यर्थः पृथिवीत्वादौ साध्य इति चेदनं पृथिवी सौरभादित्या-
दावित्यर्थः असाधारण्यस्य असाधारण्यग्रहस्य च यं साध्यतदभावव्यापकीभूताभावप्रतियोगितया गृह्य-
माणो हेतुः सत्प्रतिपक्ष एवेति विरोधिव्याप्तिपक्षधर्मताज्ञानप्रतिरुद्धकार्यकत्वादिति भावः तथा च नासा-
धारण्यस्य स्वतंत्रत्वाभासतेति भावः ननु विरोधिव्याप्तेरन्वयव्याप्तित्वे सत्प्रतिपक्षताप्रयोजकमिति नात्र
सत्प्रतिपक्षतेत्यत आह व्याप्तेरिति अन्वयनिरूपितत्वस्य साध्यसाधनोभयनिरूपितत्वस्य अव्यापकत्वेन व्य-
तिरेकिणा हेत्वन्तरेण यत्र सत्प्रतिपक्षता तत्र स्थले साधारण्याभावेनैवेन एवंविधेति यत्र हेत्वन्तरेण प्र-
तिरोधस्तत्र सत्प्रतिपक्षतापत्तौ च त्वेनैव स्वकार्यप्रतिरोधकत्वं तदन्यहेत्वाभासत्वेनाभिधानमित्यर्थः अति-
प्रसंगः यत्रान्वयिना हेत्वन्तरेण प्रतिरोधः स सत्प्रतिपक्षः यत्र च व्यतिरेकिणा हेत्वन्तरेण प्रतिरोधः स हेत्वाभा-
सान्तरमित्यादिप्रसंगतदभावसाधक इत्यादेः प्रकृते पक्षद्वयस्य पृथगभिधानस्येत्यादिः अशक्तिविशेषो-
तिपाद्यापाक्तिः उभयलक्षणाक्रान्ततया उभयान्तर्भावस्येति यथा सत्प्रतिपक्षलक्षणाक्रान्ततया सत्प्रतिप-
क्षता तथा सव्यभिचारलक्षणाक्रान्ततया तथात्वस्यापीत्यर्थः अविरुद्धत्वादिति तथा च सव्यभिचारसामा-
न्यलक्षणाक्रान्तस्य सव्यभिचारमध्ये एव पृथग्विभजनीयतया साधारण्यानुपसंहारिभिन्नस्य शब्दो नित्यः
शब्दत्वादित्यादेरसाधारणत्वेन विभजनं युक्तमेवेति भावः कश्चिदित्यस्वरसः स्वरसः सूचितः स वा साधारण्यस्यान्त-
र्गतप्रयोजकदोषान्तरबीजमनाहत्य सत्प्रतिपक्षान्तर्भावस्वीकारे व्याप्तिज्ञानविरोधित्वघटितस्य तद्याहत

स्यैव साधारण्य संग्राहकसव्यभिचारसामान्यलक्षणस्यैव संभवेन प्रयासेन सद्धेत्वालंबनानुमिति-
विरोधिताघटकतत्साधारण्यसव्यभिचारसामान्यलक्षणस्य तन्निवेशिकतया तस्य सव्यभिचारान्तर्भावासं-
भवात् सपक्षपदस्य निश्चयगर्भार्थकत्वे सत्यतिप्रसक्तो व्यापकतानसंभवति व्याप्तिज्ञानागर्भत्वादित्य-
न्तत्त्यागाच्च हेतौ सपक्ष इति पक्षवृत्तित्वाविशेषितस्य साध्यव्यापकीभूताभावप्रतियोगित्वस्य यद्धर्मवृत्तित्वे
हेतोर्ज्ञायते इत्यादिरीत्या सव्यभिचारसामान्यलक्षणाक्रान्तत्वेपि ग्रहानुमितिप्रतिबंधकतानतिरिक्तवृत्ति-
विषयिताकत्वाभावेन हेत्वाभाससामान्यलक्षणाक्रान्तत्वेपि ग्रहानुमितिप्रतिबंधकतानतिरिक्तवृत्तिविष-
यिताकत्वाभावेन हेत्वाभाससामान्यलक्षणाक्रान्तत्वं ग्रहानुमितिविरोधिताशून्यपक्षधर्मताज्ञानकालीन-
ज्ञानावृत्तिविषयिताकत्वरूपं प्रतिबंधकतानतिरिक्तवृत्तित्वसामान्यलक्षणनिवेश्यहेत्वाभाससामा-
न्यलक्षणाक्रान्तत्वसंपादनसंभवेपि तादृशप्रयासगौरवं स्वतासाधारण्यशरीरे पक्षवृत्तित्वमन्तर्भाव्य पक्षेत-
रवृत्तित्वे सतीति यद्यप्येवं सव्यभिचारसामान्यलक्षणस्य यद्धर्मवृत्तित्वमित्यादिना वाधादिसाधारण्य-
प्रकारेण संभवति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मविशेषविनिर्यन्त्रितत्वात् तादृशरीत्यादेरेनिरु-
क्तासाधारण्यस्यैवासंग्रहापत्तेः तथापि प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृततावच्छेदकविशिष्ट्यावगा-
हि प्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाननिरूपितायानिरुक्तासाधारण्यविषयकत्वान-
वच्छिन्नप्रतिबंधकतातज्जन्यतेसतिसद्धेत्वालंबनानुमितिविरोधित्वस्य वाधप्रतिरोधव्याप्तत्वस्य निरुक्ता-
साधारण्यसाधारणस्य सव्यभिचारसामान्यलक्षणत्वसंभवात् साध्यवन्निष्ठव्याप्तत्वपदितवद्वृत्तित्वं-
तदापत्त्यो नित्यः श्रोत्रग्राह्यत्वे सति गुणत्वादिना दोषविशिष्टस्य गुणत्वादेः केवलान्वतिरिक्ततया नित्यत्ववद-

४५ गदा०

45

वृत्तित्वंनोपपद्यतइत्यव्याप्तिः एवंसाध्यवदवृत्तित्वंसामानाधिकरण्यग्रहविरोधितयाव्याप्तिग्रहविरोधि
त्वेतिनसम्भवतिपक्षेऽव्यापकत्वमतोव्यावृत्तत्वात्तंव्याचष्टेसाध्यव्यापकइतिविरोधरूपोपाधेःसाध्याभावव्या
प्यतारूपत्वेसोपिसाध्यव्यापकोभूताभावप्रतियोगित्वमितिसंकारइत्याशंकांनिराकरोतिसाध्यासाध्यसामा
धिकरण्याग्रहस्यहेतुनिष्ठसाध्यासामानाधिकरण्यादीत्यर्थः आदिनासाध्यनिष्ठहेत्वसामानाधिकर॰
ण्यपरिग्रहः नन्वेवंविरोधस्यविरोध्यविषयकत्वेनानुमित्यविरोधितयानदोषतास्यादित्यतआहसामा॰
यव्याप्तीतिसाध्यहेतुसामानाधिकरण्यघटितव्याप्तीत्यर्थः पक्षावृत्तित्वप्रवेशाप्रवेशाभ्यामपिभे प्रवेशा०
दसंभवात् शंकापिनेत्यत्रांशस्यप्रसिद्धानुत्वादित्यादावाल्पसाध्यवद्व्यावृत्तत्वाभावेनाव्याप्तिशं॰
कापिनेत्यत्रांशस्यमलत्वनत्यापरित्वरोन साध्यसामानाधिकरण्यत्वातिनन्नदृष्टान्तस्थलेपिदृष्टावि
शेषेऽसाधारण्यज्ञानेनानुमित्यनुत्पादाद्धेतोरुद्भाव्यत्वाभावप्रत्येकमलत्वत्वमित्यतआहद
दृष्टान्तविशेषइतितद्भ्रमः असाधारण्यभ्रमः पक्षमात्रवृत्तित्वभ्रमःतत्रहेतोरुद्भावनेत्यर्थः प्रतिबंधकत्वञ्च
नायहृष्टोतमाहव्याप्यइतिमिश्रव्याख्यानमुपन्यस्यतिनवीनाइतिसामग्रीद्वयविरोधेनेतिहेत्वभावे
साध्यतदभावव्यापकत्वग्राहकसामग्र्योःपरस्परजन्यफलप्रतिबंधकत्वेनेत्यर्थः ग्रहविरोधायहा
नुत्वादुःअसाधारण्यस्यहेतोहेतुतायावीजंव्यापकतयोर्विरोधएवपरस्परग्राहकसामग्र्याःपरस्परग्रह
प्रतिबंधकत्वसम्भवतीतिविरोधमेवोपपादयतितथाहीतिभावेदधिकरणेवर्ततेनव्याप्तितिवृत्तेरधिकरण
निरूपितत्वनियमादितिभावः नचचतदधिकरणेचसाध्यतदभावयोरन्यतरेणावश्यंभवितव्यंप्रतियो
ग्यभावयोरेकात्तत्वेपरसत्वनियमादितिभावः तत्राधिकरणेनत्वेत्वभावः संभावतिप्रतियोगिवृत्त्या॰

विरोधादित्यस्मादिति भावः तत्राधिकरणेन हेत्वभावः संभावति प्रति अतो हेत्वभावस्य तत्रासत्त्वाद्
न्यतराव्यापकत्वसाध्याभावाव्यापकत्वयोरन्यतरवत्त्वेनस्य हेत्वभावस्य तयोर्भेदे त्वधिकरणे यस्य स्थिति
तद्व्यापकतायास्तदभावेऽसंभवादिति भाव एवंविधाविरोधध्रौव्येणैवं नित्यानित्यानित्यत्वतदभावव्यापक
तायोः ग्राहकत्वाभावादेकसत्त्वेऽपरासत्त्वानियमे सहचारज्ञानमिति व्यापकताग्राहककारणीभूतं गगनत्व
दौ ग्राह्यसामानाधिकरण्यज्ञानमित्यर्थः विरोधिग्राहकसामग्र्याः प्रतिबंधकत्वदृष्टान्तेन दर्शयति विरोधीति (
साध्यतदभावौ न ग्राहयतीत्यनुषंगेणान्वयः अहृत्तिवारणाय हृत्तिमत्त्वमिति सपक्षविपक्षव्याहृत्तत्वया
वत्त्वपक्षविपक्षनिष्ठाभावप्रतियोगित्वेन तद्धेत्वभाववत्त्वरूपेण सहचारज्ञानमेव तेन रूपेण व्यापकताग्राहक
तया व्यापकतांतरग्राहकविरोधीति तद्धि घयस्यैव दोषत्वमुचितत्वाशयेनाह हृत्तिमदिति उभयव्यापकीभूताभाव
प्रतियोगित्वज्ञानविषयत्वं अप्रमाणयोरुभयोः सहचरितसाधारणमिति नोभयसाहचर्यरूपतया व्याप्त्य(
गोभयसाधकत्वापादकत्वमतो व्याचष्टे ज्ञानयोग्यमिति उभयसाधकत्वे उभयसाहचर्यं रूपव्यतिरेकव्याप्त्रमा
नत्वमप्रयोजकमिति व्यतिरेकितयेत्यप्रयाव्याचष्टे व्यतिरेकितयेनाहशेति साध्यतदभावव्यापकीभूतेत्यर्थः
यद्यपि नाहशव्यतिरेकप्रतियोगित्ववत्त्वस्यात्र हेतोरुभयसहचरितत्वात् दित एवं तादृशप्रतियोगिताया उभय(
साहचर्यप्रयोजकत्वे लभ्यते तथाप्यप्राप्तिसूलभूतव्याप्तिप्रदर्शनाय व्यतिरेकितयेति उत्तं मूलेऽभि
हितमित्यवधेयं क्रमेणोभयसाधकत्वस्येष्टत्वादुभयसाधयेहित्यस्यार्थमाह उभयसहचरितेभवेदिति यद्यपि
हृत्तिमत्त्वविशेषितैककोटिव्यापकाभावप्रतियोगित्वस्यैव लगत्या अपरकोटिव्यापकाभावप्रतियोगित्व(
विरुद्धत्वेऽपि विरोधाप्रतिसंधानदशायां नैकग्राहकसामग्र्या अपरग्राहकविरोधित्वमिति दर्शितं तर्कावतारेणैव

४६ गदा.

46

विरोधप्रतिसंधानमन्तरावधारणात्मकप्रमायामनंगीकार्यं यत्तूभयोरपि व्याप्तिदर्शितरीत्यानवधारणे चेत्यादिना तथा च श-
ब्दे नित्यत्वानित्ययोः संदेहे शब्दत्वे तदुभयव्याप्यत्वमपि संदिग्धमेवेति तद्रूपायां निश्चयकत्वानोऽन्नतर्कावतारसंभवः तदु-
भयैकाधिकरणवृत्तित्वस्य चाप्रसिद्ध्या नोपपत्तिसंभवः अप्रसिद्धस्य व्याप्यत्वावधारणासंभवात् एवमुभयव्याप-
कीभूताभावप्रतियोगित्वमहत्त्वाप्रसिद्धं तत्र नोभयसाहचर्यमिति विरोध एव व्याप्यापादकयोः वाच्यमापत्तिः
वृत्तिमत्त्वे सति उभयव्यापकीभूताभावप्रतियोगित्वं वा प्रसिद्धं वृत्तिमत्त्वे सति तत्तत्कोटिव्यापकीभूताभाव-
प्रतियोगित्वं तदुभयाभावद्वयसद्भावादेवधार्यं सामान्यतः आपाद्यापादकयोर्यद् वृत्तिमत्त्वे सति यदुभयव्या-
पकाभावप्रतियोगित्वं तत्त्वं तदुभयाभावद्वयैकाधिकरणवृत्तौ व्याप्तिरवधार्यं तेन तत्त्व शब्दत्वादौ वृत्तिमत्त्व-
नित्यत्वतदभावव्यापकाभावप्रतियोगित्वानामाहार्यत्वानान्नित्यत्वतदभावद्वयैकाधिकरणवृत्तिस्यादिदमित्य-
प्रसिद्धिविशेषापत्तिः स्वल्पमेव सामान्यव्याप्यस्याधीनविशेषानुमितावपि तदधीनविशेषानुमितावपि तदधीन-
विशेषापत्तावपि विशेषप्रसिद्धेरनंगत्वात् न चोक्तायामप्रसिद्धौ प्रतियोगप्रसिद्ध्या आपाद्यव्यतिरेकानिश्च-
यासंभवेन नापत्यवतारसंभव इति वाच्यं विशिष्टविषयकापत्तौ विशेष्ये विशेषणाभावनिश्चयस्यापि विशि-
ष्टाभावनिवर्तकत्वेन हेतुत्वाधिकरणे नित्यत्वाभावाभाववत्त्वनिश्चयादेव तादृशापत्तिसंभवात् स्थूलव्य-
तिरेकितयेति यद्वा त्वया दर्शितेन तदेव स्फुटीकरोति व्यापकाभाववतीति प्रतियोगिनोऽभावात्वतत्प्रकृत
त्वं वाधं अन्यथेत्यस्याविवरणानन्तराभावद्वृत्तिशब्दत्वस्यैकाधिकरणे उभयाभावे तस्यावृत्तित्वे चेत्यर्थः उभययोर्वो-
क्तापाद्यसत्त्वविघटवात् अवृत्तित्वपक्षे एव शब्दरूपप्रसत्त्धर्मतायामनुपपत्तिर्नेत्व शब्दत्वाधिकरणे तदुभयाभा-
वसत्त्वपक्षे तथा सति उभयाभावविपर्ययेण तदुभयरूपं तया शब्दत्वाभावे तदुभयपक्ततायापत्तानुपपत्तेरिति

मूलेनूनतांभंगाय पूरयति व्याप्ये वेति इष्टापत्तिशंकाविरहं स्फारयति न च तत्याभाव इति तथा चेष्टापत्तिशं
काविरहेण शब्दत्वे नित्यत्वानित्यत्वोभयाभाववद्दीधितिकारणकत्वे मिलितापादकानां कृत्रिमत्वनित्यत्वत
द्भावव्यापकीभूताभावप्रतियोगित्वानामभावे साधनीये नित्यत्वतद्भावव्यापकाभावप्रतियोगित्वयो
र्द्वयोरभावः पक्षधर्मताबलात् शब्दत्वे सिद्ध इति प्रथममेव विरोधग्रह इति भावः ननु कृत्रिमत्वाभावमादायैव
न कथं पर्यवसानमित्यत आह न चापक्षवृत्तित्वं बाधितमिति तथा कृत्रिमत्वनिश्चयान्न तथा पर्यवसानमि
ति भावः एतन्मते साध्यतदभावोभयव्यापकतया पक्षसाध्यतदभावसिद्धिसामग्रीसमवहितेन तर्कयोर्न संभ
वति व्याप्ये महाभावेन तादृशसामग्र्यसंभवात् अतोन्यथा व्याचष्टे साध्यतदभावेति दोषद्वयस्य व्याख्यायां व्याप्ति
ग्रहप्रतिबंधक इति व्याप्तिमहाविरोधिधर्मवानित्यर्थः एतन्मतेऽसाधारणे सत्प्रतिपक्षाविशेषशंकानवतारान्
आशंकांतरेण सत्प्रतिपक्ष इत्यादि मूलमवतारयति नन्विति विरोधिव्याप्तिद्वयं साध्यतदभावनिरूपितव्या
प्तिद्वयं न गृह्यते ग्राहकसामग्रीद्वयविरोधेन एकदा न गृह्यते सत्प्रतिपक्षोच्छेद इति परस्परसामग्रीविरोधेन विरोधि
कोटिस्मरणमिति प्रतिबंधोच्छेदे इत्यर्थः गृहीतेति गृहीतद्वयधर्मिकतत्तदभावव्याप्तिग्रहाधीनत्वादित्यर्थः हेतुवक
तायामनुपयोगादिति यत्किंचिद्दीधितिकारणे साध्यहेत्वसामानाधिकरण्यस्यापि व्यापकताग्राहकत्वेन तादृशा
त्यादौ सव्यत्वे अधिकरणे पावत्वस्याप्रयोजकत्वकात्वादित्यर्थः ननु यत्किंचित्सपक्षादौ तेनाग्रहे तादृशव्यभिचारेणाप्र
तिबंधाद्धेत्वभावे साध्यादिव्यापकताग्रहो न संभवतीति या च तत्सपक्षादौ हेत्वभावग्रहो व्यभिचारग्रहविरोधित
या हेत्वभावे साध्यादिव्यापकताग्रहकं इति कथं पावत्वानुपयोग इत्यत आह व्यभिचारग्रह इति या च तत्सपक्षादौ
हेत्वभावग्रहस्य व्यभिचारग्रहमात्रसंपादकत्वेन व्यापकताग्रहे अन्यथासिद्धत्वादित्यर्थः तथा च पावत्वघटि

47

ऽसाधारण्यज्ञानत्वेन प्रतिबन्धकज्ञानाजनकतया न तेन रूपेण प्रतिबन्धकत्वमपीति न तादृशासाधारण्यस्य
दोषतासंभवः सहचारज्ञानविषयव्यापकताग्रहकज्ञाने विषयस्य यत्किंचित्सपक्षविपक्षयोर्हेत्वभावस्य दोष
त्वे वह्निमान् धूमादित्यादावपि पिण्डजलह्रदादिनिष्ठधूमाभावादेरसाधारण्यताप्रसंग इति भावः ननु वृ
त्तिमत्त्वे सति यावत् सपक्षविपक्षनिष्ठात्यन्ताभावप्रतियोगित्वस्य हेतौ ज्ञानं वृत्तिमत्प्रतियोगिकत्वे सति या
वत्सपक्षविपक्षवृत्तित्वस्य हेत्वभावे ज्ञानं च तादृशेन व्यापकताग्रहाजनकमपि व्यापकताग्रहप्रतिबन्ध
कतास्त्यापत्तेः साधारण्यज्ञानदशायां व्यापकताग्रहानुत्पादस्यानुभवसिद्धत्वादित्यत आह वृत्तिमत्त्वादि
तिविरोधिविषयकत्वाभावादिति तथा च तादृशासाधारण्यज्ञानकाले व्याप्तिग्रहानुत्पादस्यैव नानुभविकाविरोधि
विषयकज्ञानकाल एव ज्ञानानुत्पादस्यानुभविकत्वादिति भावः उपदर्शितविरोधस्य एककोटिव्यापकत्वे तदभाव
रूपापरकोटिव्यापकत्वानुपपत्तिरूपस्यासाधारण्याभावादि व्यापकताप्रतियोगिकविरोधस्य तच्छरीरे साधारण्यघ
टकहेत्वाभाववन्निष्ठात्यन्तसपक्षवृत्तित्वादेरप्रवेशेन तदभावादसत्त्वात् तथा चैव व्याप्यसाधारण्ययोर्मिथो विरोधि
रूपत्वाभावादिति पर्यवसितार्थः नन्वसाधारण्येन समं व्याप्तेरविरोधेऽपि वृत्तित्वाभाववन्निष्ठयोर्मिथो विरोधान्न
योरेकदा निश्चयोत्पत्त्यसंभवविरुद्धः एवं चासाधारण्यग्रहदशायामपि व्यापकताग्रहः स्यान्न तदा च विशेषेण व्या
पकताद्वयग्रह एव स्यादित्यगत्या साधारण्यग्रहस्य व्यापकताग्रहविरोधित्वमास्थेयमित्यत आह व्यापकतयो
रपीति न स्वतो विरोध इति न विरोधाग्रहदशायां भावाभावयोरिव कदापि निश्चयाविषयत्वमित्यर्थः नन्वुक्तरी
त्या विरोधावधारणाद्दशायां कदापि निश्चयपर्याप्त्यैव तादृशप्रतिबन्धकताकल्पनमावश्यकमित्यत आह
दर्शितरीत्येति आवश्यकं चैवं च कल्प्यप्रतिबन्धकतासं व्यभिचारज्ञाने हेत्वभावाभावरूपहेतुमत्तानित्य

त्वतदभावसंशयात्मकसाधारणज्ञानं प्रतिबंधकंहेत्वभावेनित्यत्वतदभावव्यापकताज्ञानात्तु साध्यनि
र्वाहकेतत्स्यापितत्रनियमेनकल्पनसंभवात्तथाचनतदनुरोधेनाप्यसाधारणप्रतिबंधकताकल्प्यतेइतिभावः
अतएवतादृशस्थलेवासाधारणधीमात्रेणव्याप्तेर्ग्रहाप्रतिबंधादेवभवतिव्याप्तिधीरिति असाधारणज्ञाने
तर्कोस्यैतेजकत्वादिभावः असाधारणज्ञानस्यप्रतिबंधकत्वेतत्रतर्कस्याकिंचित्करतयाव्याप्तिधीरिति
साधारणज्ञानेनतर्कोस्यातेजकत्वादितिभावः असाधारणज्ञानस्यप्रतिबंधकत्वेतत्रतर्कस्याकिंचित्कर
तयाव्याप्तिग्रहासंभवादुपष्टंभसंगतिः एतेनव्याप्तिप्रतिबंधकतयैवनिर्वाहेणतुल्यबलविरोधव्याप्तिग्र
हसामग्रीत्वेनविरोधिव्याप्तिग्रहासाधारणानन्तकारणसमुदायत्वेन नत्वसाधारणज्ञानत्वमात्रेणतर्क
वतारेनप्रकारद्वयेवतर्कावतारेतुल्यबलत्वेवसकलकारणसंवलनमेवनास्तीतिविरोधिव्याप्तिग्राहकस्य
तर्कस्यानुकूलतर्काभावसहितस्यप्रतिबंधकतयातदभावस्यापिसामग्रीघटकत्वादितिभावः अतो
नतत्रव्याप्तिग्रहानुपपत्तिरितिशेषः उपयोगित्वात् उक्तस्यत्वेव्याप्तिग्रहेऽपेक्षणीयतोपपत्तेः अतिरिक्त
प्रतिबंधकताकल्पनिष्प्रयोजनतर्कावतारस्यनिर्युक्तिकत्वादितिशेषः केचित्तु तुल्यबलविरोधव्याप्ति
ग्रहासामग्रीत्वेनेति स्वसमानकालीनप्रकृतव्याप्तिग्राहकसामग्रीयावत्कारणघटिततावत्कारणघटि
ततयाविरोधिव्याप्तिग्राहकसामग्रीत्वेनेत्यर्थः तुल्यबलत्वेववविरोधिव्याप्तिग्राहकसामग्र्यानास्ति
तद्व्याप्तेस्तर्कासत्वेनत्वनुत्पन्नत्वादिभावः तर्कस्येति तथाचतर्कस्यव्याप्तिग्रहकारणत्वाभावात् तर्कसत्वा
सत्वेनन्यूनाधिकबलभावभावकत्वादित्याचक्षुः हेत्वाभासत्वोपयोगाच्चेतिप्राग्यदर्शिनानिप्रसंगादि
भावः नन्वेवंसत्प्रतिपक्षस्यहेत्वाभासत्वानुपपत्तिरित्यतआह सत्प्रतिपक्षेचेतिविरोधीतिग्राह्याभा

४८ गदा.

48

वादीत्यर्थः नन्वेवमुभयव्याप्यवत्तानिश्चयदशायामेकसाध्यस्य बाधावतारेपि ह्यन्याप्यां तस्मान्नतु नानुप-
संगइत्यतआह बाधावतारेत्विति अव्याप्यत्वादित्यादिनाऽपक्षधर्मत्वपरिग्रहः एतेज्ञानं च व्याप्तिविशिष्ट-
हेतुमज्ज्ञानविशेषणानापन्नविशेष्यताधर्मिविशेषणतया बोध्यं तथा च प्रतिपरामर्शे वा स्याद्यंशेः प्रा-
माण्यज्ञाने इति पर्यवसितार्थः एतेन तत्साध्याभावनिश्चयेपक्षविशेषणतापन्नहेतुं वैशेतत्साध्यव्याप्ति-
प्रकारकपरामर्शीयहेतुविषयतायां साध्याभावत्वावच्छिन्नविषयतानिरूपितत्वग्रहेण ततस्तत्त्वत्तावृत्ति-
निष्ठत्वव्याप्यभाववद्विहितत्वान्यतरवत्वे तद्विशेषणतापामनुभातं शाकयत इति चाधनिश्चयस्य परामर्शः
प्रामाण्यग्रहकतावेध्य एतेनाव्याप्यत्वादिज्ञानस्यानुमितिविरोधिव्याप्यवत्ताज्ञानसत्वे नाकिंचित्करतात्व्या-
प्यवत्तापरामर्शेणप्रतिबंधाद्दृष्टताचेत्यसंगातिरियरास्तंअप्रामाण्यज्ञानेऽव्याप्यत्वादेर्धर्मितवच्छेदकान-
वच्छिन्नपक्षहेतोर्भानात्तस्य व्याप्त्यादिनिश्चयाप्रतिबंधकतया विरोधिनिश्चयोत्तेजकीभूतत्वमवधा-
नेप्रकृतसाध्यानुमितिसंभवात् सर्वमभिधेयं घटत्वादित्यादेः केवलान्वयिसाध्यकस्यापि न निर्दुष्टत्व-
रूपसद्धेतुत्वं सर्वमनित्यं घटत्वादित्यादेर्व्यतिरेकिसाध्यकस्यापि न साधारणत्वमतोहेतुविशेषपर-
तयासद्धेतुत्वासाधारण्यादीतिमूलसंगमयति सद्धेतुत्वमिति न्यूनतामेगाय व्यतिरेकिसाधनस्थल-
स्यतो त्वयेनियकरोति व्यतिरेकिणा इत्वाति भागासद्धेतुत्वे सर्वपक्षकस्य सर्वस्यैव व्यतिरेकिणः साधारणत्व
विरुद्धत्वेयथासंभवं सर्वमनित्यं सत्त्वात् गगनत्वादित्यादेर्बोध्ये केवलान्वयिसाध्यकसद्धेतुवारणाय-
तितस्य सद्धेतुत्वे नालक्ष्यतायाः प्रागभिहितत्वादिति भावः व्यतिरेकिसाध्यके नि पर्वतो वह्निमान्
धूमादित्यादावित्यर्थः सद्धेतुत्वं प्रकृतदोषरहितत्वं तेन पर्वतो धूमवान् वह्नेरित्यादेर्वारणीयत्वेपि न न्यूनता

पक्षत्वं यदि संदिग्धसाध्यकत्वं तदा केवलान्वयिनि साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयमादाय पक्षतासं
पादनसंभवेपि सत्यं तथैव पक्षत्वं दुर्वारमेव केवलान्वयिसाध्यकेपि संशयदृष्ट्याग्रनुपसंहारित्वस्यैतत्वेन तद्वारणं ते
कविशेषणदानानौचित्यात् अत एव सिद्धान्तलक्षणे संदेहात्मकपक्षत्वघटितपक्षताविशेषणं परित्यक्तमेवेति पक्ष
त्वमन्यथाव्याख्याने पक्षत्वमिति साधकबाधकमानशून्यत्वमिति निश्चयबाधनिश्चयाभाववत्त्वमित्यर्थः केवल
व्यतिरेकिवारणाय बाधनिश्चयाभावनिवेशः ईदृशीं च पक्षतां सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा कदाचिदपि सा
ध्यस्य न संशयो नापि निश्चयस्तदा पक्षत्वं नैवेति तदानीं तत्रानुपसंहारित्वस्य सिद्धान्तिनोप्यनिष्टस्य वारणाय सत्यं
तद्दलस्यैव सार्थक्यमिति भावः नन्वेवमपि सत्यं तद्दलेव पक्षत्वं दुर्वारमेव केवलान्वयिसाध्यके साध्याभावाप्र
सिद्ध्या बाधनिश्चायघटितपक्षत्वाप्रसिद्ध्या विशेष्यदलस्यैवासत्त्वादित्यत आह केवलान्वयिसाध्यके
पीति बाधकमानप्रसिद्धिसत्त्वेपि पक्षनिष्ठाभावप्रतियोगित्वधीरेव स्थलभावार्थ इत्यत्रेति शेषः बाधकमान
पदस्य साध्यवत्ताज्ञानत्वावच्छिन्नविरोधिनिश्चयपरत्वादिति भावः नन्वत्रापि लक्षणे पूर्वलक्षणोक्तलक्ष्याप्रसिद्धि
र्नोगतिः सर्वमनित्यं प्रमेयत्वादित्यादेः साधारणादिसंकीर्णलक्ष्यत्वासंभवादिति कथमेतत् लक्षणावता
र इत्यत आह निश्चितेति निश्चितसाध्याभाववद्वृत्तित्वमात्रेति हेतुः तथा च निश्चितसाध्याभाववद्वृत्तित्वे साधारण
त्वं निश्चितसाध्याभाववन्मात्रवृत्तित्वे विरुद्धत्वमिति यथासंख्येनान्वयः इतीति हृदयमित्यग्निमेणान्वयः एवं च
सर्वमनित्यं प्रमेयत्वात् गगनत्वादित्यादिकमेव पक्षतादशायामसंकीर्णोदाहरणमिति भावः ननु साधारण
शरीरे पक्षान्निविष्टत्वविशेषणस्यैव पक्षेन प्राकृतनिपक्षतत्वात् निश्चयघटितसाधारण्याभिप्रायेण लक्षणं त
५१ देन संगच्छतेति निश्चयाशावे पक्षस्यापत्तिस्फुटत्वादित्यतो दोषांतरेणानशून्यकाले देशांतरवृत्तोपि हेतोर

५८ ग.त.

49

उपसंहारिनैयेवात्रामित्यनुत्पादकत्वमिति लक्ष्यत्वमित्याशयेनैतल्लक्षणमित्याह साधारण्यादीतिनाविरो-
धभागासिद्धिपरिग्रहः सर्वमभिधेयप्रमेयत्वादित्यादेः सद्धेतुत्वेन यत्र लक्ष्यत्वस्य प्रागभिहितत्वात्तत्राव्याप्त्यभि-
धानं संगमयति सद्धेतुत्वं चेति व्याप्तिनिश्चयदशायामेवेति तथा च सर्वत्र साध्यसंदेहदशायां तस्य लक्ष्यत्वमे-
वेत्यव्याप्तिरेव तत्र सत्यं न विरहादिति भावः पक्षातिरिक्ते साध्यादि यथाश्रुतमूलेऽप्रतीतपदस्य पक्षातिरिक्ताप-
दव्यवहिततया पक्षातिरिक्ते सहचारप्रत्ययो न लभ्यत एवं व्याप्तिग्रहानुकूलपदं सहचारपदयोरव्यवधान-
विरहेण व्याप्तिग्रहानुकूलसहचारत्वावच्छेदेनाप्रतीतत्वादन्वयालाभ इति विपर्ययेण योजयित्वा व्याचष्टे प-
क्षातिरिक्त इत्यादि सर्वत्र साध्यसंदेहदशायामपि हेतौ साध्यसहचारस्य तद्रूपप्रतीतिसंभवात् प्रतीतप-
दं निश्चितार्थकं तथा व्याचष्टे न प्रतीत इति व्याप्तिग्रहानुकूलत्वेनानुगमनीयं सहचारद्वयं विशिष्य दर्शय-
ति अन्वयेन व्यतिरेकेण चेति सहचारस्य साध्यसाधनसहचारत्वेन निवेशे व्यतिरेकिणि साध्याभाववद्धेत्वभावस-
हचारत्वेन निवेशेऽन्वयिन्यतिव्याप्तिः सहचारत्वेनोभयोरनुगमे उदासीनपदार्थसहचारग्रहदशायामत्र
पक्षहारिण्यव्याप्तिरिति तद्वारणायैकरूपेणानुगमफलं बोध्यं यस्य व्याप्तिग्रहेणान्वयः षष्ठ्यर्थः संबंधश्च त-
द्धेतुकानुमित्यनुकूलत्वं तथा च तद्धेतुकानुमितिप्रयोजकव्याप्तिग्रहानुकूलसहचारनिश्चयाभवत्तस्यानुपसंहा-
रित्वमिति लक्षणं पर्यवसितं यदि च पक्षे व्याप्तिग्रहः कथं चिदित्यादिग्रन्थयोः सर्वपक्षकपरएव सर्वपक्षकपरत्वे
तत्रैव सद्धेतावतिव्याप्तेरित्यग्रिमग्रन्थासंगतेः पक्षे सहचारप्रत्ययेऽपि पक्षातिरिक्ते प्रतीतसहचारकत्वे नातिव्याप्तेः
पक्षातिरिक्तापसिद्धादेव संगतेः एवं सर्वस्य पक्षत्वे पक्षे व्याप्तिग्रह इति विशेषाभिधानग्रन्थसंगतेस्मात् एवं च तत्र
पक्षातिरिक्तत्वविशेषणमहिम्ना लक्षणागमननात् सद्धेतावेवेत्यभिधानमसंगतमित्यतः पक्षातिरिक्तत्वविशे-

ग्रास्य लक्षणघटकोक्ताभिप्रायेण तत्संगमयति तथा चेति विशेषकं सहचारग्रहस्थलव्यावर्तकं न त्वेवमपि
सहचारग्रहस्थलनियमविरोध इत्यतोऽभिप्रायानावबोधमूलकत्वेन तत्संगमयति विशेषकत्वेनेति सहचारग्रहं यत्र प्र
सिद्धं इति तत्र पंडितौ नित्यः शब्द इत्यादिपक्षादौ प्रसिद्धसाध्याकाशगगनादौ व्यतिरेकसहचारस्यैव प्रतीतत्वाद् एवं गो
त्वच्छत्वादि साधादि विरुद्धे च घटादौ व्यतिरेकसहचारनिश्चयसंभवान्नातिव्याप्तिसंगतिरतोऽसाधारणविरुद्धयोरि
ति मूलं तद्विशेषपरा तथा व्याचष्टेऽसाधारण इति वक्ष्यमाणकेवलान्वयिसाध्यकहेतौ विपक्षाप्रसिद्ध्या न
ले निःस्नेहं शीतस्पर्शवत्त्वात् इत्यादौ बाधावतारदृष्टान्ते च विपक्षाप्रसिद्धा च पितद्व्यावृत्तत्वाभावात् सपक्षव्यावृत्त
त्वरूपमसाधारण्यं न संभवतीति असाधारण इत्यस्यार्थमाह सपक्षव्यावृत्त इति शब्दोऽभिधेयः शब्दत्वादित्यादौ प
क्षः त्वपसहचारस्य सत्त्वेन दृष्टान्तविशेषे निश्चयसंभवादाह पक्षापक्षतादृशाभ्यामिति अतिव्याप्तिरित्यग्निमेणाम्
ध्यते यत्र सहचार एव नास्ति तत्र हृदो वह्निमान् जलमिति निःस्नेहत्वे स्नेहवदन्यत्वं अत्र च सर्वदैवातिव्याप्तेः पक्ष
तादृशाभ्यामित्यस्य न संबंधः इत्यादिविषये इत्यादावनिमध्ये मुक्तं अस्य च विरुद्धत्वेऽपि बाधानवतारदृष्टान्ते तद्
ह्यसंभवादसाधारणतयोपपादनमविरुद्धरूपं जलत्वेनेति अथ मेऽसिद्धिं संकीर्णोद्धितीयं च बाधसंकीर्णो विरोध्य
इति भेदः घटादावुत्पत्तिकाले गुणरूपहेत्वभावसत्त्वेऽपि प्रतियोगिवैयधिकरण्यानवच्छिन्ने तस्मिन् साध्याभावसह
चारो न संभवति स एव च व्यतिरेकव्याप्तिग्रहानुकूलः प्रतियोगिवैयधिकरण्यानवच्छिन्नाया व्यापकताया अव्या
प्यवृत्तिव्यभिचारेणातिव्याप्तिवारणाय परादृशव्याप्तौ निवेशनीयत्वात् अतिव्याप्तिसंगतिः प्रतियोगिवैयधिकर
णानवच्छिन्नो याव्यापकताया अव्याप्यवृत्तिव्यभिचारेणातिव्याप्तिवारणाय तादृशव्याप्तौ निवेशनीयत्वात्
तिव्याप्तिसंगतिः प्रतियोगिवैयधिकरण्यानवच्छिन्नेऽपि घटाभावे साध्याभावसहचारो न संभवति तत्रातिव्याप्तेरिति

५० गदा॰

50

स्फुटतयातादृशमपिहेतुमाहगुणवानेहृतीतिसमवायेनावृत्तित्वस्यहेतुतायाश्चलाभयतीतिअतिव्याप्तिरि
तियद्यपिप्रथमोक्तासाधारणभिन्नस्थलत्रयेव्याप्तिग्रहानुकूलसहचाराप्रसिद्ध्यानातिव्याप्तिसंभवः तथापिप्र
तसाध्यादिसहचारस्यप्रमेयत्वकेवलसहचारव्यादिनानिश्चयदशायामनुपसंहारिणिव्याप्तिवारणायव्याप्तिग्रहा
नुकूलोयःसहचारनिश्चयःपुरुषनिष्ठस्तदभावएवविवक्षितयाचोक्तस्थलेऽपिकदाचित्तदंशेपिसहचारेसा
ध्यादिसहचारत्वभ्रमेणव्याप्तिभ्रमोत्पत्तिप्रसिद्धतादृशभ्रमरूपसहचारनिश्चयाभावमादायातिव्याप्तिसंभवान्ना
सेगतिःयत्तातिरिक्तत्वविशेषणस्यदूषकतायामनुपयुक्तत्वेपितस्यविशेषणत्वानभ्युपगतेनदोषइतिप्रत्य
यांशघटितस्यदोषत्वासंभवएवतथादूषकतायामित्यादिमूलेव्याचष्टेदूषकतेतिनतुप्रत्ययांशस्यप्रत्ययांश
घटितस्यसद्धेत्वाप्रत्ययाभावस्येतियावत् ज्ञानेविरोधीतिअनुषंगेणान्वयः ग्राह्याभावाद्यविषयत्वादि
तिभावः प्रत्ययांशपरित्यागेचविरोधएवपर्यवसानमिप्रायः अनुपसंहारित्वज्ञानस्याविरोधित्वेपिअनैका
न्तिकत्वरूपसामान्यधर्मस्याविरोधिधीविषयत्वेनदोषतयाऽनुपसंहारिणोदुष्टत्वमव्याहतमित्याशंकातेमू
लेनचेतिटीप्पितावनैकान्तिकशब्दार्थेति अनैकान्तिकत्वंव्याप्तिग्रहविरोधिधर्मवत्त्वंसाधारणादेःसाधार
ण्यादिधर्मसाहाय्येनोपपादनीयं अनुगततादृशधर्मोनतुसंभवान् तथाचसाधारण्यादिज्ञानत्वेनैवप्रतिब
न्धकत्वमावश्यकं इत्यनुपसंहारित्वेदूषकताविरोधिप्रत्ययांशनित्वेधनदोषोदुर्वारएवेतिभावः मिश्रमतमाह
केचित्त्विति असाधकतासाधकतायामित्यस्यानुपसंहारितादोषस्येत्यादिः एवंचसाध्यसहचाराभावस्यवाच्या
एकतावच्छेदकव्यभिचाराचारकत्वेनप्रत्ययांशवैयर्थ्यंबोध्यं नचदूषकतेत्यत्रचएतन्मतेदूषकताऽसाधन
अनैकान्तिकत्वेनलिंगेननप्रत्येकं अनुपसंहारित्वादिनातथाचतस्यव्यभिचारकाविशेषणाच्चत्वेपिनक्षतिरि

त्तितादृशश्लाघायः उभयकोटीति साध्यतदभावेत्यर्थकं उपस्थापकत्वादीत्यादिना द्वितीयानेकां
तिघटकसत्त्वं तत्परिग्रहः व्यर्थत्वादिति विरुद्धादेरपि स्वसाधकत्वेन तत्तावदनैकान्तादृशविशेषणस्य व्य
भिचाराघाटकत्वादिति भावः अथ साध्योपस्थापकतावच्छेदकरूपमात्रस्यासाधकताहेतुत्वे यथा तादृ
शादृशसाध्यसहचारत्वनिसङ्केतो व्यभिचारस्तथा साध्याभावोपस्थापकतावच्छेदकरूपमात्रस्य हेतुत्वेऽपि ता
दृशसाध्याभाववद्व्यावृत्तत्वनिसङ्केतोऽव्यभिचारोऽउभयरूपवेति कोटिद्वयोपस्थापकतावच्छेदकरूपस्य हे
तुतायां वैयर्थ्याभिधानासंगतिः साध्योपस्थापकतावच्छेदकसाध्यसहचारतदभावोपस्थापकतावच्छेद
कसाध्यसहचारतदभावोपस्थापकतावच्छेदकतदभाववद्व्यावृत्तत्वयोः सङ्केत साधारण्येऽपि यद्रूपविशि
ष्टविषयकज्ञानजन्यसाध्योपस्थितिर्यद्रूपविशिष्टज्ञानजन्यसाध्याभावोपस्थितिसहकारेण संदेहजन
निकातदुभयरूपवत्त्वस्यैवोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वमिति नेनाविवक्षितत्वात्तादृशस्य स
ङ्केतव्यावृत्तत्वेनासाधकत्वासाधकत्वसंभवादिति चेन्न निष्कृष्टमते धर्मितावच्छेदकविशिष्टधर्मिणि यद्रू
पविशिष्टज्ञानं साध्यसंदेहजनकं तद्रूपवत्त्वस्यैवोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वमित्यत्र विवक्षित
त्वात् तत्र मिहतावच्छेदकविशिष्टे साध्यतदभावोभयप्रकारकज्ञानस्यैव साध्यसंदेहपदार्थतया साध्यप्र
कारकत्वांशे वैयर्थ्यापत्तया प्रकृतग्रन्थसंगतेः तादृशपालनाणि साध्याभावप्रकारकज्ञानमात्रनिवेशे साध्या
भावप्रकारकानुमितिं प्रति धर्मितावच्छेदकविशिष्टधर्मिणि साध्याभावव्याप्यविशिष्टवत्ताज्ञानस्य हेतुत
याविरुद्धातिव्याप्तेर्वारणायैव साध्यप्रकारकत्वनिवेशात् साधकत्वानुमानेन च सङ्केतोऽव्यभिचारप्रसङ्ग
पातहेयर्थ्यं स्पष्टं वारत्वात् साध्यप्रकारकत्वमात्रनिवेशे साध्यानुमितिजनकसाध्यव्याप्यवत्ताज्ञानविषय

गदा. 51

तावच्छेदकत्वमादाय सद्धेतौ व्यभिचारात् तद्वावकसाध्याभावप्रकारकत्वं प्रायेव पर्य्याप्तसन्नौ नेतद्वैयर्थ्यम् एतं प

वं चोभयकोट्युपस्थापकत्वात्संशयविसंवादिः साध्यतदभावप्रकारकज्ञानजनकत्वाद्वैतउपस्थितिविशेषणात

पाप्रविष्टं यत्साध्यतदभावप्रकारकत्वं तद्वदिति शेषणवैयर्थ्यादित्यर्थोऽद्य एव्यः सहचारमत्ययभावः स

हचाराभावादन्यत्र एवेति धर्मिभेदात् वैयर्थ्यमत्रास्वरसबीजं बोध्यं सर्वस्य पत्वत्वेमात्रार्थाभावादिति केवला

न्वयिसाध्यकाव्याप्तौ न हेतुः साध्ये केवलान्वयित्वाभिधानात् प्रयोगापत्तेरिति साध्याभावाप्रसिद्धेरेव न द्वेत

त्वे मूलहतोभिप्रेते सर्वविशेषणात् केचन सर्वपक्षकसामान्यव्याभिप्रेताव्याप्तेर्दोषान्तरस्य हेतुपरं एवं चपते

साध्यनिष्ठाभावप्रतियोगिताविप्रतिपत्तिविप्रतियत्निपदार्थत्वे प्रथमदोषासंभवादिति संगमयितुं विप्र

विपत्तिपदार्थविवक्षोपरि विप्रतिपत्तिविषयत्वपदं विषयताविशेषलाभाव मूलेपदत्वदति विप्रति

पत्तिविषयत्वद्वयर्थः केवलान्वयिसाध्यकेऽतिव्याप्तेरिति पदेमात्रार्थाप्रासङ्गिकव्याप्यसंगतिस्त

दैनमपनाय विवक्षोपरि तन्मात्रवृत्तित्वमिति व्याप्यवृत्तिकत्वं विप्रतिपत्तिविषयत्वव्याप्याधिकरणता

कत्वं विप्रतिपत्तिश्च साध्यपक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिरेव न तु रेति विप्रतिपत्तिविषयेनेत्यर्थः

केवलान्वयिसाध्यकस्य विप्रतिपत्तिविषयत्वव्याप्यवृत्तेः सर्वमभिधेयं प्रमेयत्वादित्यादिहेतोर्लक्ष्यतया

नातिव्याप्तिः संगच्छते इत्यत आह इदं चेति कथं चिदिति सर्वत्र साध्यसंदेहसत्वेपि सहाविना व्याप्तिग्रहदशा

यामित्यर्थः व्यादयनिश्चयदशायामेव तस्य लक्ष्यत्वादिति भावः असाधारणव्यतिरेकिणोरव्यातिव्याप्ति

निर्बोध्या पचेत्यस्य सहचारग्रहाभावरूपैकधर्मरूपसहायाभावेनान्वयव्यतिरेकिण्यतिव्याप्तिः व्यतिरेका

सहचारप्रकारकग्रहस्य हेत्वभावेपि विषयतया तदभावस्य हेतावतत्वात् तस्य व्याप्तावन्वयेपि व्याप्ति

रेकसहचारग्रहस्यान्वयव्याप्त्यंशग्राहकत्वेऽसौ वातिव्याप्तिः व्यतिरेकव्याप्तेः प्रकृतहेतावनिष्ठत्वाभावात् समस्या
र्थविषयतायां व्याप्तिग्रहेऽन्वयेपि स एव दोषः प्रकृतहेतोर्व्यतिरेकसहचारग्रहाधीनव्यतिरेकव्याप्तिग्रहा
विषयत्वात् अतः स्वरूपार्थपरतयास्य समीच्यावलेपचेति एवं च व्यतिरेकव्याप्तेः प्रकृतहेतावनिष्ठत्वविरहेऽपि त
द्ग्रहस्य प्रकृतहेतुविषयकत्वविरहेऽपि चातत्तद्बोधनपातद्ग्रहात्तत्कूलसहचारग्रहरूपायोगातिव्याप्तिरिति
भावः न च यत्किंचित्संबंधस्य ग्रहासंभवान्न व्याप्त्यादावपि सत्वेन व्याप्तेराधाराधेयभावो विषयत्वरूपो वा संबंध एव विव
क्षणीयः तथा च तद्भावत्तादृशस्यामित्यत आह तथा चेति हेतुत्वाभिमतेति स्वहेतुकप्रकृतसाध्यसिद्ध्यौपयिकत्व
संबंधतात्पर्यग्राहकाहेतुत्वाभिमतपदसमभिव्याहारादित्यर्थः एतेन तत्पदवैयर्थ्यंपाकापिनिष्फलताद्यर्थला
भादिति उपसंहाराभावस्तादृशानिष्टत्वं प्रति तस्य हेतोरनुपसंहारित्वमित्यर्थलाभादित्यर्थः सर्वं द्रव्याभिन्नं गु
णवत्वादित्यादौ अन्वयसहचारस्य व्यतिरेकसहचारस्य चाविरहादुद्धरणासमन्वयसंभवेन प्रसिद्धानुपसंहारिणि
सर्वमभिधेयमविन्म चाप्रमेयत्वात् द्रव्यत्वादित्यादावव्याप्तेरभिधानं नासंभवस्य परिहारयुक्तस्थलेपि प्रकृतव्याप्ति
ग्रहानुकूलसहचाराप्रसिद्ध्या न यथाश्रुतलक्षणसंभवस्तथापि प्रकृतसाध्यसिद्ध्यौपयिकोपयोगिव्याप्तिग्रहस
दनुकूलसहचारसामान्यकत्वविवक्षणे पदार्थान्तरसहचारप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिप्रमानुकूलत्वा
भावमादायतत्वलक्षणसमन्वयसंभवः न च गुणादिनिष्ठद्रव्यत्वादिसहचारस्य द्रव्यभेदादिसहचारत्वं न विष
यतया प्रकृतव्याप्तिग्रहानुकूलत्वविरहस्यासत्वान्न सहचारसामान्ये तदनुकूलत्वमिति कथं लक्षणगम
नमिति वाच्यं सहचारपदेन सहचारत्वविशिष्टधर्मिविषयतया विवक्षणीयत्वात् भ्रमविषयविशिष्टसह
चाराप्रसिद्ध्या तद्विषयताया वास्तवसहचारत्वविशिष्टधर्मिसत्वात् प्रमात्मकज्ञानविषयतासामान्ये च प्र

रूतव्याप्तिग्रहानुकूलत्वविरहस्याक्षततत्वात् रूपमिति प्रतियोगिवैयधिकरण्यानवच्छिन्नंगुणाभावे
रूपव्याप्यत्वाभावसहचारासंभवात् गुणकर्मावृत्तिजातिमत्त्वहेत्वनुसरणंग्रहानरूपासिद्ध्यात्मकः का
रणाभावतयोः व्याप्तिग्रहकारणाभावतया स्वरूपसन्नेव ज्ञानपेत्तपवदोषः परंपरयाउपमित्यनुत्पा
दप्रयोजकः न हेत्वाभास इति पर्यायिवक्ष्यमाणसाध्यसंदेहविषयत्वस्वरूपमनुपसंहारित्वमपि स्वरूपसदेव विरो
धीति न तस्य हेत्वाभासतासंभव इति लक्षणद्वयेऽपि तुल्यानुयोगस्तथापि प्रथमस्य कारणाभावतया स्वरूपसद्घणाव
स्फुटतरं न द्वितीयस्य तस्यात्यादित्यापानेनतर्ई दृशानुयोगेन द्वितीयावतारसंगतिरित्यवधेयं पत्त पदस्य साध्यवान्न
वेति संशयविषयपरत्वे केवलान्वयिसाध्यके व्याप्तिस्तत्र कोऽपि प्रसिद्ध्या संशयासंभवात् स्वनिष्ठाभावप्रति
योगित्वसंशयविषयसाध्यकत्वार्थकत्वे पत्तविशेष्यकसंशयदशायामनित्यत्वादिसाध्यके व्याप्तिरतः संश-
यद्वयमनुगमयति पत्त इति पक्षतायां तु व्याख्यातमेतत् यद्यपि घटः प्रमेयवाननित्यादौ प्रमेयघटनिष्ठाभावप्र-
तियोगिनवेत्यादिसंशयविषयतायाः केवलान्वयिधर्मव्यापकत्वात् यथाश्रुते तु व्याप्तिः विषयताविशेष
निवेशेऽन्यविधसंशये धर्मिविषयतायाः एकविधत्वाभावादननुगमः प्रकृतानुमितिहेतुपक्षनिष्ठानिरोधिसंशय
विषयतानिवेशोऽपि विरुद्धाप्तिन्साध्यसदेशायां व्यतिरेकिधर्मावच्छिन्नसाध्यसाधकस्याप्यनुपसंहारितायादूषकता
बीजमत्वेनोपगतमनया तत्राव्याप्तिः तथापि स्वप्रतिबंधकतावच्छेदकीभूतसाध्यवत्तानिश्चयविशेष्यतासमा
नाधिकरणसंशयविषयताविवक्षणान्न दोषः प्रमेयघटनिष्ठाभावप्रतियोगी नवेत्यादिसंशयस्य घटादिमात्र-
विषयताया एव तादृशसंशयप्रतिबंधकतावच्छेदकप्रमेयादिप्रकारतानिरूपितविशेष्यतासमानाधिकरणत्वानाद
घपास्य केवलान्वयिधर्माव्यापकत्वा ननु यत्र केवलान्वयिसत्त्वादिकं धर्मितावच्छेदकीकृत्य न साध्यसंशयः

अपि तद्व्याप्यत्वगुणत्वादिविशेषधर्मे धर्मितावच्छेदकीभूतस्यैव विषयकसंशयः तत्र संशयविषयता-
यां स्वरूपसंबंधरूपकेवलान्वयिधर्मावच्छिन्नत्वाभावाद्व्याप्तिस्तत्रापि सहचारग्रहाभावरूपदूषकताबीजसत्वे
नालक्ष्यतास्वीकारासंभवात् इत्यत आह अवच्छेदकत्वे चेति स्वानूनवृत्तित्वमन्यत्वमिति तथा च केवलान्वयि
धर्मव्यापकसंशयविषयकसंशयविषयत्वपर्यवसितं केवलान्वयिधर्मव्यापकत्वं चात्यंताभावास्वरूपसत्तोपि
संशयधर्मिणि प्रकारीभवतोपि नाव्याप्तिरिति तादृशसमूहालंबनसंशयविषयतायाः तत्संशयविषयताया-
न केवलान्वयिधर्मव्यापकत्वादिति भावः यत्र विशेष्ये नैकसंशयविषयता अपि त्वामिकसंशयद्वयविषयते-
यता तादृशस्य संग्राह्यत्वात्तत्तत्कालीनसंशयविषयताया न व्यापकत्वं विवक्षणीयं हेत्वादीत्यादिना हेत्वभावपरि-
ग्रहः व्याप्यस्य हेतोरिति व्याप्यनिश्चयेनेत्यर्थः सहचारनिश्चयासंभवादिति भावः न च धर्मिणि किंचिद्रूपेण साध्यादिसं-
शयेपि साध्यादिशून्यधर्मितावच्छेदकसाध्यादिसहचारस्य हेतोर्निश्चये बाधकाभाव इति वाच्यं तद्वद्धर्मयोगव्यमा-
णे सर्वत्र तत्संशयदशायां तत्र सहचारसंशयसामग्र्या औत्सर्गिकत्वात् क्वचित्स्वाधिकरणे तन्निश्चयदशाया-
मेव तादृशनिश्चयेन स्वाधिकरणवृत्तितत्कत्वनिश्चयेन वा तत्सामानाधिकरण्याभावभाननिवर्तनात् स्वस्मिन्
तत्सामानाधिकरण्यसंशयसामग्रीविघटनासंभवात् अभावसत्त्वे हेतोर्दुष्टत्वं मूले संदेहेनावितिक्वचिदधिक-
रणे साध्यनिश्चयदशावच्छिन्न इत्यर्थः साध्यानिश्चयदशायां सर्वत्र साध्यसंदेहदशायां पक्षत्वे केवलान्वयिधर्म-
स्य पक्षतावच्छेदकत्वेन तद्विधेयत्वसाध्यकप्रमेयत्वव्यतिरेकिसाध्यकेअनित्यत्वादिसाध्यकमेयत्वादेः अज्ञातदशा-
यामिति साध्याभावांशनिश्चयरूपज्ञानविरहदशायामित्यर्थः इदं इदमेवानुसंहारित्यर्थः दूषणं अत्रामित्यत्र-
त्वात् प्रयोजकं न तु साधारण्यं तादृशनिश्चयात्मकज्ञानाविषयस्य तस्यातथात्वादिभावः तत्र व गमे साधारण्यस्य-

यथोक्तानिश्चयरूपावगमदशायां साधारणसंकराच्चेति कालान्तरीणानुपसंहारितासमानाधिकरणसाधा-
रण्यप्रयोजकरूपवत्त्वमित्यन्वयाद्दूषकत्वमित्यर्थः तथा चोभयोरेव पृथक् प्रयोजकतया नान्यतरदोषत्वमिति भावः
अनुपसंहारितादशायां व्याप्तिनिश्चयरूपव्याप्यत्वासिद्धेर्वानुमित्यनुत्पादनिर्वाहादनुपसंहारितानिरूपण-
मित्येतेनेत्यादिनाशङ्कां वा उपजीव्यतया तस्य दूषणत्वमग्रे व्यवस्थायां एवं व्याप्यत्वासिद्धस्येत्यादिनाशङ्कां वा उप-
जीव्यतया तस्य दूषणत्वे व्यवस्थाप्यत इति पौनरुक्त्याशङ्कां स्वार्थपरार्थानुमानपरतया निराकरोति दीधितौ प-
रार्थेति बहिर्भावो ऽसिद्धिबहिर्भावः स्वार्थस्थले व्याप्तिनिश्चयस्य ज्ञानोद्भावनयोरनुपयोगादिति भावः अनुप-
संहारितारूपोपीति भावः मतेऽपवननिश्चायमानतया द्वितीयरूपघटिततया द्वितीयरूपघटितत्वादिति हेतोः साध्याभा-
वसामानाधिकरण्यं हेतुमान्साध्यवान्नवेति संशयस्य साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वसंशयान्तरस्य वि-
षयः केवलान्वयिसाध्यके सर्वमभिधेयं प्रमेयत्वादित्यादि प्रसिद्धानुपसंहारिणि इदमुपलक्षणं सर्वमनित्यं घ-
टत्वादित्यादि व्यतिरेकिसाध्यव्याप्यानुपसंहारिण्यपि तदसत्त्वबोध्यं व्यतिरेकिसाध्यके सर्वमनित्यं प्रमेयत्वादि-
त्यादौ संदिग्धानैकान्तिकत्वमिति एतेन निश्चितसाध्याभाववद्वृत्ति साधारण्यं साध्याभावांशे निश्चयात्मक-
स्यैव साधारण्यज्ञानस्य प्रतिबन्धकत्वादन्यथा पक्षे साध्यसंदेहेनानुमानमात्रोच्छेदापत्तेः संदिग्धसाध्याभाव-
सामानाधिकरण्यपरिच्छेदकानवतारे दोषतोपगमाज्ञस्य साधारण्यतापत्त्यस्वीकार्यत्वात् तादृशस्थले
नस्याविरोधित्वे सर्वत्र साध्यसंपाद्यस्थले विरोधित्वापत्तेः तज्ज्ञानस्य प्रतिबन्धकतान्तरे मानाभावात् तृतीयरूपघ
निविष्टेति सहचारग्रहत् व्याप्यस्य ग्रहे इत्यादिना प्रामाण्यचयः ग्रहो निश्चयः दोषजन्यास्वीकृतोऽनेन इति शेषः सहचार-
निश्चयत्वेन पृथग्व्यापकतापग्रहकारणतायाः स्वानभिमततया व्याप्यग्रहप्रयोजकीभूतमाह संशयेति साध्यत-

दभावसंशये सर्वैः साध्यतदभावनिश्चयप्रतिबंधादिति अन्वयव्यतिरेकव्याप्तिशरीरांतर्गततया तदंशे निश्च-
यत्वघटकविधयैतभानासंवलित साध्यतदभाववत्त्वभानविघटनादित्यर्थः विपरीतकोट्यभाने तद्ग्राहकसा
मग्र्यभावस्य प्रयोजकत्वादिति भावः अज्ञानरूपासिद्धिरेव दोषतया पर्यवसितेति तथा च पूर्वोक्तैकधर्मोपसंहाराभा
वस्यैव नास्य पृथग्घेत्वाभासत्वमिति भावः ननु व्याप्यत्वग्रहस्याज्ञानरूपासिद्धित्वेन हेत्वाभासताविरहेऽपि तदुपजीव्यत-
या साध्यसंदेहः सहचारादिश्च यो वा व्यभिचारवदाभासस्यादेवमसिद्ध्युपजीव्यत्वे ज्ञायमानविरोधितया आभास-
त्वाविरोधित्वादिति मूलानुसारिशंकां निराकरोति उपजीव्योपि चेति सनयेवविरोधित्वादिति तथा चाज्ञायमान
विरोधिनोऽज्ञानरूपासिद्ध्युपजीव्यत्वेन हेत्वाभासताप्रयोजकं दृष्टांतस्य साधारणस्य ज्ञायमानदशैव विरोधित्वा
दिति भावः अत्रैव पूर्वपक्षे व्युत्तम इत्यादिगिरोक्तसमाधानं दूषयित्वान्यपन्यस्यति पक्षे निव्याप्तीति प्रथमलक्ष-
णाधारणव्याप्तिग्रहेति व्याप्तेर्ग्रहोऽग्रहोऽलोपोपः सहचारनिश्चयत्वावच्छिन्नाविरोधरूपत्वमित्यर्थः सह
चारनिश्चयविरोधित्वमप्येत्यनिश्चयत्वावच्छिन्नत्वस्य प्रतिबध्यताविशेषणत्वात् आकाशाभाववानाकाशादि
त्यादौ हेत्वादेरवहित्वस्य उभयसहचारग्रहविरोधित्वेपि नातिव्याप्तिः अवच्छिन्नत्वं स्वरूपसंबंधविशेषः विरो
धस्य हेतौ साध्यासामानाधिकरण्यात्मकस्य उभयथाव्यवारणादर्शनिविरोधत्वमिति संशयेत्यनेन प्रतिबध्य
तायां निश्चयत्वानवच्छिन्नत्वं दर्शितं अन्वयमात्रेत्यनेन निष्केवलान्वयिधर्मव्यापकसाध्यसंशयविषय-
हेतित्वेन हेत्वभावे साध्याभावसहचारसंशयसामग्रीत्वेन तद्धर्मिकसाध्याभावसंशयविषयहेतित्वग्रहस्य
वतद्धर्मिकसहचारसंशयसामग्रीत्वेन तद्धर्मिकतन्निश्चयप्रतिबंधकत्वात्तत्स्थापितलक्षसहचारनिश्च-
त्वावच्छिन्नविरोधित्वं नैकधर्मविशेषणं तथा च सर्वं सतित्वं घटत्वादित्यादौ अन्वयसहचारनिश्चयवि

गदा०

54

रोधियद्धेतुविशिष्टं तादृशसंशयविषयवृत्तित्वं पञ्चहेत्वभावनिष्ठं तादृशसाध्याभावसंशयविषयवृत्तित्वं तदु
भयरूपवत्त्वमादायलक्षणसमन्वयः येनकेनापिसंबंधेनविरोधिरूपवत्त्वनिवेशात् हेत्वभावनिष्ठसंश
यविषयवृत्तित्वस्याप्येकज्ञानविषयत्वादिनाहेतुनि निष्ठत्वात्सर्वमभिधेयमनित्यंवाप्रमेयत्वादित्यादौ
व्याप्तिग्रहानुकूलव्यतिरेकसहचारासिद्ध्यायोगः सहचारइत्यनेनान्वयसहचारमात्रस्योपादानात् वि
तत्रविरोध्यकं रूपमादायलक्षणसमन्वयः पर्वतोवह्निमान्धूमादित्यादौ साधनवत्ताग्रहविषयत्वकिंचिद्धर्मावति
पक्षधर्मिविशेष्यकसाध्यादिसंशयविषये साधनादेर्वृत्तेर्नसाध्यादिसहचारनिश्चयविरोधिनोयदृशधर्मिणि
विशेष्यसंबंधोज्ञायतेतावद्धर्मिष्ठविशेषणसंशयस्यैवविशिष्टवृत्तित्वसंशयहेतुतयाविशिष्टनिश्चयप्रति
रोधित्वात् नहिपर्वतेवह्निसंदेहेमहानसादिवृत्तितयागृहीतधूमेवह्निमद्वृत्तित्वसंशयः नानावक्रदंडत्व
त्वेनज्ञातेघटरूपकपालादिदंडेवक्रत्वादिसंदेहेपिवक्रदंडवान्नवाघटइत्यादिसंशयानुदयात् तन्निर्वा
हश्चविशेषणवत्त्वेनानिर्दिश्यमानेसंविशेष्यसंबंधज्ञानाभावस्यविशेष्यसंबंधज्ञानस्यचपरस्परसहकारेण
वहेतुत्वकल्पनयेतिव्यन्वयसहचारनिश्चयत्वावच्छिन्नविरोधितामात्रनिवेशः निःप्रसंगमहत्त्वयतिप्रमाधो
रणाइतिशेषः नित्यःशब्दत्वादित्यादौपृथिवीतरेभ्योभिद्यतेपृथिवीत्वादित्यादौचेत्यर्थः ग्रहविरोधीग्रहानु
त्पादः तथाचतत्रसाध्यसंशयविषयशब्दपृथिव्यादिवृत्तित्वेऽन्वयसहचारनिश्चयविरोधित्वेपिव्यतिरेकस
हचारनिश्चयविरोधित्वाभावान्नातिप्रसंगइतिप्रसंगइतिभावः व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरु
विरोधितामात्रनिवेशेहेतुः नित्यःशब्दत्वाभावादित्यादौव्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधिनिहे
त्वभावनिष्ठसाध्याभावसंशयविषयशब्दादिवृत्तित्वेःप्रसंगोबोध्यः तादृशामतिविरोधितावच्छेदकमित्य

र्थः लक्षणस्य विरोधिरूपवत्त्वरूपानुपसंहारित्वलक्षणस्य पक्षत्रयवृत्तिविग्रहेतौ साध्यसंशयविषयीभूतपक्ष।
दार्थघटकसाध्येऽलक्ष्यत्वं बोधितं तथा च पक्षपदार्थसंबंधान्वये केवलान्वयिधर्मावच्छिन्नप्रकारताकसंशयविषयसा
ध्यवत्त्वेऽलभ्यते तेन तस्य च ज्ञानेन व्याप्तिज्ञानविरोधित्वं वक्ष्यमाणक्रमेण साध्यसंशयविषयवृत्तित्वज्ञान।
मेवानलक्षणाभावसंशयविषयधर्मान्विताश्रयतासंबंधार्थकत्वं पक्षस्य प्रदर्शयितुमाह व्यतिरेकदा
वीति श्रादिना असाधारणपरिग्रहः पर्वतो वह्निमान् धूमादित्यादेः संशयविषयमात्रवृत्तित्वं निवेश्य वारण
संभवाद्व्यतिरेकव्याप्त्यनुधावनं साध्यवन्निष्ठत्वविरोधित्वेन संशयानुगमस्यावश्यकतया प्रतिबंधकतावो।
तावच्छेदकनिष्ठपत्वव्यापकत्वमेव निवेशयितुमवश्यं विषयताश्चकेवलान्वयिधर्मव्यापकत्वस्य निवेशाये।
त्यात्वाद्यवादित्याशयेनाह साध्यवन्नेति सामान्यपदेन व्यतिरेक्यादिचारणं स्फुटयति धर्मिविशेषेति धर्मि।
विशेषनियंत्रितः कतिपयमात्रधर्मिकोऽतिसमानविपरीतज्ञानमेव विरोधित्वादिति भावः ननु यत्र यत्र।
हेतुस्तत्र व्यतिरेकस्य ज्ञानः तादृशधर्मिकासर्वविषयकसाध्यविषयकसंशयदशायामपि हेतोरनुपसंहारि।
तासहचारितनिश्चयानुगमावश्यकताबीजस्य सत्वादित्यत आह लक्षणव्याप्तिरत्र तत्साधारणाय प्रकारांतर
मनुसरति साध्यसंदेहेति तत्पक्षस्थले वा ज्ञायमानहेतुव्यतिरेकसत्त्वावच्छिन्नाधिकरणे संदेहविषयत्वासत्त्वेऽपि न
क्षतिः ज्ञायमानसत्तायामेव व्याप्तिग्रहानुकूलत्वात् यथा पत्रसाध्यवति न हेतुर्यत्र वा साध्याभाववति हेतु
स्तत्र न साध्यसंशयः किंतु यत्र धर्मिणि साध्यहेत्वोः साध्याभावहेत्वभावयोः सहचारज्ञानविरहे सर्वत्रैव साध्यसं
शयस्तत्रापि हेतावनुपसंहारित्वं व्याप्तिग्राहसहचारनिश्चयासंभवरूपबीजस्य सत्त्वादिति तत्साधारण्या
य प्रकारांतरमाह साध्यसंदेहेति साध्यवन्निष्ठहेत्वभावसत्तायाः साध्याभाववन्निष्ठहेतुसत्तायाश्च व्याप्ति

गदा. ५५

55

ग्राहकसहचाराघटनया व्याप्तिग्रहानुकूलतया तदनुकूलसत्तायाः साध्यसंशयविषयताव्याप्यतयोक्त
स्यैव लक्षणसमन्वय इति भावः साध्यसंदेहस्य चोक्तानुगतरूपेणैव निवेशो बोध्यः असाधारण्यव्यतिरेकिहे
तुसत्तायाः साध्यसंशयविषयत्वव्याप्यतया अतिप्रसंगवारणाय साध्यसिद्ध्यनुकूलत्वेनान्वयव्याप्ती अनुग
मय्यतद्ग्रहानुकूलत्वेन तद्व्यतिरेकसत्तयोरनुगमः एतदेव दर्शयति तादृशीवेति तादृशी तादृशाग्रहोपद
का अन्वये अन्वयसहचारनिविष्टा व्यतिरेके व्यतिरेकिसहचारनिविष्टा इदानीमनुपसंहारित्वज्ञायमान
तया हेत्वाभासतानिवाहार्यविरोधित्वमेव स्थापयति स्वरूपसाहितमिति साध्येत्यादेर्हेतावित्यादितन्निश्चयेति
साध्यसामानाधिकरण्यनिश्चयेत्यर्थः ननु हेतुमति साध्यसंशयस्य हेतौ साध्यसामानाधिकरण्यसंश
यसामग्रीत्वमेवासिद्धमित्याशंकायामाह हेतुमतीति अचित्यावर्जितत्वादिति हेतुमति साध्यसत्त्वे हेतौ
साध्यसामानाधिकरण्यनियतं सर्वत्र तद्वृत्तितदभावसत्त्वे तत्र तत्सामात्यर्थः ननु साध्यसंदेहस्याधिकरणे
सत्त्वेपि साध्यसामानाधिकरण्यस्याभावस्यानुपस्थित्या न संशयः संभवति तदनुपस्थापकसाधारणधर्म
दिदर्शनसत्त्वेन तदेव संशायकमस्तित्यत आह साध्याभावेनेति साध्यसामानाधिकरण्याभावस्य साध्याभा
ववृत्तित्वेनाऽऽपातात् तद्बोधि साध्याभावविषयसाध्यसंदेहस्यैव तदुपस्थापकत्वादित्यर्थः एवं च संश
यज्ञानस्यानुपयोगित्वेपि तद्विषयवृत्तितया ज्ञानस्य संशयसामग्रीविधया साध्यसामानाधिकरण्यघटित
व्याप्तिनिश्चयविरोधितया तस्यानुपसंहारित्वरूपहेत्वाभासताप्रसक्तैवेति समुदायभावः अनुपसंहारिताद
शायां साध्यसामानाधिकरण्यसंशय एव तु दुर्घटः कथं तज्ज्ञानस्य तत्संशयसामग्रीत्वमित्याह सर्वत्रेति पक्ष
विदर्यीतिकमपि धर्मिणं तत्राभावसाध्यो ग्रोति निश्चयरूपसाध्यवद्वृत्तित्वप्रकारकज्ञानस्याजातत्वेनेत्य

र्थः तदभावस्य साध्यसामानाधिकरण्यत्वावच्छिन्नाभावस्य ग्रहीतुमशक्यत्वात् संशयेन कोटितया ग्र-
हीतुमशक्यत्वात् ग्रहणस्याशक्यत्वे हेतुमाह प्रतियोगितावच्छेदकेति सर्वांशे निश्चयरूपस्य प्रतियोगिता-
वच्छेदकप्रकारज्ञानस्येत्यर्थः अभावधीहेतुतायाः प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकप्रका-
रकनिश्चयविधया हेतुताया इत्यर्थः प्रतियोगिविशेषिताभावबुद्धेः प्रतियोगिप्रकारकविशिष्टवैशिष्ट्या-
वगाहितानियमादिति भावः यत्तु मिश्रमतसिद्धस्वतन्त्रप्रतियोगिज्ञानहेतुताभिप्रायकोऽयं ग्रन्थ इति तदस-
त् अभावलौकिकप्रत्यक्षप्रत्येव स्वतन्त्रतद्धेतुतायास्तैः स्वीकारात् संशयोपनीताभावकोटिभाने तादृशाका-
रणविरहस्याकिंचित्करत्वात् अथ सर्वत्र साध्यसंदेहदशायां तादृशप्रत्यक्षनिश्चयासंभवेऽपि कालान्तरीणनि-
श्चयजन्यसंस्कारतः स्मरणात्मकतादृशनिश्चयः संभवत्येवेति चेत्तत्र यस्यैव सः प्रागपि जातश्चित्साध्यनिश्चयो न जा-
तस्तस्य महत्वादसंशयसामग्र्यामेवमपि दुरुपपादत्वात् ननु साध्यांशे निर्धर्मितावच्छेदकं तदंशे निश्चयरूप-
साध्यसामानाधिकरण्यज्ञानं सर्वत्र साध्यसंशयदशायामपि सुलभमेव धर्मितावच्छेदकावच्छिन्नधर्मिविषयताया
एवं संशयत्वघटकतया धर्मितावच्छेदकानवच्छिन्नतद्विशेष्यताया निश्चयत्वसंपादकत्वात् न च धर्मितावच्छेदक-
प्रकारेण सकलधर्मिणामेव तदा मानवसंभवाद्धर्मिविषयतायाः धर्मितावच्छेदकानवच्छिन्नत्वं दुर्घटमिति वा-
च्यं एवं ज्ञाने धर्मितावच्छेदकावच्छिन्नतदनवच्छिन्नविषयतायाः स्वत्वे वाधकाभावादित्याशयेनाह सत्त्वेति सः
स्वप्रतियोगितावच्छेदकीभूतसाध्यसामानाधिकरण्यप्रकारकनिश्चयः सर्वत्र साध्यसंशयदशायामपि पक्षे हेतु-
मतानिश्चयसत्त्वे हेतुमत्तांशे निश्चयात्मकहेतुसामानाधिकरण्यज्ञानसत्त्वेन साध्यहेतुसामानाधिकरण्या-
भावसंशयः सुलभ एवेत्याशयेनाह साध्य इति ननु व्याप्तिहेत्वाभासत्वमितत्त्वयः उक्तानुपसंहारितायाः

तिशेषः अत्र हेतुः सामग्रीत्वेन प्रतिबंधकतयेति तज्ज्ञानस्येति शेषः अन्यथा प्रतिबंधकसामग्र्यात्मकधीवि
षयस्यापि हेत्वाभासत्वे व्यभिचरिताव्यभिचरितेत्यादिपंचकस्यैव साधारण्यान्वयः तत्र व्यभिचरितादिचतु
ष्टयसाधारण्याद्व्याप्यत्वादिप्रत्येकंहेतोः साधनवन्निः साधनसाधारण्यात्तद्धत्वं पक्षस्य बोध्यं प्रथमद्वयंहेतौ व्याप्ति
घटकदलयोः प्रत्येकाभावसंशायकं तृतीयं विशिष्टव्याप्यभावसंशायकं तुरीयं पक्षधर्मत्वसंशायकं पंचम
पक्षे साधनाभावसंशायकमिति भेदः तस्यापि तादृशादव्याप्यत्वादिमत्वस्यापि इतरसाचिव्येनाविशेषादर्शनादि
सहकारेणात्रिसंग्येति अप्रचारादिरिति निश्चयेत्यर्थः प्रत्यक्षसामग्री लौकिकप्रत्यक्षसामग्रीघटकविशेषणा
ज्ञानादिविषयतादृशसामग्र्योरपि बलवद्विपरीतभानसमानसामग्रीत्वेन पक्षादौ हेत्वमत्वाज्ञानप्रतिबंधक
त्वादिभावः दूषणांतरमाहापिचेति साध्याभावसंदेहविषयमात्रवृत्तित्वमिति तन्मात्रकव्याप्तिग्रहाविरोधि
त्वेपि विरोधवदन्वयव्याप्तिग्रहविरोधित्वेन हेत्वाभासतायाउर्वारत्वादितिभावः व्यतिरेकिणि पृथिवीतरेभ्यो
भिद्यते पृथिवीत्वादित्यादौ नियतविषयतया पृथिव्यादिमात्रविषयेणासंपद्यते निर्वहतत्तथाचतत्याप्यनुपसं
हारितायामितिभावः इदमुपलक्षणमसाधारणे व्यतिप्रसंगोबोध्यः वस्तुतस्तु असाधारणेपि व्यतिरेकव्या
प्तिग्रहेण व्यतिरेकिपदेनासाधारणस्य सत्त्वादेव लाभः नन्वसाधारण्यादिरूपवत्ताया एव संदेहविषयता
व्याप्यव्यतिरेकसत्ताया अनुपसंहारित्वे निवेशेपेत्यत्र आह दूषकतेऽन्वयव्याप्तिग्रहप्रतिबंधकत्वेन हेत्वाभासताप्र
योजकत्वे साध्यसंदेहविषयमात्रवृत्तित्वरूपमात्रस्यासाधारण्यादि साधारण्येपि न हेत्वाभासताविरोधीत्यर्थः नन्व
स्तु तदेवानुपसंहारित्वं व्यतिरेकिणस्तथात्वेपि व्यतिरेकव्याप्त्युपादानात्तानुमितिविरोधइत्यत आह नचेति व्य
तिरेकव्याप्तिग्रहविरोधिनो हेत्वाभासोत्तरतानिर्वाहात्तस्य व्यभिचारसध्यपर्यवसन्नभावस्यावश्यकत्वात्तस्यैवानुपसंहा

रितद्रूपत्वं स्यात्तेष्वेव व्यावर्त्यापत्तिरित्यतो भूमिकामाह व्याप्तिग्रहेति पक्षहेत्वाभासत्वं सव्यभिचारद्रूपैक-
हेत्वाभासत्वे सव्यभिचारद्रूपैकहेत्वाभासान्तर्गतत्वे स्वरूपं व्यापकताज्ञानस्याव्याप्तिमिति हेतुतायां निरूढत्वा-
दाहाव्यभिचरितत्वस्यैवेति सामानाधिकरण्यस्य साध्यसामानाधिकरण्यस्य साध्यासामानाधिकरण्यमेवासा-
धारण्यं न तु मणिकारसंमतं साध्यव्यापकीभूताभावप्रतियोगित्वं न स्याद्व्याप्तिनोऽसत्त्वादेव विरोधित्वेन सत्प्रति-
पक्षादिवद्व्यभिचारान्यहेत्वाभासताप्येवं यत्नात्त्वादित्याशयः असाधारण्यस्य साध्यसामानाधिकरण्य-
रूपत्वेनेति विरोधित्वादिघटितस्थूलोक्तसामान्यलक्षणस्याव्याप्तिर्व्याप्तिकेवलितत्त्वात् स्वयं सामान्य-
लक्षणमाह लक्षणत्वितिज्ञानस्य विषयतया विषयीभूय विरोधितावच्छेदकं प्रतिबन्धकतायामवच्छेदकं यत्त-
बन्धकतावच्छेदकीभूतज्ञानवृत्तिविषयताकत्वमिति तत्पर्यवसितं एवमग्रेपि सर्वत्र बोध्यं अनुपसंहारित्वसं-
ग्रहायाह व्याप्तौ सत्येति केनापि रूपेण व्याप्तौ ज्ञानमनुगमेन ज्ञानसामान्यविरोधित्वेनासाधारणादित्यत्रत्या-
ह प्राप्तित्वेकेति अप्रसिद्धिभेदस्येत्यनेनात्वस्यत्वदर्पितं अप्रसिद्धिभेदो व्याप्यत्वासिद्धिः साध्यसाधनयोः स्वरूपासिद्धिस्त्वसा-
ध्यसाधनसामानाधिकरण्यग्रहविरोधितया असाधारण्यमेवेति तद्व्यावृत्तेन पेक्षितया साध्यादिमत्त्वपर्यन्तान-
नुधावनेनानुपमवान्वहेरित्यादिस्थलेऽप्यसाधारण्यासंग्रहप्रसंगः तत्राविशिष्टसाध्यादिग्रहविरोध्यप्रसिद्धेः
नच विशिष्टसाध्यादिग्रहविरोधिनी कामिनीजिज्ञासैव प्रसिद्धेति तदन्यज्ञानविशिष्टव्याप्तिग्रहविरो-
धितावच्छेदकरूपवत्त्वमादाय लक्षणसमन्वयः संभवतीति वाच्यं एवमपि पञ्चकामिन्यादेव साध्यताहेतुता-
वात्तत्र साध्यादिग्रहविरोध्यप्रसिद्धेर्दोषतादवस्थ्यादित्यत आह साध्यसाधनभेदेनेति साध्यतावच्छेदकसाधनता-
वच्छेदकभेदेनेत्यर्थः नोपादेयमिति तत्र साध्याप्रसिद्ध्यादिदोषाप्रसिद्ध्या तदनुपादानेऽप्यतिप्रसंगानवका-

५ गदा.

57

शादिति भावः तथा च दर्शितस्थले विशिष्टसाध्यादिग्रहविरोध्यप्रसिद्ध्या व्याप्तेनावकाश इत्याशयः ।
पदि स्वमति व्यर्थविशिष्टसाध्यादिग्रहकात्वमविरोध्यं तार्थस्तदा ऽविरोधिन इत्यं तस्योपादानेऽपि नाव्याप्ति
रित्यपि बोध्यं अन्यत्रापि वक्ष्यमाणासाधारण्यादिलक्षणेऽपि शेषं अवच्छेदकत्वनिर्वचनविशिष्टान्तरघटि
तत्वनिवेशनादिकं मते नीलधूमादित्यादौ हेतुतावच्छेदकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वरूप
व्यर्थविशेषणताया व्याप्यत्वासिद्धिप्रभेदत्वेन व्याप्तिग्रहविरोधित्वामति व्याप्तिरित्यत आह व्यर्थविशेषणे
त्विति वक्ष्यत इति असिद्धिग्रंथे इति शेषः व्याप्यभावे ऽतिव्याप्तिमाशंक्याह साध्याव्यभिचारितेति स्वमते व्याप
कताज्ञानस्यानुमित्यहेतुत्वेन तद्विरोधिनो ऽव्यापकत्वादेः साक्षाज्ज्ञानकज्ञानाविरोधित्वेन न हेत्वाभासत्व
मिति तन्मताभिप्रायेणाव्यभिचारितत्वं चेति साध्याभाववद्वृत्तित्वं वेत्यर्थः यद्गत्यादिति एकज्ञानवि
षयतयेत्यर्थः हेतौ साध्याव्यभिचारावगाहित्वे सति तत्र सामानाधिकरण्यावगाहि यज्ज्ञानं न तद्विरोधित्वं निवे
श्यं न तु अभिचारविशिष्टसामानाधिकरण्यावगाहित्वमिति संप्रदायार्थः तथा च विशिष्टाभावग्रहस्य विशि
ष्टवत्ताज्ञानमात्रविरोधितया न तस्य साध्याव्यभिचारी साध्याव्यभिचारी साध्यसमानाधिकरणश्च हेतुरिति
विशेषकालीन दलद्वयावगाहिज्ञानोदयान्न विशिष्टाभावेऽतिव्याप्तिरिति भावः साध्याप्रसिद्ध्यादेर्व्यभिचाराना
त्मकस्यापि व्याप्यत्वासिद्धेः सत्वाद्विशिष्टाभावस्यासिद्धिव्यभिचारोभयरूपत्वेऽपि न क्षतिरित्यत्रानिर्भरः दूष
णापवाहिभावनीयत्वे पुनरिति स्मर्तं अथानुमितौ सामानाधिकरण्यसंबंधेनाव्यभिचारविशिष्टस्य सामानाधिक
रण्यं न व्यवहारकाहेतुज्ञानत्वेन न हेतुता सामानाधिकरण्यविशिष्टाव्यभिचारज्ञानत्वेनापि विनिगमना
विरहेण हेतुताप्रसंगात् हेतौ व्यभिचारज्ञानकालेऽपि हेतुविषयतापच सामानाधिकरण्यांशे विशेषण

तयाः ऽव्यभिचारभाने बाधकाभावेनानुमित्यापत्तेश्च न चोभयविधविशिष्टज्ञानस्यानुमितिहेतुत्वोपगमादि
तो व्यभिचारग्रहदशायां तत्र सामानाधिकरण्यविशिष्टाव्यभिचारग्रहाभावान्नानुमित्यापत्तिरिति वाच्यं ।
उभयविधज्ञानसत्त्वएवानुमितिरित्युपगमस्यानुभवविरोधेनासंभवात् तृणारणिमणिन्यायेनैकोपद
र्शितोभयविशिष्टज्ञानहेतुतायाः स्वीकरणीयत्वाद्व्यभिचारग्रहकाले तदभावविशिष्टसामानाधिकरण्य
ग्रहाधीनानुमित्यापत्तेर्दुर्वारत्वात् तथा चाव्यभिचारसामानाधिकरण्योभयावच्छिन्नहेतुत्वविषयताशा
लिज्ञानत्वेनैवानुमितिहेतुता वाच्यतादृशेयज्ञाने प्रत्यक्षाभावज्ञानमेव विरोधितत्वेकविशिष्टापराभाव
ज्ञाने प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताबुद्धेरेवाभावधीप्रतिबन्धकत्वादिति विशिष्टाभावस्य हेत्वा
भासत्वमेव इष्यत इष्टेऽज्ञातभावविचारइति चेन्न सामानाधिकरण्यसंबंधेनैकविशिष्टापरस्याभावग्रहो यथा तत्ता
दृशविशिष्टप्रकारकग्रहविरोधी तथा युगपद्विशेषणविशेष्योभयधर्मावच्छिन्नतत्तद्व्यापकधर्मिग्रहे ऽप्युभ
याभावग्रहवह्निशेषोभयाभावसमशीलतादृशाभावग्रहदशायां सामानाधिकरण्येनैकविशिष्टापरग्रह
समशीलधर्मद्वयवज्ज्ञायग्रहानुत्पादस्यानुभवसिद्धतयाप्रत्याख्यातुमशक्यत्वात् अतएवासिद्धिद्वयेऽपि व्या
प्तिविशिष्टपक्षधर्मताविरहस्य विशिष्टपरामर्शविरोधितया दोषत्वे स्वयंव्यवस्थापयिष्यते न हि निर्विशिष्टपरा
मर्शस्य पक्षविशिष्टापरामर्शस्य पक्षविशिष्टापरावगाहित्वे कारणतावच्छेदकं लाघवेनानुभवबलेन
च हेतौ व्याप्तिपक्षधर्मत्वोभयावगाहिज्ञानस्यैवानुमितिहेतुत्वोपगमात् न चैवं विशकलितव्यभिचारसा
मानाधिकरण्योभयावगाहिधीविरोधित्वोपपादनेनापि न विशिष्टाभावकारणत्वसंभव इति वाच्यं विशकलितो
भयावगाहित्वे हि मिथो विशेषणीभावानापन्नोभयावगाहित्वे ऽपि तत्तद्धर्मितनिष्ठविभिन्नविषयतानिरूपितो

कश्चिद्वतात्पालिङ्गेदेवनिवर्त्तितं साधारण्यं येष्वसाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकतायां
मणिकारसंमततया तत्स्वरूपापिनाशं साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यमिति व्याख्यातं
तच्चरुचानुमतमित्यन्यथा तन्निर्वाहाय असाधारण्यत्वं त्विति सपक्षव्यावृत्तत्वमिति पर्यवसन्नपदं विव
रणीयमिति तदेवासाधारणत्वविवरणमस्तु किं मेतरान्तद्विवरणेन तथापि सपक्षव्यावृत्तत्वमसाधारण
त्वमिति प्राचीनप्रवादाविसङ्गतत्वं स्वमतस्य दर्शयितुमेतद्विवरणं निश्चितसाध्यवद्व्यावृत्तत्वस्य व्याप्ति
ग्रहं प्रति साक्षाद्विरोधितायाः प्राग्व्यवस्थापितत्वात् निश्चयांशपरित्यागेन सपक्षपदं व्याचष्टे सपक्ष
श्चेति तद्व्यावृत्तत्वे पदैतदवृत्तित्वं तत्र साध्यादितिष्टहेतुसामानाधिकरण्य साध्यवदवृत्तित्व विशिष्ट
साधनादेरसंग्रहइति तत्साधारण्यं प्रत्याचष्टे तद्व्यावृत्तत्वमिति साध्याप्रसिद्धादेरपि विशिष्टसाध्यादिसा
मानाधिकरण्यग्रहविरोधितयाति प्रसंगवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वमाधिकं प्रवेशयन्
विरोधिपदस्य प्रतिबंधकपरतां भ्रमनिरावारणाय तदर्थं विवृणोति प्रकृतेत्यादिना प्रकृतानुमेयसाध्यता
वच्छेदकादिविशिष्टतद्भयेति विशिष्टसाध्यसाधनोभयेत्यर्थः इत्थं सामानाधिकरण्यग्रहविरोधितानि
कान्तगमकप्रकारेण तत्र विशिष्टसाध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्ननिरूपितविरोधितासम्बन्धे
लेन विशेषविरोधिताव्यावर्त्तनाय यावत्प्रवेशपरतेन तत्रावच्छिन्नत्वे स्वरूपसंबंधात्मकमेव निवेशयतेन त्व
भूत हृतिनिर्णयोरवादान् तथा च विशिष्टसाध्यसाधनग्रहाविरोधित्वनिवेशनमनर्थकं साध्याप्रसिद्ध्यादिग्रह
प्रतिबध्यतायाविशिष्टसाध्यादिग्रहत्वेनैवावच्छिन्नत्वादित्यत आह चाल्पघस्पर्शीति विशेष्ययोः स्पर्शिग्राह्
योः परस्परमसामानाधिकरण्यं संस्पृश्यत इत्यनेनान्वयः तथा स्वरूपसंबंधरूपावच्छिन्नत्वनिवेशने त्वा

व्याप्तिः तादृशविरोधज्ञानप्रतिबंध्यतावच्छेदककोटौ साध्यतावच्छेदकचालनघटितत्वादिविषय-
त्वाप्रवेशे विशिष्टसाध्यादिसामानाधिकरण्यग्रहत्वावच्छिन्नविरोधितायास्तत्रासत्त्वादित्यन्यूनवृत्ति-
त्वरूपमेव तन्निवेश्यं तथा च तत्तत्स्थलीयसाध्याप्रसिद्ध्यादिग्रहप्रतिबध्यतायामपि विशिष्टसाध्यादि-
सामानाधिकरण्यग्रहत्वान्यूनवृत्तित्वात् तत्रातिप्रसंगवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वनि-
वेशानभावश्यकमिति भावः ननु साध्यस्यावृत्तित्वे बाधरूपे साधनस्य चावृत्तित्वे स्वरूपासिद्ध्यात्मके
तिव्याप्तिः तत्र तदुभयस्यापि साध्यवत्तादिग्रहाविरोधितया तद्घटितोभयसामानाधिकरण्यग्रहविरोधित्वा-
दित्याशंक्य तयोर्लक्ष्यतास्वीकारेणानापादयतेरिति भावः ननु साधनादेः साध्यसामानाधिकरण्यादिके
विरोधएव तस्य कथमसाधारण्यतोपगमः इत्यत आह इष्टमिति मणिकृतां एवइदं विवक्षितत्वमनुमतेन तद्गमेत्य-
र्थः नन्वेवं भवतां कोविरोधि इत्याकांक्षायामाह इत्थं चेति नवीनं मणिकारीयं साध्यव्यापकीभूताभा-
वप्रतियोगित्वरूपमसाधारण्यं ननु साधनादेः साध्यसामानाधिकरण्यवत् तत्सत्तद्व्याप्यवत्त्वम-
प्युभयसामानाधिकरण्यग्रहविरोधीति तत्रोक्तलक्षणातिव्याप्तिरित्याशंक्य तत्त्वस्यनाप्रदर्शनेन निष्कर्षो-
तियत्र चेति प्रकरणसमपक्षनिष्ठसाध्याभावादिव्याप्यं तद्व्याप्यपक्षनिष्ठसाध्याभावादिव्याप्यस्य सत्प्रति-
पक्षतया स्वतंत्रपरिगणनात् तादृशस्य तद्व्याप्यस्य साध्यवत्ताज्ञानाविरोधिधीविषयत्वेन हेत्वाभासतादि-
रहात् इत्यर्थः व्यतिरेकव्याप्तिग्रहे इति हेतुत्वाभाववत्तावच्छिन्नधर्मिकसाध्याभावव्यापकताग्रहे इत्यर्थः सा-
ध्यादेरित्यादित्यादिना साधनस्य साधनाभावस्य च परिग्रहः अत्यंताभावाप्रतियोगित्वेनादिपदग्राह्यसा-
धनस्याप्यन्वयः अप्रतियोगित्वादीत्यादिना साध्याभावाव्यापकत्वपरिग्रहः तस्य च साधनाभावेन संबं-

५९ गदा.

59

धः अथाभावाप्रतियोगित्वधीः अभावप्रतियोगित्वप्रकारकं ज्ञानं प्रत्येव विरोधिनी न तु न तत्प्रकारक-
साध्याभावव्यापको हेत्वभाव इत्यादिज्ञानं प्रति ग्राह्याभावानवगाहित्वात् न चैतादृशज्ञानेपि संसर्गत-
याऽभावप्रतियोगित्वभानादभावाप्रतियोगित्वं ग्राह्याभावएवेति वाच्यं अभावांशे विशेषणीभवतः सा-
ध्यादेरनुयोगितायाएव संसर्गतया प्रतियोगितायास्तत्राभानात् प्रतियोगितानिरूपकत्वावच्छिन्नेवात्र
योगितासंबंधेन तु केवलाप्रतियोगितात्वेन प्रतियोगियोगितायाग्राह्यताविरहात् तेन रूपावच्छिन्नाभाव
स्याविरोधितानुपपत्तिः यत्तु अभावे अनुयोगितासंबंधावच्छिन्नप्रतियोगिताकस्याद्वित्वाद्यवच्छिन्नप्रति
योगिताकस्याद्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य वाभावस्यानुयोगितासंबंधेन साध्यादिसंबंधित्वाद-
भावत्वावच्छेदेन तत्संबंधावच्छिन्नसाध्याद्यभाववत्ताऽप्रसिद्धेः अभावत्वसामानाधिकरण्यमात्रेण
तद्वत्ताधियः अभावत्वसामानाधिकरण्यमात्रेण साध्यादिप्रकारकव्यतिरेकव्याप्तिग्रहाविरोधितया
तस्यादोषत्वायोगात् स्वरूपादिसंबंधावच्छिन्नप्रतियोगिताकाभावोऽभावांशे तादृशसंबंधेन प्रति-
योगिविशेषणतापन्नसाध्यतावच्छेदकादिप्रकारकव्यतिरेकव्याप्तिग्रहविरोधितयाऽनुपसंहारित्व-
मित्यपि न सार्वत्रिकं विशेषणतानवच्छिन्नज्ञानत्वाद्युपन्नसाध्यताद्यवच्छेदकतानतत्स्वरूपतत्स्या-
कारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुत्वेन यो तत्र तदभावप्रकारकज्ञानस्य निषेधेन तदंशे प्रतियोगिताव-
च्छेदकतानत्वत्वादिप्रकारकतयाऽविरोधित्वात् वृत्त्यनियामकसंबंधस्य संसर्गाभावप्रतियोगितान-
वच्छेदकतया तादृशसंबंधावच्छिन्नाभावाप्रसिद्धेः स्वाप्तेन तत्संबंधेन तत्प्रकारकबुद्धौ समानधर्मि-
कतासंबंधावच्छिन्नतदभाववत्ताबुद्धिवत् तद्विशिष्टेन संबंधेनासंबद्धत्वग्रहस्यापि प्रतिबंधक-

त्वमानुभविकं अतएव साध्यादेर्व्यतिरेकस्य वाधादिप्रभेदतो निराश संगच्छते एवं च साध्यादेरत्यंताभावप्रति
योगित्वादिकमिति यथाश्रुतस्यैव संगतिरित्यप्ययुक्तं केवलान्वयिप्रसिद्धत्वाद्यवच्छिन्नाभावप्रतियोगित्वस्य त्वे
न तत्त्विष्टतत्प्रतियोगित्वाप्रसिद्धेः स्वरूपादिसंबंधावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताया अप्रसि
द्धात तदभावस्याप्रसिद्धेः साध्यताद्यवच्छेदके संबंधविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारि
त्वमित्यस्य स्वरूपतो ज्ञानत्वादिसाध्यतावच्छेदकस्यात्वेन संभवति निर्विशेषणकज्ञानत्वादिविषयकव्यतिरेक
व्याप्तिग्रहे ज्ञानत्वत्वादिप्रकारेण संबद्धत्वग्रहस्य समानप्रकारकतया विरोधित्वात् साध्यतावच्छेदकाव
च्छेदेन वर्तमानः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमिति प्रगल्भानुसारि
मतमननुमतमेव दीधितिकृतां व्याप्तिवादे निराकृतत्वात् यथाहुः विशिष्टबुद्धौ विशेष्ये प्रकाराभावग्रहव
द्विशिष्टसंसर्गकबुद्धौ संसर्गतत्संसर्गावच्छेदकाभावग्रहोपि विरोधी संसर्गविशेषावच्छिन्नविषयताया अप्र
ग्राह्याभावधीप्रतिबध्यतावच्छेदकत्वात् विशिष्टसंसर्गकस्थले संसर्गतावच्छेदकीभूयैव विशेष्यस्या
पि संसर्गतः यान्ति संसर्गतया संसर्गतावच्छेदकविषयताया अपि संसर्गावच्छिन्नत्वात् एवं च वाच्यत्व
त्वाद्यवच्छिन्नत्वस्वरूपसंबंधावच्छिन्नत्वोभयविशेषितप्रतियोगितासंसर्गकवाच्यत्वाभाववत्ताज्ञाने
प्रतियोगितावच्छेदेन तदुभयाभावग्रहस्य विरोधित्वद्विषयतादृशाभावो न उपसंहारित्वमिति विवक्षितेऽप्र
धिकयत्नयत्नानुमेयेन त्वकाललक्षणस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारण्येऽतिव्याप्तिः न ज्ञानस्या
पि हेत्वभावप्रतियोगिकाभावे हेतौ साध्याभावसामानाधिकरण्यावगाहितया हेत्वभावे साध्याभावसामा
नाधिकरण्यावगाहितया हेत्वभावे साध्याभावसामानाधिकरण्याभावप्रतियोगित्वज्ञानाविरोधित्वात्

गदा॰

60

साध्याभावसमानाधिकरणत्वेन भासमानेऽभावे हेत्वभावप्रतियोगिकत्वग्रहस्य तुल्यवित्तिवेद्यतया हे
त्वभावेतादृशाभावप्रतियोगित्वावगाहनादित्यभिमानं निराकरोति वह्न्यभावाभावत्वेनेति कदाचिद्धूमा
दिति संभावनायां लिङ्गतुल्यवित्तिवेद्यतायां मानाभावात् भावेऽपि समानप्रकारकतया उक्तज्ञानस्य
व्यापकताज्ञानविरोधितायां विचारासहत्वात् प्रतिबन्धकत्वेनेति तेन रूपेण भासमाने हेत्वभावांशे प्रति
योगिता याऽसंसर्गादिति भावः नातिप्रसंग इति हेतुतावच्छेदकावच्छिन्नस्य साध्याभाववद्वृत्तितायापव
साधारण्यत्वात् उक्तबुद्धौ विरोधितायाः प्रामाणिकत्वे हेत्वभावाभावत्वावच्छिन्नस्य साध्याभाववद्वृत्तिता
यालक्ष्यत्वादेवेति भावः तन्मते भवेऽपि अभावाप्रतियोगित्वरूपतद्रूपसंहारित्वसंभवेऽपि अन्वयव्याप्त्यनुप
दानेन अन्वयव्याप्तिधीसंभवेन नाज्ञमिति प्रतिरोधः विशेषदर्शनोऽपि नान्यामित्यत्र माहः न चैवं धूमपि के
वलान्वयिसाध्यकहेतोरामासत्वापात्तस्य योक्तः निग्रहप्रसंग इति वाच्यं अभिमतसाधकताविच्छेदकाभा
वस्यैव निग्रहप्रयोजकतया अन्वयिपक्षपातगमकतापन्नाभियतानवनिग्रहस्थायोगात् व्यतिरेकिप्रयो
गे निग्रहस्यैष्टत्वादिति सव्यभिचारः गंधः साध्याभाववत्त्वं साध्यविरोधित्वमात्रमिमत्र मूले साध्यविरोधित्वपदि
सव्यभिचारः गंधः साध्याभाववत्त्वं साध्यविरोधित्वमात्रमिमत्र मूले साध्यविरोधित्वपदं साध्यासामानाधि
करण्यं तत्र साध्यासामानाधिकरण्यपदोपादानवैयर्थ्यमिति तन्न ज्ञावहे साध्येति साध्यासामानाधिकरण्यत्वे
साध्यानाधिकरणवृत्तित्वेन तत्र साध्याधिकरणावृत्तित्वमतेन साध्याभावपदोपादानवैयर्थ्यं अधिकरणभेदे
न संयोगाद्यभावमेदद्दंलक्षणत्रतोन संयोगिद्रव्यत्वादित्यादावतिव्याप्तिः साध्यासमानाधिकरणम
दं प्रतियोगिवेपाधिकरण्यविशिष्टार्थकमित्यपि केचित् तत्र साध्याभावप्रतियोगित्वेन साध्योपादा।

नस्पर्शिरोवच्छेदेन नासिकास्पर्शात्तिलत्वात् मूलस्थमात्रपदेन भाववर्तिकावत्त्वनिवेशस्य व्यवच्छेदः
अभावाभावस्य अभावप्रतियोगिकस्य भावत्वेपि भावतयाः भावत्वविरहेपि अभावत्वनिवेशाभ्युपगमेना
भावाभावइत्यादिकल्पनात्तदभिधानस्यासिद्धांतप्रमतिप्रसक्त्याह हृदीधितौ एकदेशीतिननु घटाभावो ना
स्तीत्यादिप्रतीत्या घटाभावाभावत्वविशिष्टधर्मासिद्धातितत्स्यातिरिक्तत्वे च मेवविस्तारणाद्विनस्यापवच
टादिरूपभावीस्याभावाभावत्वरूपस्याभावप्रतियोगित्वावगाहित्याशंकात्वेन चेति संबंधानरत्वात्
अभावत्वान्यसंबंधत्वात् सच संबंधः स्वरूपादतिरिक्तानतिरिक्तोवोभयथैव नत्वातिरिति भावः वाधा
दित्यस्य भावइत्यादिश्रविरोधादिति अभावाभावस्यातिरिक्तत्ववादिनापि प्रतियोगिमत्ताज्ञानस्याभावग्र
हप्रतिबंधकत्वोपगमादिति भावः अनवस्थाप्रतीतिरिक्तानामभावानामप्यतिरिक्ताभावकल्पनायाम
नंताभावकल्पनागौरवंबाधकाभावादिति भावस्यैवाभावत्वकल्पनायोगादिति भावः मूलेभावेने
वेति घटाभावोनास्तीति प्रतीतेर्घटादिरूपभावविषयकत्वेनैवेत्यर्थः किमाधिकेन घटाद्यतिरिक्तविषय
कत्वेन यथाऽतिरिक्तस्यापि तेजोभावादेर्दिनत्वादिविशिष्टस्य न प्रतियोगिग्रहसाध्येत्यग्रहत्वे किं त्वभा
वत्वावच्छिन्नस्यैव तथा घटत्वादिविशिष्टस्य प्रतियोगिनस्तथात्वेपि घटादेरभावत्वेन प्रतियोगिनिरूप्य
त्वेबाधकविरहादिति भावः अभावाभावप्रतीतेः प्रमात्वाभिधानस्याभावेः भावप्रतियोगिकत्वबाध
कताटशप्रतीत्यप्रमात्वप्रसंजनस्वरूपचकतास्फुटीकरोति दीधितौ भावस्येति भावस्याभावप्रतियोगिक
त्वेपि घटाभावोनास्तीत्यादिप्रतीतेरभावादेर्वैशिष्ट्याप्रमात्वसंभवाद्भावरूपप्रतियोगिधर्मितावच्
छेदकतायामभावत्वांशेप्रमात्वानुपपत्तिलाभाय व्याचष्टे भावेति अभावत्वेभाववैधर्म्यं तच्चभा

गदा॰

61

वेनतैर्भवतीति न हि विशिष्टवाचकतज्जन्यलोपितत्वाद्घटाभावो नास्तीत्यादिप्रतीतेस्तेन रूपेण घटाद्यवगाहि
त्वेन तद्देशे प्रभात्वं व्याहन्येतेति मूलाभिप्रायः अभावत्वे परिभावभिन्नत्वेन तदभावेतरप्रसक्त्याभावेष्व
भावत्वस्वीकार इत्यर्थकान्यथेति मूलानुपपत्तिरितोः भावत्वस्य तदन्यत्वे व्यवस्थापपत्तिरभावत्वे चेति
प्रथमे भावत्वादिप्रकारकज्ञानानुमति दूषणायामभावो न भाव इति प्रतावतापि अभावत्वस्य भावभिन्न
त्वस्वरूपतानिराकृतानत्यासत्यभावो न भाव इत्यनयोः समानार्थकतया विषयभेदाधीनद्विधाभित्त्वा
नुपपत्तेः ननु तथापि अभावत्वस्य निर्विकल्पकावेद्यतायाः सिद्ध्यतासिद्धत्वात् द्वितीये यण्ज्ञानविरहेण प्रथ
मे तत्प्रकारकप्रत्यक्षानुपपत्तिरित्यत आह तद्धेतीति अत्रापि स्थितामिति विशिष्टबुद्धौ विशेषणज्ञानं हेतुता
याः विशेषणभेदेन भिन्नतयाभावत्वविशिष्टबुद्धौ तज्ज्ञानं हेतुत्वाकल्पनादित्यभिप्रायः ननु केवल
प्रमेयत्वादिनाभावत्वादिप्रकारप्रकारकोपनीतभानदशायां स्वरूपतः भावत्वप्रकारतानैयत्यवारणा
य स्वरूपतस्तत्प्रकारकबुद्धौ लौकिकान्यत्वे कार्यतावच्छेदककोटावनिवेशे एव स्वरूपतस्तद्विषयक
ज्ञानत्वेन हेतुताकल्प्यते लाघवात् तथा च घटो नास्तीत्यादिलौकिकप्रत्यक्षे सर्वकालेपि स्वरूपतस्त
द्विषयकज्ञानमपेक्षितमित्यवश्यं तेनाहानिर्विकल्पकोपेक्षितं वेति तथा चाभावत्वस्य निर्विकल्पकावे
द्यत्वप्रदाने भावभिन्नत्वरूपाभावत्वमेतत्पवत्तस्य पदार्थान्तरतावादिनोक्तत्वस्यापि निर्विकल्पकवेद्यत्वमिष्टमेवे
ति भावः नन्वेवमभावत्वस्य नित्यत्वे सत्यनेकव्यक्तिवृत्तितया जातित्वापत्तिरित्यत आह अभावत्वं चेति
इदं त्वबोध्यं अभावत्वमनुयोगितारव्यः प्रतियोगिनिरूपितः संबंधविशेषस्तत्प्रतियोग्यादिभेदाद्भिन्न
एवेत्यनुगमकधर्मान्तरप्रकारेणावनस्य नास्तीतिबुद्धौ प्रकारतासंबंधितया च तस्य प्रतियोग्यप्रयोगे

णेव भानं निर्विकल्पकावेद्यतावानुगमकधर्मस्यैव प्रपंचितं घटमाधिकमधस्तात् अधिकरणस्याभावत्वरूप
त्वे अभावाधिकरणत्वानुपपत्तेस्तत्तद्रूपमेवेति अभावव्यावहारो यतेरिति भावः भावाभावत्वस्वीकारे
भावाभावत्वस्यापि तत्र संभवादिति अनेन धर्मिष्वभावत्वकल्पनापेक्षया एकत्र तत्कल्पनमित्यादिः घटत्वा
द्यभावाभावस्यातिरिक्तत्वे इदमप्यायत्र्या संभवाद्भावानामभाव इति प्रतीतेरुपपन्नत्वेनाभावव्याहृतमेवेति
फक्कावेव निर्भरं दूषयति अवाधितेति प्रमात्मकेत्यर्थः एतेन क्लृप्तधर्मिणां वक्ष्यमाणस्वरूपकधर्मकल्पना
धामवाधकत्वे अभावमात्रासिद्धिप्रसंगेन संयोगादिसाधारण्याच्चैतस्य समप्रतियोगिकत्वस्येत्यादिः तथा
च सप्रतियोगिकत्वस्य नास्तीति प्रतीतिविषयत्वे घटसंयोगादिमत्यपि घटो नास्तीति प्रतीतिः स्यादिति भा
वः अत्रासिद्धान्तानुसारिणः अभावत्वं भावाभावसाधारणमेव नास्तीति प्रत्ययनियामकं घटादिभावो भाव इ
ति प्रत्ययः प्रामाणिकः तदभावव्याहृतं भावत्वं तादृशप्रत्ययनियामकं तया स्वीक्रियतां न तु तदेव नास्ती
ति प्रत्ययनियामकं तथा सत्यनन्ताभावकल्पनया गौरवात् भावाभावसाधारणैकधर्मस्यैव लाघवेन नास्तीति प्र
त्ययनियामकत्वेनाकल्पनौचित्यात् एतत् अनेन घटादीनां घटाद्यभावाभावत्वकल्पने गौरवात् ज्ञायते
नातिरिक्तैकैकाभावेन तत्कल्पनमुचितमिति न तत्र तद्रूपं प्रतिभाति घटाभावत्वं घटाभावनिरूपितो नुयोगिता
विशेषः स च घटेन निरूप्य घटाभावीयप्रतियोगितातो नातिरिच्यते सा चानन्ता घटे भुत्वा सैव न चैवमत्र घटाभा
वप्रतियोगी अत्र च घटाभावाभाव इति प्रतीत्यापत्ति विशेषापत्तिः प्रतियोगितानुयोगितात्वरूपविभिन्नधर्मावगा
हनेनैव तद्विशेषात् अभावाविरहात्मत्वं वस्तुनः प्रतियोगितेति प्राचां वादाविसंगच्छाप्ययथा घटादेः संयोगा
दिसंबंधस्यैव संगादिसंबंधावच्छिन्नस्वाभावाभावत्वविशिष्टनिरूपितत्वं स्वीक्रियते न तु समवायादेरतो नः

गदा.

62

कपालादौ संयोगादिसंबंधावच्छेदेन घटाभावो नास्तीत्यादिप्रत्ययसंगतत्वं पत्रवेन साधारणविरु
द्धयोर्गमकत्वभ्रमरूपाशङ्कानिरासायाह कश्चिद्विशेषइति मूलोक्तं दूषयति व्यभिचारिणीत्यादिना अव्यभिचार
मात्रइति भ्रमइत्यग्रिमेणान्वयः मात्रपदेन साध्यसामानाधिकरण्यभ्रमव्यवच्छेदः सामानाधिकरण्यांशे
पीत्यपिनाऽव्यभिचारसमुच्चयः नन्वेवमप्यनुमितिविरोधिरूपमुभयोरपि साध्याभावसामानाधिकरण्य
मेवेति साधारणाविरुद्धयोः पृथक्परिगणनमसंगतमित्यत आह दूषकतायामिति अत्रमित्यत्र यथा
नुप्रयोजकरूपभेदाविरहपीत्यर्थः निग्रहस्थानत्वेन विशेषादिति निग्रहस्थानविशेषप्रयोजकत्वेनानै
कान्तिकबहिर्भावादित्यर्थः भेदेनोपन्यासः विरुद्धस्य स्वातंत्र्येण परिगणनं अतएव च यन्नाविरुद्धस्या
नैकान्तिकविशेषत्वाद्भेदेनत्वादेव विरुद्धस्यानैकान्तिकलक्षणाक्रान्तत्वेपि स्वातंत्र्येण तद्विभजनं संगम
यति छलजात्योरिति छलजात्योः पदार्थविभाजकानिग्रहस्थानत्वाक्रान्तत्वेपि यथा पदार्थेषु स्वतंत्र
विरुद्धे तथा विरुद्धस्यानैकान्तिकविशेषतयाऽनैकान्तिकत्वभासाविभाजकरूपाक्रान्तत्वेपि हेत्वाभासेषु
स्वतंत्रविभजनमविरुद्धमित्यर्थः मूले विरुद्धलक्षणइति विरुद्धपदवोत्तरभेदानुमानइत्यर्थः नव्यार्थत्व
वानियमोंशस्य व्यर्थत्वे हेतुमन्निष्ठाभावप्रतियोगित्वरूपायाः साध्याभावनिष्ठहेतुव्यत्यकताया हेतु
साध्याभावसमानाधिकरणघटितघटिततया तद्घटितविरोधाभावे साधारणाभानस्यावश्यकत्वाभिधा
ने मूलकृतानसंगच्छतेइति तत्संगमनाय वितर्कं पतिव्यापकत्वमिति अविरोधिव्याप्तिग्रहाभावाद्यनव
गाहनेन तज्ज्ञानस्य व्याप्तिज्ञानाद्यप्रतिबंधकत्वादित्यर्थः नन्रु हेतौ साध्यव्यापकीभूताभावप्रतियोगित्व
ज्ञानस्य व्याप्तिज्ञानादौ ग्राह्याभावाद्यनवगाहितया प्रतिबंधकत्वेन संभवतीति कथं हेतुनिष्ठतादृशप्रति

योगितस्याविरोधरूपतयास्ति ज्ञातप्रणयनामित्यत आह तत्प्रतियोगिकेति हेत्वभावप्रतियोगिको।
त्यर्थः हेत्वभावाभाववत्त्वेन भासमान एव साध्यसामानाधिकरण्यग्रहस्तेद्भावेन लघ्वेति वेद्यतयासा।
ध्यसामानाधिकरण्याभावप्रतियोगित्वमवगाहते इति तत्त्वतादृशप्रतियोगित्वाभावरूपव्यापकताग्रहप्र
तिबध्यत्वेन तत्तावच्छेदकरूपेणाभासमाने साध्यसामानाधिकरण्यग्रहस्तत्र स्वेच्छानुपदं वक्ष्यमाणनयाप्र।
भिप्रायेणेति पदिवेत्यनेन तद्धेत्वभावे साध्यव्यापकताग्रहदशायामिति प्रकृतीयं नतद्भावेनेति हेत्वभाववत्त्व
र्थः असामानाधिकरण्यग्रहेपि सामानाधिकरण्यग्रहासंभवेपि साध्यव्यापकत्वे साध्यासमानाधिकरण्य
ग्रहेपि सामानाधिकरण्ये स्वाभावकत्वरूपं यद्विवक्ष्यते तदा फलं नैव असामानाधिकरण्यग्रहे योन्य
स्यामानाधिकरण्यग्रहदशायामिति यथाश्रुतार्थकत्तयेवच संगतिर्बोध्या नत्वेन हेतुतावच्छेदकरूपेणाप्र
तिहेतोर्विरुद्धत्वस्यानुमितायाविरोधरूपतायाश्चैकत्वाद्धेतिमतत्वे इति धर्मेतिच व्यर्थमित्यत आह रूपेणेति
पक्षधर्मत्वाविरोधित्वप्रदर्शकमिति पतत्यदर्शनेनच स्वरूपासिद्धेर्विलक्षणस्याविरोधेलाभायेपि ध्येयं।
विशेषकाविरोधशरीरमविशेषार्थकं रूपकतायां प्रतिबंधकतायांमनुपयोगित्वात् तदर्थविषयतायामा।
नुपयोगित्वात् अव्याप्तिकरत्वात् अवृत्तिविरुद्धासंग्रहप्रयोजकत्वात् वृत्तिविशेषेति न संबंधेनविरुद्ध
त्वमभिमतं संबंधावच्छिन्नसाध्यवद्वृत्तित्वनिवेशलाभायेत्यर्थः तन्निवेशनप्रयोजनमाह तेनेति लक्षणेव
नष्टप्यस्य भेदस्फुटयति आधयोरिति अभावाविति अन्यतामावावित्यर्थः पृथिवीइतरेभ्यो भिद्यते पृथिवी।
त्वादित्यादौ व्यतिरेकिणि साध्यवद्वृत्तित्व सत्त्वाद्धस्त्वेति व्याप्तिनसंभवतीत्याशयेनाह तन्नानाति प्रसक्तिमिति हेत्व
मतिसाध्यवत्त्वाग्रहणात्तत्र साध्यपदवृत्तित्वग्रहसंभवादिति भावः असाधारणेपि शाखाहोनित्यः शब्दत्वादित्या

दैवसत्त्वनिव्याप्तिग्रहं कालत्ययतां स्वीक्रियत्य निराकरणेन मूले अग्रासावयेणे चेति संकर एवेति विरोधस्य हेत्वां-
तरसामानाधिकरण्यनिष्ठमेवेत्यर्थः अनेन विरुद्धत्वेन तस्य असाधारणहेतौ दोषत्वात् उपत्वेऽपि
विरुद्धात् साध्याभाववद्वृत्तित्वज्ञानाभावस्य साध्यवदवृत्तित्वज्ञानप्रयोजकत्वादिति तेनैव विनेत्या-
दिमूलासंगतिरिति तदन्यथाव्याख्यानमपादत्ते दीधितौ तेनेत्यादीति वृत्तिमत्त्वेति वृत्तिमत्त्वविशिष्टसा-
ध्यवदवृत्तित्वरूपहेतुज्ञानं चादितसाध्याभाववत्त्वादीति वृत्तिमत्त्वेति वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्व-
रूपहेतुज्ञानं चादितसाध्याभाववद्व्याप्तित्वानुमितिसामग्र्याः फलोपहितत्वानिर्वाहादित्यर्थः तथा च सा-
मग्र्याः फलोपधाननियमानुरोधात् तज्ज्ञानस्यावश्यकत्वमिति भावः मूले उपजीव्यत्वेऽपि त्वादिति
व्यभिचारज्ञानोपजीव्यत्वेन विरोधस्यापि दुष्टत्वे हेत्वाभासतायाः आवश्यकत्वादित्यर्थः न स्वतो दूषकमिति उपा-
धिवन्न हेत्वाभास इति शेषः व्याप्तिग्रहप्रतिबंधकत्वादित्यस्य स्वतो पोषकादिः व्यभिचाराज्ञानविरोधित्वे-
नेति मूलस्य व्यभिचारज्ञानाभावविरुद्धत्वेनेमर्थो न संभवति तावता व्याप्तिज्ञानप्रतिबंधकत्वालाभा-
दित्यन्यथा तद्व्याचष्टे दीधितौ व्यभिचारेणेति व्याप्तेर्व्यभिचारसामानाधिकरण्यघटितत्वमभिप्राय-
तदंशाभानविरोधिनोऽज्ञानस्य व्याप्तिज्ञानप्रतिबंधकतोऽस्फुटीकरणेन तद्विषयस्य हेत्वाभासतापात्तिव्या-
नुद्धृत्वं दर्शयति तस्य मर्य इत्यादिना विरोधस्यैव निरुक्तत्वात् स चायमित्यस्य तत्परामर्षकताभ्रमनि-
रासकरोति स चायमिति साध्याभावव्याप्यत्वज्ञानवत् साध्यवद्भेदव्याप्यत्वज्ञानस्यापि विरोधितया तदनभि-
धानेन्यूनतापरिजिहीर्षुः साध्याभावपदे साध्यतद्वदन्योन्याभावपरतया व्याचष्टे तदभाववत्त्वमि-
ति साध्याभावपदं साध्यतद्वदन्योन्याभावपरतया व्याचष्टे तदभाववत्त्वमिति साध्याभावव्याप्यत्वा-

व्याप्यत्वादिवारणायाभावपदं विरोधिताविशेषणस्य चवकं उत्तरत्रापि साध्यव्यापकाभावेत्यत्रापि अन्य-
था साध्याव्यापकाभाववद्वृत्तित्वग्रहासंग्रहादिति भावः व्यापकाभावव्याप्यत्वव्यापकविरुद्धत्वयोरभेदा-
त् द्वितीये व्याप्यपदार्थाविवक्षामाह व्याप्यपदमिति विरुद्धपदस्य तदभावव्याप्यतद्वद्वृत्त्युभयप-
रतामाह साध्यव्यापकेति सामानाधिकरण्यविरोधित्वं च ग्रहप्रतिबन्धकधीविषयत्वं न तु तदधिकरणा-
वृत्तित्वं तदभाववत्त्वादेरपि तत्सामानाधिकरण्यावृत्तित्वात् व्यापकवदवृत्तित्वादीत्यादिना व्यापकाभा-
वव्याप्यत्वपरिग्रहः इदं च तदभावव्याप्यत्वग्रहस्य तत्सामानाधिकरण्यग्रहविरोधितामङ्गीकृत्य विरु-
द्धत्वादिग्रह एव विरोधी न तु तदुपलम्भ इत्याशयेनोपलम्भपदानामविवक्षितार्थकतामाह सर्वत्रेति
सर्वत्र व्यापकविरुद्धोपलम्भादित्यत्राग्रिमप्रतियोग्युपलम्भादित्यादौ चेत्यर्थः साध्याभावव्याप-
काभावव्याप्यत्वेनेत्यत्र मूले व्याप्यपदार्थाविवक्षायां साध्याभावव्याप्यत्वालाभः तद्विवक्षायां च सा-
ध्यव्यापकाभावत्वालाभः अविवक्षिततद्व्याप्यत्वलाभश्चेत्यतो व्याचष्टे साध्याभावेनेति ज्ञानस्य दोष-
त्वादिति मूले ज्ञानस्य विरोधित्वादित्यर्थके तथा च सामानाधिकरण्यग्रहविरोधिरूपाणां परिग्रहणीय-
तया न तदुपादानविरोध इति भावः स्वव्यापकतायाश्च साधारण्य एव कथं साध्याभाववत्त्वस्य कथितो-
तर्भाव इत्याकाङ्क्षायामाह दीधितौ तथा चेति प्रतियोग्युपलम्भपदं साध्यीभूताभावप्रतियोगितावच्छे-
दकतद्वद्वत्त्वतदत्यन्ताभाववत्त्वाद्युपग्राहकतया व्याचष्टे प्रतियोग्युपलम्भादिति स्वरूपत इति विरोधिता-
विशेषणस्य चकं साध्यव्यापकाभाववत्त्ववारणाय विरोधित्वात् विरोधिज्ञानप्रकारतावच्छेदकधर्मवत्त्वात्
निरोधिकान्यत्वादीति विरोधिकान्यतमत्वादीत्यर्थः साध्यव्यापकविरुद्धोपलम्भादित्यनेन साध्याभाव-

व्याप्यतोपग्रहाद्याहसाध्यव्यापकेत्यत्रेति धूमवत्त्वादित्यत्र तृतीयोदाहरणस्य साध्यव्यापकाभाववत्तया स-
ध्यमेप्यन्तर्भावः संभवतीत्यनिरुक्ताविशेषे व्यापकाविरुद्धान्तर्भावं दर्शयति धूमाभाववत्त्वादिना दशायामि-
सनंतरमेवकारः पूर्वः मध्यमेशाध्यमे साध्यव्यापकाभाववत्त्वज्ञानविषयतया तु ह्ये ग्रहे हेद्दशायां चरमे साध्यव्या-
पकविरुद्धत्वज्ञानविषयतया तु रूपे स्वरूपतो ज्ञातान्येवेति एवकारो मध्येयोज्यः तथा च साध्याभावव्याप्य-
त्वादिना ग्रहीतान्यपि ध्यविरोधीनीत्यर्थः असामानाधिकरण्यव्याप्यत्वेनेति सावधारणमतो न वक्ष्यमा-
णरूपेणासंगतिः व्यापकाभावव्याप्यत्वादेरित्यादिना व्यापकवद्वृत्तित्वपरिग्रहः स्वरूपेणैवज्ञानयो-
रितिनतदभावव्याप्यत्वेन ज्ञातयोरपीत्यर्थः साध्याभावः साध्यसमानाधिकरणइत्यनाहार्यज्ञानात्तत्प-
त्वाधर्मितावच्छेदकतासंबंधेन तत्सामानाधिकरण्यप्रकारकानाहार्यबुद्धौ तदभावत्वादि पर्याप्तसवि-
षयतासंबंधेन तत्सामानाधिकरण्यप्रकारकानाहार्यबुद्धौ तदभावत्वादिपर्याप्तसविषयतासंबंधेन ज्ञा-
नत्वेन प्रतिबंधकत्वादिति भावः यथाकथंचिद्विरोधिरूपाणामेवायं विभाग इत्याशंकते न च ज्ञातत्वेऽपी-
ति स्वरूपतो विरुद्धत्वेऽपीत्यर्थः न त्वेवं विरुद्धत्वस्याविरुद्धस्य चैतन्त्रसामानाधिकरण्यस्येति अस्य स्वरूप-
तएव सामानाधिकरण्यधीविरोधित्वादिति भावः समानाधिकरणेति अपसञ्जः साध्यवत्त्वादित्या-
दौ साध्यत्वादीनामित्यर्थः तेषामप्यस्वत्वाद्यसामानाधिकरण्यव्याप्यत्वेन विरोधित्वादिति भावः सचाप-
मित्यादिग्रंथो न सामानाधिकरण्यधीविरोधिरूपपरिगणनपरः किंतु विरुद्धहेतुप्रभेदपरिगणनपर
एव एवं च साध्यासामानाधिकरण्यरूपवत्तो धर्मिणां साध्याभावव्याप्यत्वादिनेवोपग्रहान्नाधिक्यमिति
शंकां निरस्यति न चैतानीति सर्वेषां साध्यव्यापकाभावादीनां साध्याभावव्याप्यत्वेनेति न तथा च तेषां न पृथ-

गृणादानानुपपत्तिरितिभावः इदमुपलक्षणंएतज्ज्ञानेधीत्यादिमूलविरोधोपिद्रष्टव्यः विभागं
संगमयतीकेचिन्मतमाह विरोधीत्याधकोति एवंच साध्याभावव्याप्यत्वादिनाज्ञातस्य प्रतिब
न्धकत्वमभिहितंतत्रापिविरोधज्ञानद्वारानतुसाक्षादितिनविरोधइतिध्येयंविरोधाधुमायकहेतुनामा
नेत्याचैवविध्यानुपपत्तिरलंदवस्यैवेत्यस्वरसस्तद्वनापवदंतीतिमूलेसर्वस्यापिविशेषणाद्वाराघीतिउक्ता
निर्विकल्पप्रकारोविरुद्धविशेषणानिबंधनोपीत्यर्थः अत्रविशेषणानितिविधवत्त्वस्याविरोधरूपविशे
षणेसंक्रमोवोध्यः हृस्मादिविति अत्रविशेष्यधूमत्वावच्छिन्नस्यसाध्यसमानाधिकरणत्वात्कटुत्वा
दिविशिष्टस्यैवविरुद्धत्वादितिभावः अत्रप्रत्येकविशेषणावच्छिन्नस्यैवविरुद्धताबोध्याबाधस्व
रूपासिद्ध्यन्यतरसंकरस्यावश्यकत्वपाक्तिवित्कनाभिधानेनसंगच्छतइत्याशंक्यतदुभयानुगमक
तद्रूपावच्छिन्नसंकरस्यकादाचित्कत्वंविवक्षितमित्याह दीधितौवाधेत्यादिनातद्विरोधस्यत्वे
दोषांतरस्यावश्यकत्वेकिमस्यदोषत्वाभ्युपगमेनेत्यतआह ज्ञानासंकराच्चेतिदोषांतरज्ञानदशा
यांविरोधज्ञानेनाप्यत्वमितिप्रतिबंधादस्यदोषांतरत्वमावश्यकमितिभावः विरुद्धगंधःसमानव
लेत्यादिमूलेस्यप्रकृतसाध्यानुमापकवलक्षणालित्वेसतिप्रकृतसाध्याभावानुमापकवलप्राप्तिहे
त्वंतरकत्वमित्यर्थः अत्रानुमापकत्वमनुमितिफलोपहितत्वमनुमितियोग्यत्वंवाअंद्येदूषणमाह
परस्परेतिउभयोरबोधकत्वादित्यस्यसत्त्वातिएव्रतादृशाद्यामित्यादिद्वितीयपक्षेएतद्दोषानपकाण
दलपदार्थेचितर्कयटव्यतिबलेचेतिवलपदार्थस्त्रेत्यर्थः सपक्षसत्त्वादीतिआदिनापक्षसत्त्वविप
१३१ क्षासत्त्वयोःपरिग्रहःव्यतिरेकिणीतिअभावात सपक्षाप्रसिद्ध्यातत्सत्त्वासंभवात एतदुपलक्षणं

६५ गदा.

65

सर्वत्रैव सत्प्रतिपक्षे पक्षहेतौ सपक्षसत्त्वविपक्षासत्त्वयोरेकतराभावोऽपि द्रष्टव्यः समानेति संख्यातापा-
तं बलपदार्थस्य समानत्वाघटितत्वात् विरोधेनेति विरुद्धसाध्यतदभावव्याप्ययोरेकतरपक्षसत्त्वनियमेनेत्य-
र्थः तद्भंगेति व्याप्तिपक्षधर्मतयोरेकतरपरैवेत्यर्थः व्याप्तिपक्षधर्मतया व्याप्तिसहितपक्षधर्मतया ज्ञानत्वं ज्ञा-
यमानत्वं व्याप्तिविशिष्टत्ववैशिष्ट्यज्ञानविषयपक्षकत्वमिति समुदितार्थः तेन नित्यत्वव्याप्यश्रावणत्वा-
दिविशिष्टाप्रसिद्ध्या साध्यमप्यलसंगतिः नित्यव्याप्येति शब्दोऽनित्यः कृतकत्वादित्यादौ श्रावणत्वादिरूपप्रति-
हेतोर्वृत्तस्य धर्मतया वा व्याप्यवत्ताज्ञानस्यारोप्यस्याऽप्रसिद्ध्यासंभवेन समानबलत्वासंभवादित्यर्थः यत्राव्याप्यः
प्रतिहेतुः तत्र पक्षधर्मे श्रावणत्वेऽन्यत्र प्रसिद्धाया व्याप्तेरारोप एव बलं यत्रापक्षधर्मः प्रतिहेतुः तत्र
साध्यव्याप्ये पक्षधर्मत्वारोप एव बलमिति शंकायां विशिष्टाप्रसिद्ध्या व्याप्तिविशिष्टपक्षधर्मत्वारोपासंभवा-
भिधानमसंगतमित्यत आह प्रायस्य प्रतिरोधितो व्याप्य इत्यादिना व्याप्ते व्याप्तिविशिष्टे पक्षधर्मे पक्षधर्म-
ताविशिष्टे प्रत्येकं व्याप्तिविशिष्टत्वविषयकपक्षधर्मताज्ञानत्वादिनाऽव्यापकः सकलसत्प्रतिपक्षा-
संग्राहकः श्रव्याप्याद्विहेतोर्व्याप्याद्विविशिष्टत्वाप्रसिद्धेरिति भावः वैशिष्ट्यारोपो व्याप्तिविशिष्टपक्ष-
धर्मतायाः स्वस्मिन् ग्रहः वाच्यः बलपदेनाविवक्षणीयः एकधर्मिणि साधिकमेकचेत्यादिफलपाहवि-
वरणं विशिष्टस्येति पाठः साध्ये पक्षे बाधितेऽन्तर्दीयव्याप्तिविशिष्टप्रहापक्षवृत्तित्वस्याप्रसिद्ध्या न सं-
भवतीति तथा चानित्यत्वव्याप्तिविशिष्टश्रावणत्वाद्यप्रसिद्ध्या यथाव्याप्याद्विविशिष्टतद्धेतुधर्मिके
पक्षधर्मत्वादिग्रहः प्रसिद्धस्तथाऽनित्यत्वादिव्याप्तिविशिष्टपक्षवृत्तित्वाद्यप्रसिद्ध्या श्रावणत्वादेरनुद्धृते
प्यप्रसिद्धेरिति श्रावणत्वादेः समानबलवत्त्वासंभवेन कृतकत्वादेः सत्प्रतिपक्षत्वानुपपत्तिरिति भावः व्याप्तिप

त्तधर्मताभ्रमज्ञानविषयताया बलत्वेनेष्टापत्तेरन्यतो दोषान्तरं स्वयमाह । विरुद्धाद्यावित्यादिना सा
धारण्यपरिग्रहः साध्याभाववद्वृत्तित्वरूपव्याप्तेरन्यत्र प्रसिद्धावाद्यावप्यारोपसंभवात् स्वव्यापकेत्यादिप्र
प्रसिद्धेरुक्तेति तज्ज्ञानघटितसमानबलत्वासंभव इति शेषः व्याप्तिप्रकारेण पक्षे स्वप्रकारकज्ञानविवक्षणे
सामान्यादौ पक्षे संभवापादितरूपहेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धिनेत्तत्तिभाववद्वृत्तीति साः प्रसिद्धिर्नोक्ता
व्याप्तिघटकानां स्वरूपशः प्रसिद्धतावत्पदार्थानां परस्परोपश्लेषावगाहिज्ञानस्य वनयाविवक्षणेन न दोषो
द्वारसंभवेपि अन्वयव्यतिरेकव्याप्तिज्ञानयोरननुगमेनैकोपाधानेऽन्यत्रव्याप्तिर्दुर्वचैवेति भावः सा
ध्यानुमितिसाध्यवत्ताज्ञानविरोध्यनुमितिसमर्थत्वेनानुगमेप्यतिप्रसङ्गात्तल्लक्षणं एवमपि एवं सानेव्याप्तिभंगाभंग
रूपद्धति मूले व्याप्तिपक्षधर्मताप्रमितिविषयत्वतद्भ्रमविषयत्वान्यतररूपपर्यवेक्षकतगविषयकव्याप्तिपक्ष
धर्मताज्ञानस्य भ्रमत्वनियमेपि तदनवधारणेनानिर्धारितविशेषत्वसंभवादेकतरभंगानियमासिद्धिति दूषणमन्य
संगतमित्यतआह तथा चेति नाहृष्टाभंगानियमेवेत्यर्थः तदनवधारणे भंगावधारणं अनयोरेकतरं व्याप्यवि
रुद्धाद्यग्राहकत्वादिसदनुमाने सत्प्रतिपक्षतादशाधामसत्त्वमित्यर्थः यद्यप्यनयोरेकतरमित्याह एकत्रपक्षे
साध्यतदभावव्याप्यतयाहेतुद्वयज्ञानान्यतरत्वं भ्रमः एकत्र मिथोविरुद्धद्वयसाधकद्वयान्यतरत्वादित्य
र्थनिसाध्यः सद्धेतुपरामर्शयोरन्यतरत्वरूपहेतुसत्वेन भ्रमत्वस्य चाभावेन व्यभिचारात् नचैकपक्षकहेतु
प्रतिहेतुपरामर्शान्यतरत्वं पक्षीकृत्य विरोधिसाधकद्वयवृत्तित्वेन भ्रमवृत्तित्वमेवानुमेयं तथाहि श्चान्यतरत्वा
श्रयेणैकत्र भ्रमत्वसत्वेनैव तत्र भ्रमवृत्तित्वसत्वान्न व्यभिचारप्रसक्तिरिति वाच्यं तथा सत्यपि यद्यदादिविषयक
समूहालंबनरूपे यत्र परामर्शे तत्र चयदा तेषां भ्रमत्वमादाय पर्यवसानं वारणाय तदेतौ तत्तत्साध्यादिव्याप्यादि

गद०

66

श्च माप्रतिज्ञा साध्याप्रसिद्धेः तत्र हेतुद्वयान्यतरांशेन तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमहेतुत्वसाधनेवविरु-
द्धार्थसाधकान्यहेतुकपरामर्शद्वयान्यतरत्वेव्यभिचारः सध्यप्रसिद्धिमात्रेणैवहेतुत्वहेतुताचतत्थापितत्रतत्सा-
ध्यव्याप्यवच्छिन्नपक्षविषयतानिरूपितहेतुविषयताद्वयान्यतरत्वपक्षीकृतभ्रमत्वानियतविषयताहेतुत्वा-
प्रकधर्मिकाविरुद्धानुमितिजनकतावच्छेदकविषयताद्वयहेतुत्वेन साधनीयभ्रमत्वेवानुगतंकथंचिन्निर्वच-
नीयं उच्यतइत्यादिग्रंथस्यदोषनिर्वचनपरत्वंनसंभवति साध्यविरोध्युपस्थापनेत्यादिज्ञानस्य ग्राह्याभावा-
घनवगाहितयास्वतंत्रमितिप्रतिबंधकतयातस्यहेत्वाभासत्वासंभवादितिसत्प्रतिपक्षव्यवहारविषयनिर्वच-
नपरतयाव्याख्यातुकामोव्यवहारविषयबुधारयतिसत्प्रतिपक्षेचेतिसत्यंतनिसमीचीनेः समीचीन-
मर्थः तथाचसद्धेतावुक्तलक्षणस्यदशाविशेषेऽतिप्रसंगोनदूषणावहइतिभावः स्वपराद्भुतप्रामाण्यइति
कृतसाध्यसिद्ध्यापादकस्वविषयकपरामर्शदशानवच्छिन्नत्वइत्यर्थः एतेनसाध्यसिद्ध्यापादकपरामर्श-
कालीनत्वरूपसमानबलवत्त्वनिवेशसार्थक्यंदर्शितं अस्तिगृहीताप्रामाण्यकेवापरामर्शसत्प्रतिपक्ष-
व्यवहारविरहादित्याशयग्रंथस्तथ्यमतीत्यस्यगृहीतविधयाप्रदर्शनेननग्रहीताप्रामाण्यकत्वांश-
मात्रव्याहृतिप्रदर्शनपरइतिनध्येनसंदर्भविद्यमानविरोधिपरामर्शइतिविरोध्युपमितियोग्यपरामर्श-
दशानवच्छिन्नइत्यर्थः एतेनबलोपस्थितिप्रतिबंधकार्यकत्वांशनिवेशनप्रयोजनंदर्शितं अतएवेति
प्रकृतपरामर्शस्यविरोधिपरामर्शस्यचासत्त्वदशायांसत्प्रतिपक्षव्यवहारविरहादेवेत्यर्थः अतीतानागत-
प्रतिहेतुपरामर्शदशायामपिसत्प्रतिपक्षपदस्यहेतुपरतापक्षेपरित्यज्यपरामर्शपरतामाह विरोधिप-
रामर्शोवेतिपराङ्मुखप्रामाण्यानिश्चयस्यान्यपदार्थपराङ्मुखप्रामाण्यत्वेनशाब्दतोलाभेनतथाविप्रतिपत्त्यपद-

स्यैव फलीभूतत्वकार्यप्रतिरोधकपरतया परामर्शमात्रस्य कार्यानुमितिविरोधिपरामर्शपरत्वात् फ-
लितार्थविवरणमिदं [illegible] तादृशव्यवहारानुसारेण बाधाश्रयासिद्धिनिरूपणपरग्रन्थेऽपि तादृशाया
मतिव्याप्तिवारणायेत्यर्थः ततोऽपि प्रात्याहृत्यानुमितिप्रतिबन्धकत्वेऽपि तस्य परामर्शेनापि समं विरोधात्पराम-
र्शकाले तत्सम्भावनानेदं चेष्टमिति वाच्यं लौकिकसन्निकर्षादेव तत्सम्भवात् आश्रयासिद्धिपदं साध्याप्रसिद्धेर-
प्युपलक्षणं केवलपदेनैव तद्व्यावर्तनात् समर्थीतवैयर्थ्यमित्याशङ्कां निषेधयति तत्र बाह्यावित्यादिना स्वसाध्या-
दिनिर्णयः व्याप्तीति धूमो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभाववान्यवेनाघटितत्वात् तादृशाभाववान् धूमो गुण-
वान् द्रव्यत्वादित्यादौ धूमादौ वह्न्यादिव्याप्तिविशिष्टपक्षधर्मतानिश्चयरूपबाधाश्रयासिद्धिनिर्णयस्य व्या-
प्तिपक्षधर्मतात्मकवैलक्षण्योपस्थितित्वसम्भवादित्यर्थः ननु च तत्र पदं प्रकृतसाध्याभावव्याप्तिविशिष्टप्रकृ-
तपक्षधर्मतापरमिति नायं दोषः प्रकृते वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभावाभावव्याप्तिविशिष्टधूमवृ-
त्तितायाप्रबलत्वादित्यत आह पक्षवृत्तिर्वृत्तीत्यस्य प्रतिरोधकज्ञानाविषयत्वेति शेषः पक्षस्य व्याप्तेश्च भिन्न-
त्वादित्यन्वयः प्रथमे प्रकृतपक्षस्य द्वितीये प्रकृतसाध्यस्य पक्षभेदः व्याप्तेर्भेदकादम्बमात्रव्यापकत्वादिव्याप-
कभेदेनेति व्यापकयोः साध्याभावपक्षवृत्तित्वाभावयोर्भेदेनेत्यर्थः अविवक्षितत्वात् विवक्षितत्वमशक्यत्वा-
त् नन्वनुगतरूपेणादर्शितसकलव्याप्तिपक्षधर्मतानिवेशेनायं दोष इत्यत आह साध्यविशेषेणेति ता-
दृशानुमितिजनकज्ञानत्वेन प्रतिरोधकज्ञानस्यैवानिवेशात् तद्विषयाविषयकत्वेन ज्ञानस्तन्निवेशोऽनुचित इ-
त्यर्थः तथा चाविरोधप्रदर्शनस्य समर्थीत्वेनैवोपस्थितिनिवेशो युक्त इति भावः उपस्थिते विरोधित्वं प्रतिबन्ध-
कत्वं तच्च न साधनमनेनोक्तमित्यभेदान्वयः प्रयत्नेनोपपाद्यः पक्षदस्वरसेन साध्यपदस्य स्वार्थपरत्वात्तु रो

गदा० 67

धेनच कल्पांतरमाह साध्यविरोधीति तद्ग्राह्यप्रतिबंधकज्ञानविषयत्वस्यैव विषयविरोधरूपत्वात् सा
ध्यवत्ताज्ञानप्रतिबंधकज्ञानप्रतिबंधकज्ञानविषयइति विवरणसंगतिः साध्याभाववत्त्वज्ञानादित्यादिनापक्षा
हृतिसाध्यादिपरिग्रहः एतच्च यान्विनकथनंतदुपस्थितेर्विनि ह्नादृशपक्षादेः कर्मतयाउपस्थितिक्रियायाम
न्वयोपकल्पतिभावः गृहेवंपक्षे साध्यवत्ति साध्याभाववत्त्वज्ञानादेरप्रसिद्धहेतावव्याप्तिरितिचेन्नपक्षरूपावा
च्छिन्नेधर्मिणिपक्षरूपावच्छिन्नवत्ताज्ञानेपक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानप्रतिबंध
कतद्रूपावच्छिन्नसाध्यकानुमितिजननयोग्योपस्थितिप्रतिसद्धकार्यकत्वविवक्षणात् कोचित्तुयत्रबाधोदो
षः तत्रैवसत्प्रतिपक्षदोषः प्रतिहेतुपरामर्शसंवलनरूपायांतत्रैवहेतौसत्प्रतिपक्षव्यवहारीयथार्थत्वात्त्वा
घायेनैवपक्षात्त्वात्त्वात्तत्रस्मरणंतथाचसाध्यवत्पक्षकहेतौवह्निमत्तपानतत्राव्याप्तिरित्यप्याहुः वस्तुतस्तुसा
ध्यवत्ताज्ञानप्रतिबंधकज्ञानत्वेनैवोपस्थितिर्लक्षणेनिवेश्यातादृशज्ञानविषयविषयकत्वेनतन्निवेशास्य
शिरोवेष्टनेनेत्यादिरत्याघेनहेयत्वात् साध्यादिपक्षकसाध्यतावच्छेदकाद्यभावव्याप्यवत्तापरामर्शवारणाय
विशिष्टसाध्यादिग्रहाविरोधित्वेनाप्युपस्थितिर्विशेष्याजननयोग्यपोतिजननंगणर्थः योग्यत्वंचसमर्थप
दार्थः बलेसमानत्वेनविशेषणेनतस्याविवक्षितत्वादपितूपस्थितावेतिस्फुटीकृतंसमानयेसमसमासलि
खनेनतथाविधव्याप्त्यादिबुद्धा साध्याभावव्याप्त्यादिबुद्धापत्रदपिवस्तुकथनंतपाप्रतिसद्धत्वंचनतत्रयद्धात
ताद्दप्रतियोगितावह्निव्याप्याभावादिसाध्यकस्थलेवह्न्यादित्यत्पक्षविषयकानुमितिजननयोग्यपथावह्न्या
दिव्याप्यवत्त्वोपस्थित्याबाधनिश्चयरूपयाकार्यप्रतिरोधरूपायामतिव्याप्तिवारणाय साध्यवत्ताज्ञानप्रति
बंधकत्वप्रथमोपस्थितिविशेषणंबाह्निव्याप्यवत्त्वोपस्थितेरपिसाध्यवत्ताज्ञानप्रतिबंधकावच्छिन्या

प्यादिमत्त्वत्वविषयकासत्त्वग्रहालंबनत्वरूपवह्न्यादिमत्त्वत्वविषयकानुमितिं प्रतिस्वरूपयोग्यतापायथानु
तेऽज्ञानितया मेईवीरतपा साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयतावच्छिन्नानुमितिनिष्ठका
र्यतानिरूपितकारणताश्रयत्वपर्यंतं समर्थोतेनाविवक्षणीयं न च साध्यवत्ताज्ञानप्रतिबंधकतावच्छे-
दिकासाध्याभावादिप्रकारतानतद्विधेयतैव च प्रतिहेतुपरामर्शजन्यतावच्छेदिकेति तज्जन्यथा न प्रतिबंधक
तावच्छेदकविषयतावच्छिन्नत्वमित्युक्ताविवक्षणासंभव इति वाच्यं प्रकारताविशेष्यस्यैवविधेयतारूप
त्वात् अन्यथा तत्पदावच्छिन्नविशेष्यकपदावच्छिन्नप्रकारकत्वे प्रतिबंधकतावच्छेदकं तत्पदावच्छिन्नपर
कातद्वच्छिन्नविधेयकत्वावच्छिन्ननिरूपितकारणत्वमेव निवेश्यं नन्वत्तादृशोपस्थितिकालीनज्ञान-
विषयत्वमेव सम्यक्कानिति तत्प्रतिरुद्धकार्यकज्ञानविषयत्वपर्यंतनिवेशो नेत्याकांक्षायामाह विरोधीत्यादि
अप्रामाण्यग्रहविशिष्टाया व्याप्त्याद्युपस्थितेर्नविरोध्यनुमितियोग्यत्वं तद्ग्रहविशिष्टत्वेनैव परामर्श
स्यानुमितियोग्यत्वादिति न ईदृशोपस्थितिमादाय तत्र व्याप्तिप्रसक्तिरित्याशंकानिराकरोधियास्यादिविष-
यत्वलक्षणयोग्यताशालिन्यानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यतानात्रविव-
क्षितावच्छेदककोटिप्रविष्टविषयतारूपैवेति भावः अथवाऽप्रामाण्यग्रहाभाववानानुमितिजनकतावच्छे-
दकोपितत्स्वातंत्र्येण जनक एवेत्यभिप्रायेणेदं तत्र कार्यप्रतिरोधाधायकमिति तथा च प्रामाण्यग्रहाभाव-
विशिष्टविरोधिपरामर्शस्यैवानुमितिप्रतिबंधकतया गृहीतप्रामाण्यविरोधिपरामर्शस्य कार्याप्रतिरोधक-
त्वात्रोक्तस्थले तिप्रसंगः वद्यप्रामाण्यज्ञानास्कंदितविरोधिपरामर्शस्यागृहीतप्रामाण्यकबाधादिरू
द्विरूपत्वे तत्प्रतिरुद्धकार्यकत्वमपि दुर्वारमिति यथाश्रुते तिव्याप्तिरस्त्वेव तथापि विरोध्यनुमितिजनकता

५८ गदा. 68

वच्छेदकरूपस्यकार्यंप्रतिरोधप्रयोजकतावच्छेदकत्वविवक्षणेनातिव्याप्तिर्वा गृहीतयानवयवाविरोधिपरा-
मर्षानेनतरक्षणेतद्विषयकाप्रामाण्यग्रहोजायतेतत्पूर्वक्षणेऽप्रामाण्यग्रहाभाववविशिष्टतज्ज्ञानरूपप्रति-
बंधकसत्वेननतत्क्षणेकार्योत्पादाततत्क्षणेसत्प्रतिपक्षत्वंदुर्वारमेवेतिवाच्यं यत्कालीनोपस्थित्याग्र-
तिमक्षणेयस्यकार्यानुत्पादःसतदासत्प्रतिपक्षइतिविवक्षयाऽतिप्रसंगवारणात् उपाध्यायरीत्यास-
मानपदंसार्थकमपितत्तदर्थमाहसमानत्वंचेति अगृहीताप्रामाण्यकेतिस्वविषयकाप्रामाण्यग्रहाभाव
विशिष्टेत्यर्थः अथाग्रहीताप्रामाण्यकत्वशरीरेऽन्वयव्याप्त्यंशेव्यतिरेकव्याप्त्यंशेचयदप्रामाण्यतद्ग्रहाभा-
ववैशिष्ट्यंनिवेश्यंतत्रव्याप्यांशेऽप्रामाण्यग्रहसत्वेतत्रव्याप्यवगाहिपरामर्शस्यसत्प्रतिपक्षत्वाप्रयो-
जकत्वात् तथाचान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायामन्यतरव्याप्त्यंशेऽप्रामा-
ण्यग्रहसत्वेसत्प्रतिपक्षतावश्यात् नचत्वयोरपकानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्ये-
तदभाववैशिष्ट्यंनिवेशनीयंविरोधित्वंनिवेशनीयंविरोधित्वंचसमानविशेष्यकत्वानवच्छिन्नंग्राह्यं
तेनाविरोधिपरामर्शादिव्यावृत्तिरितिवाच्यं एवंसतितादृशव्याप्तिद्वयविषयकसमूहालंबनपरामर्श-
पकतरांशेऽप्रामाण्यग्रहसत्वेसत्प्रतिपक्षत्वानुपपत्तेरितिचेत्स्वीययत्किंचिद्विषयताप्रयोज्यानुमिति-
प्रतिबंधकज्ञानसामान्याभावस्यनिवेशनीयत्वात् विरोधित्वंचविरोधिपरामर्शादिव्यावृत्तंग्राह्यंसमू-
हालंबनपरामर्शस्थलेयादृशव्याप्त्यंशेऽप्रामाण्यज्ञानेनास्तितादृशव्याप्तिविषयताप्रयोज्यानुमिति-
विरोधिज्ञानसामान्याभावस्यसत्वान्नतत्रसत्प्रतिपक्षत्वानुपपत्तिः स्वविषयकपरामर्शे असतिप्राव-
यमानेपरामर्शेत्वस्यसत्प्रतिपक्षव्यवहाराविरहात् नचासतिगृहीताप्रामाण्यकेवाग्रहात्तमाध्यानुमाप

कपरामर्शयोः प्रामाण्यज्ञानाभावसहकृतपरामर्शद्वयकारणाविरहादेवानुमितिविरहो न विरोधिप
रामर्शप्रयोज्य इति समानत्वानिवेशोऽपि नातिप्रसंगावकाश इति वाच्यं तत्र उभयोरेव कारणाभावेन त
याविनिगमनाविरहेण कार्याभावप्रयोजकतायाः दुर्वारत्वात् न विरोधिपरामर्शमात्रप्रयोज्यत्वस्य प्रयो
जनविरहेणानिवेशात् यत्र प्रतिरोधिपरामर्शे बाधनिश्चयस्तत्र तत्रापि सत्प्रतिपक्षितत्वस्यैव त्वा से
त्वात् मिश्रोक्तसमानपदव्याहतिं दूषयितुमुपन्यस्यति यावदिति प्रामाण्यनिर्णयेन स्वविषयप्रामा
ण्यनिश्चयेन पतत्वाबाधकता प्रयोजकाधिकबलतायां हेतुः बाधकस्याविरोध्यनुमित्युपधायकस्य
निश्चितप्रामाण्यकपरामर्शजन्यानुमितावनिश्चितप्रामाण्यकविरोधिपरामर्शो न प्रतिबंधकः इत्यभि
मानः समानेतीति समानत्वं च विरोधिबोधानुपधायकत्वविरोधिबोधाव्यवहितप्राक्क्षणविशिष्ट
त्वाभाव इति यावत् तत्प्रतिरुद्धकार्यवत्त्वं च यदभावातिरिक्तसकलप्रकृतसाध्यकानुमितिकारणस
वधानकालावच्छिन्नतत्प्रयुक्तकार्यानुपधायकत्वं द्वित् यदभावातिरिक्तसकलप्रकृतसाध्य सकलका
रणनिवेशात् उभयपरामर्शसत्त्वे बाधेन हीनबलस्य हेतोः न सत्प्रतिपक्षत्वे कार्यप्रतिरोधनिवेशश्चैव
परामर्शप्रामाण्यनिश्चयेनाधिकबले हेतावतिव्याप्तिवारणायैवेति बोध्यं प्रतिहेतोः साध्यबाधेन ही
नबलतायां प्रकृतहेतोः सत्प्रतिपक्षतावारणाय विरोधिपरामर्शेऽपि प्रकृतहेतुपरामर्शाभावातिरिक्तस
कलकारणसमवहितत्वविशेषणं च तन्तो नामेत्र्यमनेकानुमितौ नाविरोधिपरामर्शमात्रस्याविरोधित्वं किंत्व
विरोध्यनुमितिसामग्र्या एव तथा चेतरकारणासमवहितस्य परामर्शस्य कार्याप्रतिरोधकतया विरोधिपरा
मर्शेनेतरकारणसमवहितत्वं विशेषणं देयं उभयपरामर्शयोः प्रामाण्यग्रहसत्त्वे पक्षे च प्रामाण्यनिश्चयेऽपि

गद०

69

तस्यानुमितिजनकत्वासिद्ध्याविरोधिपरामर्शस्य सामग्रीविघटकत्वात्तथैव व्याविरोधितायां न प्रतिबध्यानुमि-
तिजनकपरामर्शीयप्रामाण्यग्रहस्येतरजनकत्वमित्याशयेनाह व्यभिचारेणेति उक्तस्थले विरोध्यनुमितित्वस्यैतेन
च प्रकृतसाध्यानुमापकपरामर्शाभावरूपकारणस्य व्यभिचारप्रसंगेनेत्यर्थः अबलत्वात्प्रकृतपरामर्शः प्रा-
माण्यग्रहं विनैवोक्तालेःनुमितत्वप्रयोजकत्वात् न च सत्प्रतिपक्षत्वमिष्टमेव अन्यथा व्यभिचारेण तज्ज-
नकज्ञाने प्रामाण्यनिश्चयं विनाप्यनुमितित्वस्याजनकज्ञाने प्रामाण्यग्रहस्याबलत्वात् अनुमितिसामग्र्युच्छे-
दकत्वात् तथा च यत्र प्रकृतपरामर्शेन प्रामाण्यग्रहः किंतु विरोधिपरामर्श एव तत्रापि प्रकृतपरामर्शः प्रा-
माण्यग्रहाभावे कोटिद्वयानुमितिसामग्र्या अबलत्वात् परस्परविरोधेनैकस्याप्यनुमितेरिति सत्प्रतिप-
क्षत्वमिष्टमेवेति भावः ननु पक्षद्वये प्रामाण्यग्रहणाभावे एककोट्यनुमितेरसंभविकतया तस्य बलत्वमा-
वश्यकमित्यत आह अन्यत्रेति परामर्शान्तर इत्यर्थः तदनुपयोगात् प्रामाण्यग्रहस्यानुमित्यप्रयोजकत्वात्
बलपदस्याविवक्षितार्थकत्वेऽपि समानपदस्य निरुक्तार्थतात्पर्यग्राहकत्वेनोपादानं सार्थकयति बलपदेति लिं-
गपदोपादाने वैयर्थ्यशंकां परिहरति लिंगपदेति स्वीयलिंगत्वोपस्थितिकोति स्वनिष्ठप्रकृतसाध्यानुमापकता-
वच्छेदकविषयताविशेषरूपगमकतानिर्वाहकेत्यर्थः आत्मादेरिति अन्यथात्मनस्यापि धूमलिंगकवह्न्यनु-
मित्यौपयिकपरामर्शकालीनवह्न्यभावाद्यनुमापकपरामर्शप्रतिरुद्धस्यानुमित्यात्मककार्यकत्वसत्त्वेन
धूमादेरिव सत्प्रतिपक्षितत्वापत्तिरिति भावः न च प्रतिरुद्धकार्यत्वे प्रतिरुद्धकार्यकसहकारिलवनादिरूपधू-
मादिपरामर्शविषयत्वसंभवात् प्रतिरुद्धकार्यकमित्यनेन प्रतिरुद्धकार्यकपरामर्शविषयत्वमेवायमेव
विवक्षणीयं अनुमितेर्हेतुकार्यत्वाभावात् यत्र च तादृशविषयतायां प्रकृतानुमितिजनकतावच्छेदक-

विषयताकपरामर्शकालीनत्वनिवेशानमनुचितमित्याशयेनतथैवनिष्कृष्टार्थमाह विरोधिपरामर्श
निष्प्रकृतानुमितिविरोध्यनुमितियोग्यपरामर्शप्रयोज्याग्निमत्ताणावच्छिन्नानुत्पादप्रतियोगिप्रकृतानु
मितिजनकतावच्छेदकीभूतपरामर्शीयविषयताविशेषविषयत्वमित्यर्थः अगृहीताप्रामाण्यकपरामर्शीय
विषयताविशेषविशिष्टत्वमित्यर्थः अगृहीताप्रामाण्यकपरामर्शत्वेनानुमितिजनकतामते जनकता
वच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यतानगृहीताप्रामाण्यकपरामर्शस्येतिकार्यप्रतिरोधनिवे
शमेतद्दोषोपपत्यानेयपरित्यजतिअगृहीताप्रामाण्यकेतिबाधोपस्थितिसमये तिसाध्यवत्ताज्ञानप्रतिबंधका
त्वेसतितत्प्रतिबंध्यानुमितित्वघटेत्यर्थः साध्यवद्बाधोप्रतिबंध्यत्वनिवेशात् साध्याभावव्याप्यानुमिति
समर्थपरामर्शकालेनातिप्रसंगः तत्कालीनत्वंच एककालावच्छिन्नैकात्मवृत्तित्वसंबंधेन तद्विशिष्टत्वं ते
नव्यभिचारणपरामर्शमादायनातिप्रसंगः वह्निव्याप्यमितिअनुमितिःप्रामाणिकीत्यत्र नवसत्प्रतिपक्षत्व
मित्यत्र चयदिदेवत्वस्यतंबंधः तदभावव्याप्यवत्ताज्ञानिश्चयानंतरामिवत्तादृशानिश्चयफलेऽपितानुमितिर्जायतेता
दृशानिश्चयस्यबाधनिश्चयवत्स्वोत्पत्तिविरोधित्वात् तत्रानुमितेःप्रामाणिकत्वेनादृष्टानुमितिस्त्यादत्ता
सत्प्रतिपक्षतायामपिनक्षतिः तदग्निमत्ताणोविरोधिपरामर्शवृत्तादृष्टादनुमितिप्रतिरोधात्तभयत्रविवाद
प्रदर्शनार्थंतदभिधानेकार्यप्रतिरोधोऽवृत्तमनुपादेयइतिस्वतंत्रेण प्रकृतसाध्यसिद्ध्यौपयिकपरामर्शत्वज
न्यकार्याभावविशिष्टत्वरूपप्रतिरुद्धकार्यत्वंअगृहीताप्रामाण्यकत्वेनानुमितिहेतुतामतेऽपिनिष्पन्नमित्यर्थः
अजनितविरोधिबोधत्वेनतज्जन्यविरोध्यनुमित्यभावविशिष्टत्वेत्यर्थः विशेषणीयइतितेनतथैवविधिवह्नि
साध्यकपरामर्शेनवह्न्यभावसाध्यकहेतोर्नसत्प्रतिपक्षितत्वमितिशेषः अतएवउक्तस्थलेवह्न्यभावसाध्य

७॰ गदा॰ 70

काहेतोः सत्प्रतिपक्षत्ववारणायानुमित्युद्देश्यविरोधिबोधकान्यत्वेति सन्नार्थकमिति शेषः यथाश्रुतस्याहे-
तोर्गमकत्वोपपादकरूपविरोधकान्यत्वं लभ्यते न तु ज्ञायमानपक्षोपस्थाप्यज्ञाने तथाविधलक्षणे च तादृशव्या-
प्त्यादिमत्तयाज्ञानेन प्रकृतसाध्यकपरामर्शशून्यस्य पुरुषान्तरस्याविरोध्यनुमितिजननात् प्रकृतसाध्यकपराम-
र्शसमवहितत्तादृशव्याप्त्यादिविषयकज्ञानान्तरस्यापि सत्प्रतिपक्षत्वप्रयोजकतानुपपत्तिरतः फलतो
ज्ञानविशेषणमिति अज्ञानुमितेरप्रामाणिकत्वेपि तदानीं सत्प्रतिपक्षतोपगमेपि वाग्रिमलक्षणे विरो-
धिबोधकान्यत्वस्यानोपत्त्यापत्ति संगतिरतस्तन्मते व्यावृत्त्यन्तरमाह पक्षस्येति तदुद्धारणाय अनुमित्युपधा-
यकपरामर्शस्य सत्प्रतिपक्षत्वप्रयोजकतावारणाय तत् विरोधिबोधकान्यत्वे स्वजन्यविरोधिबोधाव्य-
वहितत्वावच्छिन्नविशिष्टेप्यन्यत्वार्थके स्वनिष्ठतादृशलक्षणवैशिष्ट्यशून्यत्वार्थके वा नन्वेवमपि पक्षप्रति-
हेतुपरामर्शोपधायिकेन तत्प्रकृतहेतुपरामर्शः अन्यतरपक्षज्ञातस्थित प्रतिबध्यान्तरदग्निमल्लक्षणे विरोध्यनु-
मितिस्तदाग्निमल्लक्षणेऽतिप्रसंगोऽदुर्वार एवेत्यत आह प्रतिमत्वेति तथा च तत्र प्रकृतहेतौ विशेषणी-
भूतपरामर्शोपविषयत्वाभावान्नातिप्रसंग इति भावः नन्वेवमपि यत्र प्रकृतहेतुपरामर्शो गृहीताप्रामाण्यकः
प्रतिहेतुपरामर्शश्चागृहीताप्रामाण्यको विद्यते प्रतिबंधकान्तरवशाच्चाग्रिमक्षणे विरोध्यनुमित्युत्पाद-
स्तत्रातिप्रसंगोऽदुर्वार एव प्रकृतहेतुपरामर्शः गृहीताप्रामाण्यकत्वस्य तन्नियतसाध्यसिद्धिगोपयता याथार्थ्य वाति-
वेशे प्रतिहेतुपरामर्शविरोधिबोधकान्यत्वसोपादानात् वक्ष्यमाणविरोधिबोधकान्यत्वं प्रकृतहेतुपरामर्श-
प्रतिसद्धकार्यकत्वरूपं प्रतिहेतुपरामर्शविशेषणं गृहीताप्रामाण्यकप्रकृतहेतुपरामर्शाच्च न प्रतिहेतुपरामर्श-
कार्यप्रतिरोध इति तादृशपरामर्शदशायां नातिप्रसंगः मूले पक्षदेशस्यान्यतरयोरिति शेषः अविरलक्रमेण

त्वद्वयोरित्यर्थः कांचिरं तद्वयोर्वेति मूलमाक्षिपति नचेत्यादिना साध्यकमाने साध्यनिश्चयः विरोधिपरा
मर्शानंतरमपि यदि साधकमानादिवशेनानुमितिर्न जायते पक्षतत्वदोषेणेति सत्प्रतिपक्षस्य दोषता नाया
तीत्यर्थः ज्ञानमिति ज्ञाणकमित्यर्थः मूले ज्ञानयोर्ज्ञानयोः प्रतिपक्षत्वात्परस्परकार्यप्रतिरोधकत्वात् ।
यथापरिति योगपद्यएककालवृत्तित्वं नत्वृत्यतिचेदितं द्वितीयपक्षस्य ग्राहकत्वात् परामर्शद्वयसत्व
लनस्यस्वपरसाधारणत्वेपि परार्थस्थले व्याप्तिपक्षधर्मता भगमपेक्ष सत्प्रतिपक्षोद्भावनेश्च प्रतिषिद्ध ।
मित्वेन प्रदृष्टाते हेतोर्व्याप्तिपक्षधर्मतयोः प्रतिपाद्यत्र मतत्वग्रहेण प्रमितत्वग्रहान्न द्वयोस्तुल्यबलत्वमित्या ।
शेपान्नद्वारोः तोभावंमृत्यति साधितावयंभावइति अधिकप्रसंगादिति हेतुद्वयप्रयोगे द्वयोर्द्वयोरुद्भा
वनेपि आधिक्यादिति भावः यथाकामत्वेनेन उद्भावने विनिगमनाविरहात्शंका निराकृतत्वात्साध्यप
गमः व्याप्तादेः प्रतिवाद्यत्र मतत्वासिद्धिः अप्रतिसिद्धत्वस्याभावाद्भावनरूपस्यात्पक्षासिद्धतया अनुमत्य
नाक्षेपकत्वादिति भावः मूले स्वात्मकतयेति साध्यतदभावयोरेकतरत्वात्वेः परानधिकरणत्वनियमे
नेत्यर्थः व्याप्तीति पक्षद्वये रन्यतरत्र स्वस्वसाध्यातिरूपितव्याप्तिपक्षधर्मतयोरन्यतरभंगश्चावश्यकइति ।
सपक्षान्यतरतेनोभयत्रावधारितेति विशिष्टसंदिग्धयोर्दोषत्वांकि प्रकरणसमस्य दोषत्वमेत्यर्थः साध्यतदभा
वव्याप्ययोरेकधर्मिणि सत्वमनुपपन्नं धर्मे हेतोपकांतरव्यास्यभावं तदा कल्पयति यदि व्याप्यभावे ।
विनातत्रोपपद्यते रत्यवधारयितुं शक्यते तदेव नोभयत्रव्याप्तिसत्वेपि साध्यतदभावोयद्युविसंदेहस्याता ।
दोभयत्रपक्षधर्मतानिर्वहतीति प्रतिसंधानेन तद्विघटनादिति सामान्यतोपिन व्याहत्यादि भगावधारणमि
तिकथमज्ञायमानस्य दोषत्वमाशंकते नचतायोरिति साध्यतदभावयोरविरोधग्रहदशायामनुमित्यप्रति

गदा.

रोधावसत्त्वपिपक्षतावच्छेदकविरोधावधारणदशायामेव तयोर्ज्ञानयोसिद्धिसंभवनाविरहादनुपपत्त्य
त्ववधारणं न दुष्टमित्याह अविरोध इति प्रतिरुद्धत्वस्य कार्यानुत्पादरूपस्य दोषतया प्रतिरुद्धत्वस्य कार्यानुत्पा
दरूपस्य दोषतया प्रतिरुद्धत्वे निश्चयसामग्रीदशायामिच्छावलात्परोक्षज्ञानानुत्पादरूपाप्रामाणिकत्वाच्चेत्याहुः
अत्राहुः संशयसमुच्चययोर्विरोधभानाभानप्रयुक्तवैलक्षण्यस्य स्वरूपचितत्वात्संशयत्वस्य विषयताविशेषरूप-
त्वमावश्यकं तादृशविषयिता च कोटिनिरूपिता कोटिकपरागेणैव संदेहीति प्रतीतेः तत्तत्कोटिनिरूपित
विषयताविशेषभिन्नतत्तत्कोटिविषयताशालित्वं तत्तत्कोटिनिश्चयत्वं तथा च निश्चयत्वघटकविषयता-
याः संशयसाधारणत्वे तथापि निश्चिनोमीति प्रतीत्यापत्तिरिति तस्मात्तद्व्यावृत्तत्वमावश्यकं तन्निवेशे ह-
स्तु संशयसामग्र्यास्तादृशविषयिताशालिज्ञानप्रतिबन्धकतयैवेच्छालाघवज्ञानघटितसामग्रीद्वया
त्संशयस्वीकर्तॄणामपि निश्चयत्वघटकनिरुक्तविषयितायास्तादृशसंशयव्यावृत्त्यर्थं लाघवज्ञानघ-
टितविपरीतकोट्यनुमितिसामग्र्यास्तत्कोटिनिरूपिततादृशविषयताशालिज्ञानप्रतिबन्धकत्वमावश्य-
कं तथा च लाघवात्संशयत्वघटकविषयिताभेदमनिवेश्यैव तत्कोटिप्रतिकारित्वस्य तादृशसामग्रीप्र-
तिबध्यतावच्छेदकत्वोपगमान्नोक्तसामग्रीद्वयात्संशयानुमिति नच संशयघटककोटिप्रकारिता-
कज्ञानत्वेन तत्कोटिनिश्चयत्वेऽपि तत्तादृशप्रकारिताशून्यतत्कोटिप्रकारकज्ञानत्वे तथा च संशयेनि-
श्चयवृत्तिविषयितास्वीकारेऽपि न क्षतिरिति वाच्यं एकधर्मावच्छिन्नेन तत्कोटिसंशयरूपस्यान्यधर्मावच्छि-
न्नांशे तत्कोटिनिश्चयस्य संग्रहाय तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपितविलक्षणविषयताशून्यत्वस्य त-
त्तद्धर्मावच्छिन्नविशेष्यकनिश्चयत्वशरीरे निवेशालयप्रसंगात् अत्र ग्राह्याभावेः व्याप्यवृत्तित्वग्रहदशा

71

यांतद्व्याप्यवत्तानिश्चयस्यापितद्विपरीतज्ञानाप्रतिबंधकतयातत्राप्यितद्धर्मिकाव्याप्यवृत्तित्वग्रह॰
स्यैतेनैगतत्वमपेयं एवंचकपिसंयोगतदभावयोर्दैशिकाव्याप्यवृत्तित्वग्रहदशायांपक्षतावच्छेदकशा
खादिरूपैकावच्छेदेनतदुभयकोट्यवगाहमानायंधत्तदभावेऽस्योः कालिकाव्याप्यवृत्तित्वग्रहदशा॰
यांपक्षतावच्छेदकात्मक्षणावच्छेदेनतदुभयकोटिमत्त्वावगाहमानाचसंशयानुमितिर्ग्राह्याभावव्याप्यव
त्ताज्ञानप्रतिबंधकतयानशक्यतेवारयितुं नचाव्याप्यवृत्तित्वज्ञानस्यसंशयाविरोधितयाः व्याप्यवृत्तित्वज्ञा
नकालेसमुच्चयएवभवति नसंशयइतिवाच्यं यतोविरोधग्रहएवाव्याप्यवृत्तित्वग्रहस्यविरोधितयाको
ट्योर्विरोधावगाहिसंशयएवतयोरव्याप्यवृत्तित्वग्रहदशायांनसंभवतिविरोधावगाहिनएकदेशावच्छेदेनै॰
ककालावच्छेदेनैवैकवाकोटिद्वयमवगाहमानस्यसंशयस्यतदानीमुत्पत्तौवाधकाभावः नहितादृशज्ञा
नंकोटिद्वयनिश्चयरूपंसंभवति समानकालदेशावच्छेदेनतत्तदभावनिश्चययोरव्याप्यवृत्तित्वग्रहका
लीनयोरपिमिथोविरोधित्वात् अव्याप्यवृत्तित्वेपिभावाभावयोरेकावच्छेदेनवृत्तेरसंभवात् अव्याप्यवृ
त्तितयातादृशनिश्चययोर्विषयविरोधापरिहारात् नचयदितादृशदेशाद्यवच्छेदेनतदभावनिश्चयस्तद
वच्छेदेनविशिष्टबुद्धिग्राह्याभावधर्मिकाव्याप्यवृत्तित्वग्रहदशायामपिप्रतिबध्नाति तदातादृशाव्याप्य
वृत्तित्वग्रहदशायामेवावच्छेदकावच्छेदेनग्राह्याभावव्याप्यवत्ताज्ञानमपितादृशानुमितिविरोध्यात् त
थावच्छेदेनानुमितावच्छेदेनहेतुमत्तापरामर्शस्यैवहेतुतयातादृशयोस्तुपरामर्शस्यैवहेतुतातयातादृशयो
श्चपरामर्शयोरवच्छेदकावच्छेदेनविपरीतसाध्यवत्ताज्ञानप्रतिबंधकतयानोक्तसंशयानुमितिसंभवइतिवाच्यं
अवच्छेदकसामानाधिकरण्येनहेतुमत्ताज्ञानादपिदेशकालरूपपक्षतावच्छेदकेवाधाभावबलात् स्वह॰

एवं च तद्रूपावच्छेदकत्वमवगाहमानायामनुमितेर्मणिकारादिभिरुपगमात् वस्तुतो ग्राह्याभावस्याव्या-
प्यवृत्तित्वेपि तदवच्छेदावच्छेदकावच्छेदेन ग्राह्यवत्तासंभवाद्धि विषयविरोधेनावच्छेदेन विशिष्टबुद्धौ तद-
वच्छेदेन ग्राह्याभावज्ञानप्रतिबंधकतायामेव तद्धर्मिकाव्याप्यवृत्तित्वग्रहाभावोऽपेक्षितः तादृश-
तद्व्याप्यवत्ताज्ञानस्य तादृशविशिष्टबुद्धिप्रत्यपि विरोधित्वे तु तादृशाव्याप्यवृत्तित्वग्रहाभावोऽपेक्षित-
एव ग्राह्याभावस्याव्याप्यवृत्तित्वे ग्राह्यावच्छेदकावच्छेदेन ग्राह्याभाववति वर्तमानस्यापि तद्व्याप्यतया-
विषयविरोधविरहात् साध्यावच्छेदकावच्छेदेन साध्यवति वर्तमाने यद्देशकालावच्छेदेन तत्र साध्यामिति
व्याप्तिन संभवती चेत्कास्ततिः नहि पक्षतावच्छेदकदेशकालावच्छेदेन साध्यानुमितौ तदवच्छेदेन सा-
ध्यामितौ तदवच्छेदेन साध्यानुमितौ तदवच्छेदेन गृहीततादृशव्याप्तिकहेतुमत्ताज्ञानपरामर्श एव हेतुरित्यव-
च्छेदकावच्छेदेनानुमितिस्थलेऽसिद्धिव्यभिचारासंकीर्णबाधस्य हेत्वाभासत्वव्यवस्थापितवतो मणिका-
रस्यानुमतं तथा सति सल्लिंगपरामर्शाद्बाधानुमित्यसंभवेन बाधदोषान्तरासंकरस्य दुर्घटत्वात् तथाव-
वच्छेदकदेशकालाघटिता प्रतियोगिव्यधिकरणाभावघटितव्याप्तिरपि तन्मतेऽवच्छेदेनानुमितिप्र-
योजिका तादृशव्याप्त्यवगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शस्यापि विपरीतकोट्यनुमितिप्र-
तिबंधकत्वे ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वज्ञानाभावोपि अपेक्षित इत्यवच्छेदकावच्छेदेन हेतुमत्ताप-
रामर्शस्य तदवच्छेदेन साध्यानुमितावपेक्षितत्वेपि दर्शितरीत्या संशयानुमित्युपपत्तिरित्यादिदिशा यथाश्रुतमू-
लासंगतिरतो व्याचष्टे प्रतिरुद्धत्वेनेति पक्षत्र धर्मिणि मिथो विरुद्धयोः साध्यतदभावव्याप्यत्वेन ज्ञानय-
दि निश्चयरूपं स्यात्तदा परस्परप्रतिबंधेन नोत्पद्यत एवातो व्याप्यांशे पक्षधर्मतांशे वा संशयरूपमेव तत्र

याचकारणीभूतनिश्चयाभावादेवानुमित्यनुत्पादेन न तु सत्प्रतिपक्षभावात् इत्याहेत्येऽभयोरेकत्र निश्च
यानंतरमित्यादिना विरोधिद्वयव्याप्यवत्तानिश्चयस्य व्याप्त्यादिसंशयोपजीव्यत्वाभिधानेन संगच्छते तादृश
निश्चयस्यैवानुपपत्तेरित्याशयादतो भावमाह परस्परेति साध्यतदभावव्याप्यत्वेहि हेत्वोः साध्याभावसाध्ययो
रेव विरोधः ननु परस्परं तयोः परस्परविरुद्धत्वेन ज्ञानयोरेव नैकत्र निश्चय इति तदग्रहे परस्परव्यापकविरु
द्धत्वेन ग्रहेपि हेत्वोरेकत्र निश्चयः संभवत्येवेत्यर्थः रूपकतावीजमित्यादिग्रंथस्य रूपकत्वेति ग्रहप्रयो ।
जकत्वे तु रूपकत्वमिति यावदित्येतादृशार्थपर्यालोचनाया विरोधिपरामर्शप्रतिबंधेनानुमित्यजनकत्वं सत्प्रति ।
पक्षस्थले हेतोर्दुष्टताप्रयोजकं न तु निर्णयाजनकत्वमात्रं विरोधिपरामर्शशून्यदशायामपि कारणविरहेणा
नुमित्यजनकतया सद्धेतोर्दुष्टतापत्तेः नापि विरोधिपरामर्शज्ञाप्यमानो व्याप्तिपक्षधर्मताविरहः सद्धेतोस्तदस
त्वेन विरोधिपरामर्शसंवलनदशायामपि तस्य दुष्टतानुपपत्तेः विरोधिपरामर्शप्रयुक्तव्याप्तिभंगज्ञानं प्रमप्र ।
मासाधारणं वा सद्धेतौ साधारणदुष्टताप्रयोजकमित्यर्थः नित्यदोषानभ्युपगंतमतेन संभवतीति तमन्यथा ।
व्याचष्टे विरोधीत्यादिना तस्य विरोधिपरामर्शस्य विरोधित्वे कल्पयतीति एवं च रूपकताप्रयोजकविरोधिपरामर्श ।
निष्ठप्रतिबंधकतापरं वीजपदं विकल्पाघटकं वोध्यं व्याप्त्यादिविरहस्य स्वरूपमसतो हेत्वाभासत्वप्रसक्तेरन्यत्रैव ज्ञाप्यमा ।
नस्य तथात्वे च विरोधिपरामर्शानुपयोगितया तत्संवलनदशायामपि सत्प्रतिपक्षतापत्तिरतो न त्वित्यनंतं वेते
न ज्ञाप्यमानमिति हरणीयमित्याशयेन व्याचष्टे तेनेति सद्धेतावपि व्याप्तिपक्षधर्मताविरहस्य ज्ञाप्यतादृशफ
लप्रतिकानंतरं फलयति तस्येति विरोधिपरामर्शस्येत्यर्थः सत्प्रतिपक्षत्वादिति मूलस्य व्याख्या अनुमितेति ।
विरोधित्वादिति रूपकत्वं विरोधिपरामर्शस्यानुमितिविरोधित्वं एतन्मतस्य रूपत्वाद्याकारमनिर्भरं रूपकतत्र ।

गदा.

याख्याचष्टे वाकारइति अनुमितिप्रतिरोधेनानुमित्यनुत्पादानुरोधेनविरोधिपरामर्शस्यतत्त्वात् साक्षा
देवप्रतिबंधकत्वात् अन्यथाव्याप्तिभ्रमज्ञानेस्यादीश्वरतयासाक्षादनुमित्यविरोधितयाचविरोधिपरामर्श
संवलितपरामर्शात् पृथगनुमितिर्जन्यतएवबाधकाभावः परंपरयाव्याप्तिज्ञानविरोधित्वेनहेत्वाभासता
यामप्युपयुज्यतइत्याह परेतिप्रथमपक्षेविरोध्यनुमितिसामग्र्याअनुमितिविरोधित्वेप्रत्यक्षप्रतिबंधकत्व
मपितस्याःस्यात् विरोधिज्ञानसामग्रीत्वाविशेषादित्याशंक्यपक्षे दोषेष्वित्यादिग्रंथमवतार्यफलत्वानुरोधे
नप्रत्यक्षसामग्र्याःवलवत्त्वमित्यर्थकतयाव्याख्यानमफलाभिन्नविषयेअनुमितिसामग्र्याःप्रत्यक्षसाम
ग्रीतोवलवत्त्वादेतत्पक्षेत्यादिपत्तएवव्याप्तिसापेक्षप्रमाणपरत्वेहृदयकत्वासंभवतीतिवक्ष्यादेरनथाभू
ततयातत्प्रतिरोधकत्वाद्विरोधिपरामर्शस्यनस्यादित्याशंकयाचक्षुरादेश्चेतिफक्किकामवतार्यइदृशापत्ति
परतयाभिश्राव्याख्यातवंतः तत्त्वविरोधिपरामर्शस्यलौकिकचाक्षुषादिप्रतिबंधकत्वेप्युपनीतभानेज
ननीयेचक्षुरादेःशब्दस्यचप्रतिरोधकतायोकथ्यतापाश्वनिवृत्तेःस्वयंविशिष्टबुद्धौतदभावव्याप्यवत्ता
बुद्धेःसाक्षात्प्रतिबंधकतयाहृदयकत्वेनिर्भरस्यवर्णितत्वात्प्रत्यक्षप्रतिबंधकत्वानुपपत्तिशंकयैवतादृ
शमूलमवतारयति नत्वत्रविरोधिपरामर्शः तद्विपरीतव्याप्यवत्तानिर्णयरूपः विपरीतनिर्णयविरो
धितद्विशिष्टज्ञानविरोधी[illegible]विघटनेपीनत्वाभावव्याप्यवत्त्वादीनिश्चयवसतिचानुमितिप्रतिबंधा
वाधादौ चक्षुरादेश्चेतिचकारस्यानुमानशब्दसमुच्चायकतानसंभवति तस्याचमानप्रतिरोधत्वादत
आहचत्वर्थइति नानुमानेनप्रतिरोधइतिमूलस्यदोषविशेषाधीनज्ञानेजननीयेइत्यादि तदुपस्थिता
वपीति विरोधिपरामर्शसत्त्वेपीत्यर्थः तस्यदोषादिसमवहितचक्षुरादे रधिकवलत्वात् अधिकवत्व

त्वोपगमात् अप्रतिबध्यफलकत्वोपगमाच्चेति यावत् तथाच दोषविशेषाद्यजन्यत्वे सामान्याकारित्व
व्यंजकदोषविशेषाजन्यज्ञानसाधारणविषयिताविशेषशून्यत्वं वा विरोधिपरामर्शप्रतिबध्यतावच्छेदक
कोटावबाधकफलबलेन निवेशनीयमिति भावः एवं विरोधिसामग्र्या निश्चयविरोधित्वे यद्यपि वि
रोधिपरामर्शस्य तदभावव्याप्यवत्ताज्ञानविधयैव विशिरोमणिमते प्रतिबंधकत्वं तन्मते मूलस्य सामग्रीप
देनापि साध्याभावव्याप्यवत्तापरामर्शस्य विवक्षणीयत्वात् तथापि सामग्रीपदस्य यथाश्रुतपरत्वाभिमाने
नेदं पक्षधर्मतावादिवाक्यमात्रस्येत्यत्र मात्रपदेन साध्याववोधकानुमानापेक्षाया व्यवच्छेदः तुल्यबलत्वस्य
नास्कन्दिततया निश्चितत्वे लक्षणायोगः प्रतिरोधप्रयोजकसमानबलत्वायोगः समानबलत्वेनास्कन्दितत
या निश्चितत्वे प्रतिरोधदर्शनमेवेति दोषः अधिकबलत्वेऽनास्कन्दिततया निश्चितत्वे शोधानुभववत् शोधा
नुमानस्यैव तेन न विरोधकथा हेतुनवाधाविरोधिनिश्चयजननं परार्थस्थले मध्यस्थस्य पक्षे साध्यमिव सा
ध्यतदभावग्राहकमानयोराभासत्वसंदेहे न तु उभयोरपि नाभासत्वमाभासत्वं वा निश्चितं प्रमाणान्तरेण
तन्निश्चये साध्यस्यापि प्रमाणान्तरेण निश्चयसंभवात् विवादपर्यवसानापत्तेरिति समानबलेन तथा प्रतिवा
दिना हि प्रतिसंधानादेवानुमानमित्याह अग्रेस्यमाणेति दीधितौ न ह्येतेति तर्हि कथं प्रतिरोधकतया कथा
यां प्रत्यक्षादेरुपन्यास इत्यन्वयः अनुमानएवेत्याह प्रबलसत्वादिति भावः मूले प्रतिरोधः अप्रतिरोध
कतया कथायां प्रत्यक्षादेः उपन्यासः दीधितौ तावन्नेति व्याप्तिपक्षधर्मताभ्यां ज्ञाप्यमानत्वं हेतुलिंगभाव
मप्रदर्श्यापि प्रत्यक्षादेः प्रतिरोधकतया अनुपन्यसनीयत्वम् इत्यर्थः मूले तदुपन्यासानर्हत्वादिति लिं
गभावानाधायकप्रमाणोपन्यासानुपयोगितोपन्यासकत्वादित्यर्थः हेतुस्वरूपेण तदुपन्यासानुपयोगित्वं व्या

गदा.

२३

वस्थापयति विरोधितो प्रत्यक्षस्येति स्वरूपसत्त्वैव स्वज्ञानमनपेक्षैव बोधकत्वादिति तथा चोपन्या-
सस्य परज्ञानमेव फलं प्रत्यक्षस्य प्रमाणस्य च यदि ज्ञानमनपेक्षैव बोधकत्वादिति तथा चोपन्यासस्य प
रज्ञानमेव फलं प्रत्यक्षस्य प्रमाणस्य च यदि ज्ञानमेवानुपपन्नं तदा तदुपन्यासोपयोग इति भावः न
नु प्रत्यक्षस्य ज्ञानानपेक्षस्य बोधकत्वे तथात्वे तदुपन्यासस्य विरोधिज्ञानसामग्र्यसंपादकत्वेऽपि शब्दादिपदग्र
ग्रशब्दस्य ज्ञातस्यैव बोधकत्वे तथात्वे तदुपन्यासस्य विरोधिज्ञानसामग्रीसंपादकतया उपयोगित्वे इत्यत आह
वेत्यत आह विरोधिवाक्यज्ञानमात्रस्येत्यर्थः मात्रपदेन कारणान्तरसाहित्यव्यवच्छेदः अविरोधित्वा
दिति तन्मात्रस्याविरोधिकेऽपि समानीत्यविरहादिभावः तथापि कारणान्तरसाहितज्ञानस्यैव प्रतिरो-
धोपयोगित्वात् तथा ज्ञापनं सार्थकमित्यत आह बोध्येति तथा च व्याप्यवत्तामात्रमर्थ्यशब्दाद्विरोधिवा
क्यज्ञानादिसत्त्वेऽपि तदभावव्याप्यवत्तानिश्चयाभाववत्त्वादित्यपाह सामग्र्याः कथंचिदप्यसंभवेन लि-
ङ्गाभावान्नायं शब्दप्रमाणोपन्यासो न विरोधिज्ञानसामग्रीसंपादयतीति न कश्चिदुपयोग इति भावः
इदमुपलक्षणं पक्षे साध्यं नास्तीति वाक्यस्यानुमानविरोधप्रकारेणैव ज्ञानपक्षे साध्याभाववत्त्वावगा-
हि विरोधिबोधसामग्रीघटकतां तादृशवाक्यज्ञानप्रत्यक्षात्मकतां हेत्वाभासवाक्यप्रयोगादेव संपद्यते न त
साध्याभावप्रमापकतया प्राप्तविषयः पक्षे इत्याद्याकारकतदुपन्यासादिति न कथंचिदपि तादृशोप-
न्यासस्य प्रतिरोधकत्वेऽपि बोध्यं सूत्रेऽपि कामिति प्रत्येकहेतुत्वसिद्धलिङ्गतावच्छेदकावच्छिन्नस-
त्वात् पक्षसत्त्वात् पक्षविधया उद्देश्यव्यवहारविषयः ननु विशिष्टहेतुप्रतिहेतुसाधारणरूपावच्छि-
न्नेतादृशोपन्यासप्रयोजकमिति सपक्षवत्तया उद्देश्यबीजत्वं तादृशोद्देश्यव्यवहारानुपपत्तिरित्यर्थः

विरोधिभानसामग्र्याः संशयविरोधित्वे संशयमात्रोच्छेदप्रसंग इति प्रकरणसमो विरोधिभानसामग्री
विधया संशयद्वयानुमितिं मा प्रतिरौत्सीत् विरोधिविषयकत्वेन बाधवदभावव्याप्यवत्तानिश्चयस्य
प्रतिबंधकत्वं तु दुर्वारमिति शंकते मूलेन च संशयद्वयानानुमितिरित्यादिना बाधबुद्धेर्विरोधिविषयत्वमात्रं
न प्रतिबंधकत्वे तंत्रं किंतु निश्चितप्रामाण्यकत्वे सति विरोधिविषयत्वं सत्प्रतिपक्षस्थले च उभयव्याप्यव-
त्ताज्ञानयोरेव प्रामाण्यनिश्चयात्रानुमितिप्रतिरोध इति समाधत्ते अधिकबलेनेति अत्र प्रत्यक्षे समानब-
लयोर्ग्राह्याभावग्रहसामग्रीशिथिलयोरनुपपत्त्या विरोधिन्यास्तत्रानुमितौ तस्याः प्रतिबंधकत्वे कालानिर्वत्यत आ-
ह साध्याभावबोधस्येति साध्याभावनिश्चयस्यैवेत्यर्थः तत्रानुमितौ न यत्नादेरित्यादिना विरोधिपराम-
र्शपरिग्रहः न यत्नग्रहणं दृष्टांतार्थं मानाभावादिति प्रवणोक्तं प्रत्येकाम्मिति एकैककोटिनिश्चयजनकत्वेऽ-
नावधारितात्परामर्शादित्यर्थः कथं संशय इति संशयत्वावच्छिन्नं प्रति परामर्शस्याहेतुतायाः क्लृप्त-
त्वादिति भावः संशयत्वस्य जन्यतावच्छेदकत्वेऽपि तत्तत्प्रकारकज्ञानत्वावच्छिन्नोत्पत्तिनियामकसामग्री-
त एव सर्वत्र संशयः प्रत्येककोटिभानसामग्र्याः संशयत्वावच्छिन्नजनकत्वे प्रत्यक्षस्थलेऽपि नास्तीत्याह
प्रत्येकादीति तथा च तत्तत्प्रत्येकसाध्यकानुमितित्वस्य निश्चयसाधारणतत्तत्साध्यव्याप्यवत्तापरामर्शजन्य-
तावच्छेदकत्वेऽपि तद्घटितसामग्रीसमाजात् संशयानुमितिस्त्वनिर्निग्रहप्रसह्यैवेति भावः अगृहीताप्रामा-
ण्यकत्वसहितमित्याशयेन दूषयति तन्नेति रत्नकोशकारमतं परिष्कृत्य आरभते दीधितौ रत्नकोशकृ-
तामित्यादिना संशयत्वे यजन्यतावच्छेदके तद्घटितसामग्रीत एव संशयत्वावच्छिन्नोत्पत्तिनियमेऽनु-
मितेः संशयत्वेऽसंभवति अनुमितिसामग्रीघटकस्य परामर्शादेः कस्यापि संशयत्वावच्छिन्नाजनक-

गद०

त्वात्तः संशयत्वस्य जन्यतावच्छेदकत्वाभावं मूलकारो मंगप्रतिवंदिरूपवचनेन सूचयति एकधर्मिकेति
अविरुद्धज्ञाने वा प्रकारकोऽसम्भवं एव वक्ष्यमाणज्ञानत्वेन संबंधः प्रकारांशे संशयत्वघटितकाविरुद्धत्वावि
परीतविशेषणघटितधर्मस्य जन्यतावच्छेदकत्वप्रसक्तिं प्रदर्श्य धर्मिपदेन सूचकेकत्वविपरीतविशेषणघ
टितस्य प्रकारांशे विशेषणीकृत्वविरुद्धत्वाविरुद्धत्वमेदेनाभिन्नस्य तथात्वापत्तिमपि सूचयति ना
नाधर्मिकेति एकान्त्वस्य प्रकारांशे विरुद्धत्वयोर्नानापदार्थे प्रत्येकमन्वयः न जन्यतावच्छेदकं कस्या
पीतिशेषः नन्वेवं बाधिज्ञाने संशयत्वे का विनिगमना इत्यत्र किं नियामकमित्यत आह धर्मिकेति एकवृत्तादिध
र्मिकेत्यर्थः तत्प्रकारकेति वह्निवह्न्यभावादिप्रकारकेत्यर्थः प्रयोजकसमाजेति तदवच्छिन्नोत्प
त्तिनियामकसामग्रीसंवलनेनेत्यर्थः समाजस्य एकवृत्तादिधर्मिकवह्न्यादिप्रकारकत्वतदभिकवह्न्यभा
वादिप्रकारकत्वयोर्वैशिष्ट्यस्य तथा चैकमात्रकोटिमानप्रयोजकसामग्रीरूपायां यज्ज्ञानं जायते तत्र
तत्कोटिप्रकारकत्वप्रयोजकसामग्र्याः कोट्यन्तरप्रकारकत्वप्रयोजकसामग्रीवैशिष्ट्यस्य विरहात्ज्ञात
द्वयकोट्यन्तरप्रकारकत्वविशिष्टतत्कोटिप्रकारकज्ञानत्वरूपसंशयत्वविरहः कोटिद्वयमानसामग्र्यां त
दृशस्य जायते न त्वनादृशप्रयोजकवैशिष्ट्यमत्वेन तादृशसंशयत्वमिति संशयत्वस्य जन्यतावच्छेदकत्वेन
नियमानिर्वाह इति भावः ननु कोटिद्वयावगाहिज्ञानत्वमात्रेण संशयत्वे कोटिद्वयसमुच्चयसाधार
णत्वात् किं त्वेककोट्यंशे अपरकोटिविरोधावगाहित्वसहितं तादृशस्य कोटिद्वयमानप्रयोजकसंवल
नमात्रेण नियामकं समाज्ञत्वेऽपि समुच्चये संशयत्वाभाववदतिसंशयत्वप्रयोजकमन्यदेवाकि विरुद्धगेन
त्व यतः क्वचिद्द्वयोभयावगाहिज्ञाने संशयत्वमिति नियम इति तस्यैव कार्यावच्छेदकत्वं संशयत्वमात्रस्य का

मित्यत आह घटादिरिति उभयप्रकारकइतिशेषः तथाच विरोधमानस्य सामग्रे कोटिद्वयप्रकारकज्ञा-
नहेतुत्वात्तथाइत्यर्थः तत्प्रयोजकाधीनत्वादिति अप्रामाण्यग्रहनिश्चयज्ञानाभावादिघटितविरोधमानप्रयोजकत्व-
संसामग्र्यंतरस्य सत्त्वादिनयात्वप्रयोज्यत्वादित्यर्थः तथाच तत्संवलनस्यापि विरोधभानघटितसंशयत्वप्रयोज-
कतया समुच्चयस्थले तद्विरहान्नैव संशयत्वविरह इतिभावः उक्तयुक्तिभिः संशयत्वस्य कार्यतावच्छेदकत्वावेद-
नैव स्वरसतीति मनुरुध्य वस्तुतः संशयत्वस्य कार्यतावच्छेदकत्वे तस्य धर्मितावच्छेदका प्रकारकज्ञानजन्यतावच्छे-
दकतया एव स्वीकरणीयतया यथा प्रत्यक्षस्थले तद्रूपभावप्रकारकज्ञानसामग्रीद्वयसहितधर्मिज्ञानरू-
पासमग्री संशयं जनयति तथानुमितिस्थले पितादृशधर्मिज्ञानात्मकसामग्र्याः संशयजनने न किंचिद्बाधकं न च
माभूत्संशयत्वं जन्यतावच्छेदकं तथापि निश्चयत्वावच्छिन्नहेतुभूतात्परामर्शादितः कथं संशयानुमितिरिति वा-
च्यं कया निश्चयत्वस्यापि जन्यतावच्छेदकत्वं निराकरोति नीलेतरेति यथाच घटे नीलरूपवद्भेदात्मकनीले-
तरत्वप्रयोजको घटे नीलोत्पादकसामग्रीविरहः घटत्वप्रयोजकं च घटत्वावच्छिन्नहेतुदेशादिघटितसाम-
ग्रीजन्यत्वं तत्संवलनाधीनं नीलेतरत्वघटत्वयोः संवलनमिति तदेव नीलेतरत्वविशिष्टघटत्वनियामकमिति
तस्य किंचिज्जन्यतावच्छेदकत्वेपि कस्यचिदेव घटस्य तथात्वमिति नियमः एवं पटादिज्ञाने घटत्वप्रकारकतावि-
रहस्तत्पूर्वकालीनघटत्वप्रकारकत्वावच्छिन्नजनकघटत्वज्ञानादिघटितसामग्रीरूपतत्कारणत्वप्रयोजकविरह-
प्रयोज्य इतिज्ञानत्वप्रयोजिततत्पूर्वकालीनसामान्यसामग्रीघटत्वप्रकारकत्वावच्छिन्नोत्पादकसामग्रीविरह-
चेद्वयोः संवलनं घटत्वाप्रकारकत्वं ज्ञानत्वयोः संवलनप्रयोजकं तदेव जन्यतावच्छेदकस्यापि एकविशिष्टपरस्य
प्रयोजकं एवमेकधर्मिकाविरुद्धानेकप्रकारकत्वे संवलितनानासामग्रीप्रयोज्यं तद्विरहप्रयोज्यं तद्विरहत्वेपि

२ गदा.

75

नानियमः तथा निरुक्तनिश्चयत्वस्यापीत्यर्थः यद्यपि तत्प्रयोजकसमाजनियम्यजन्यतावच्छेदकतत्संवलितज्ञा
नत्वप्रयोजकप्रयोज्यं तद्द्विशिष्टज्ञानत्वमिति यथा तस्य जन्यतावच्छेदकतया एकधर्मिकाविरुद्धनानाप्रकारकज्ञा
नत्वमेव पूर्वं दृष्टान्ते प्रोक्तं तथापि तत्र सामग्रीद्वयप्रयोजकसमाजनियम्यत्वमेव न तु सामग्रीविरहसामग्रीसमाज
नियम्यत्वं निश्चयत्वे च तादृशामेवेति प्रकृतसामान्यग्रहणं तात्पर्यं तत्र प्रथमे तज्जनकसामग्र्यभावसंवलनस्य
तद्वदन्यत्वविशिष्टप्रयोजकता द्वितीये तदवच्छिन्नजनकसामग्रीविरहसंवलनस्य तृतीये तद्घटकनानाधर्माव-
च्छिन्नहेतुभूतनानासामग्रीसंवलनविरहसंवलनविरहसंवलनस्येति उक्तरीत्या निश्चयत्वसाम्योत्कटमिति
बोध्यं एवं चेति संशयनिश्चययोर्जन्यतावच्छेदकत्वे चेत्यर्थः तुल्यबलाभ्यां परस्परकार्याविरोधिनीभ्यां संशय-
द्वयं भवतीति तथा च सत्प्रतिपक्षसंवलनस्थले तुल्यबलकोटिद्वयानुमितिसामग्रीभ्यां संशयरूपानुमितिर्जन्य
तयेति भावः अथ तत्र भविरोधभासकाविरोधावगाहिपरामर्शघटितसामग्र्यभावाद्विरोधो न भासितुमीष्टे
तथा च कथं संशय इति चेन्न सत्प्रतिपक्षतादशायां कोटिद्वयनिश्चयानुत्पादस्योभयवादिसिद्धतया तन्निर्वा
हाय परस्परजन्यकार्ये विरोधानुमितिसामग्र्याः प्रतिबंधकतायेत्तया विरोधभानप्रतिबंधकाभावसहका-
रेणाविरोधाविषयकस्यापि परामर्शस्य विरोधभानप्रयोजकतया लाघवेन कल्पनादनुपस्थितस्यापि विरोधस्य
प्रकारतया भानात् संभवेपि विरोधसंबंधेन एककोट्युल्लेखे परस्परतया एककोटिसंबंधनिष्ठसंसर्गतायाः को
ट्युल्लेखे परस्परतया वा भानोपगमात् अन्यथा यत्र कोट्योर्नो विरोधग्रहः न वा विरोधस्योपस्थितिर्वर्तते त-
त्र सामग्रीसमाजात् प्रत्यक्षात्मककोटिद्वयनिश्चयस्य दुर्वारत्वात् अथ यत्र कोट्योर्नो विरोधग्रहः अथ च
धर्मिणि विरोधसंबंधेनैककोटिविशिष्टापरकोटेर्विरोधविशिष्टसंयोगादिसंबंधेन च कोट्योर्बाधग्रहः तत्र

कथंचिदपि विरोधभानासंभवेन प्रकारप्रतियोगितद्भावनिश्चयरूपानुमितिर्जायतामिति चेत् प्रत्यक्षस्थले
ऽपि योगजन्यः अथ धर्मिणि संशयान्यतरज्ञानं प्रति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टतद्विरोधिधर्मवत्ता
ज्ञानसामग्री प्रतिबंधिका निदर्शितस्थले परस्परविरोधेन न तत्तदभावयोः प्रत्यक्षनिश्चयोपि प्रत्यक्षानुमित्यादि
सामग्रीणां चानुगतरूपेण प्रतिबंधकताकल्पनासंभवात् अनुमितिस्थले विरोध्यनुमितिसामग्र्याः प्रतिबं
धकत्वे कल्पनीये संशयान्यत्वेन प्रतिबध्यतावच्छेदकगर्भे निवेश्यत इति न संशयानुमितिर्वर्तते अत्रार्वाची
नाः संशयत्वं न विरोधावगाहित्वं नियतं न ग्राहि यथा लौकिकसंनिकर्षजन्यसाक्षात्कारोमीति प्रतीतेर्विष
यताविशेषः अनुमिनोमि शाब्दयामीति प्रतीतेश्चानुमितिशाब्दयोः साध्याभावयोर्विषयताविशेषोऽदृष्टः एव तत्
था संदेह्मीत्यनुव्यवसायबलात् संशयेऽपि कोटिद्वये विलक्षणविषयतानिरूपितरूपेव तन्निरूपितयोगित्वमेव संशयत्वं
न तु विरोधानवगाहिज्ञानसाधारण्येन किंचिद्बाधकं न च तादृशप्रतीतेर्विरोधावगाहि समानधर्मिकतत्तदभा
वावगाहिज्ञानत्वावलंबनयैवोपपत्तेर्विषयताविशेषे किं मानमिति वाच्यं सावित्रे संशये विरोधस्य सांसर्गिक
विषयतायाः प्रमाणांतररहितायाः उक्तातिप्रसंगवारणाय सामग्रीप्रतिबंधकतायाश्च कल्पनामपेक्ष्य ला
घवेन कोटिताख्यविलक्षणविषयताया एव कल्पयितुं युक्तत्वात् सा च प्रकारताभेदः तदन्यैव वा कोटि
विशेष्यकसंशयसाधारण्यानुरोधात् न च तादृशविषयतानिरूपविलक्षणंमूर्धे अखंडोपाधेरपसिद्धांतक
वलितत्वादिति वाच्यं एवं सति विषयतात्वप्रकारतात्वादीनामपि विलयप्रसंगेन बहुतरसामंजस्यात् तत्वा
विरोधिकोट्यंतरविषयकत्वेन ज्ञाननिरूपितत्वमेव समुच्चयविषयताया व्यावृत्तस्तद्विशेषः संशयमात्रवृत्तकोटिवि
षयकत्वयोर्गियोवच्छेदकभावोपगमात् तादृशविषयताप्रणालिबुद्धौ च मणिमंत्रादिन्यायेनैव कोट्योरव्या

व्याप्यवृत्तित्वज्ञाने प्रतिबन्धकत्वमास्थीयते तेनातः समुच्चयरूपायां संशयापत्तिः एवं कोट्यंशे प्रत्येकत्वाद्यनुरूपं तं-
भावनात्वमपि विषयताविशेषरूपमेवेति ध्येयं न चैवमार्थसमाजरूपबाधकेन संशयत्वस्य कार्यतानवच्छेद-
कत्वव्यवस्थापनं दीधितिकृतो विरुध्येत सामग्रीद्वयसमाजस्य तत्तत्सामग्रीप्रयोज्यकार्यतावच्छेदकद्वयसा-
मानाधिकरण्यमात्रप्रयोजकत्वात् कार्यतावच्छेदकविषयतयोरवच्छेद्यावच्छेदकभावादिप्रयोजक-
त्वासंभवेन तत्समाजादवच्छेदकभावाद्यत्र विषयताविशेषरूपसंशयत्वानिर्वाहात् तादृशविषयताविशेष-
स्य समुच्चयसाधारण्यविरहेण विरोधानवगाहिज्ञानसाधारण्येन च कोटिद्वयभानसामग्रीसंवलनस्य विरो-
धभानकसामग्रीमनपेक्ष्यापेक्ष्य वा तत्प्रयोजकत्वस्यासंभवदुक्तिकत्वाच्चेति वाच्यं विरोधावगाहित्वस्यापि
तत्कोटिद्वयावगाहित्वसंशयत्वमिति प्राचीनसिद्धान्तमवलम्ब्य पाततस्तज्जन्यतानवच्छेदकत्वाभिधानात्
अथैवमपि संशयानुमितिव्यवस्थापनमशक्यं विषयताविशेषरूपसंशयत्वे परामर्शादिघटितानुमितिसा-
मग्र्याः प्रयोजकत्वकल्पकाभावादिति चेन्न सविरोधज्ञानमनपेक्ष्य सामग्रीसमाजादेकदा पक्षधर्मिणि त-
त्तदभावोभयानिश्चयानुमित्यनुदयात् संशयानुमितिसिद्धौ व्याप्यवृत्तित्वज्ञानाभावसमवहितयोः प्रत्य-
क्षसामग्र्यादिवानुमितिसामग्र्योरपि संशयत्वावच्छिन्नोत्पत्तिप्रयोजकजनकतायाश्चावर्जनीयत्वात् न च संश-
यत्वाद्युपलक्षीभूतायानिश्चयीयविषयतातस्याः संशयव्यावृत्तये संशयसामग्र्यास्तदवच्छिन्ने प्रति प्रतिबन्धक-
ल्पनीये संशयसामग्रीत्वे च प्रत्यक्षानुमितिसामग्रीसाधारणेनैकमिति अव्याप्यवृत्तित्वज्ञानाभावविशि-
ष्टविरोधिकोटिद्वयानुमितिसामग्र्याः प्रतिबन्धकत्वे कल्पनीयेऽनुमितित्वमेव तत्प्रतिबध्यतावच्छेदकत्व-
मुपपन्नं लाघवान्न तु निश्चयत्वमिति न संशयानुमितिसम्भव इति वाच्यं प्रत्यक्षसंशयस्य तादृशविष-

याता शालित्ववारणाय तत्तद्व्यक्तित्वं प्रतिसंशयोपधायकताविशिष्टत्वेनैव सामग्र्याः प्रतिबंधकतानाकल्प
नात्तद्रूपस्य च संशयानुमितिसामग्रीसाधारण्यान तयोत्पत्तिप्रतिबंधकतानिराकल्पनादिति वदंति अत एव तुल्यबल
सामग्रीसमाजात् यत्र तु सैव परोक्षस्यापि संशयोत्पत्तौ वाधकाभावादेवाहुस्तस्यैव सामग्र्यादेव विप्रतिपत्तिवाक्यज
न्यानामिति विप्रतिवाक्यतो जन्यस्य एवंभूतशाब्दबोधात्मकं संशयमपि वदंतीत्यर्थः नन्वसमानबलत्वं न्यूना
धिकबलत्वं वा सामग्र्याः कथमवधारणीयमित्यत आह फलबलकल्पनीयत्वेति सामग्रीसंवलनस्थले प
कस्याफलानुत्पत्त्या न्यूनाधिकबलभावः उभयोः फलोत्पत्त्या समबलभावो ऽवधारणीय इत्यर्थः एतदेव वि
शिष्योदाहरति सत्यामपीति पीतत्वशुक्लत्वसत्ताविति सविधवर्त्तिनि शंखे इत्यादौ विशेषणाज्ञानविशेष्येंद्रि
यसन्निकर्षघटिततदुभयविशिष्टप्रत्यक्षसामग्रीसत्त्वं दर्शितं दोषविशेषेपि तद्द्वयसमवधानरूपी तत्त्वस्यै
वग्रहणादित्यग्रिमेणान्वयः तथा च फलबलात् शंखेत्यादिलौकिकप्रत्यक्षसामग्रीतो दोषविशेषोपहितेंद्रि
यात्तत्त्वशुक्लत्वाभावादिग्राहकसामग्र्या बलवत्त्वमिति भावः दोषविशेषासत्त्वे उपनीतभानसामग्र्यपेक्षया
लौकिकसन्निकर्षघटिततद्विरोधिग्रहसामग्र्या बलवत्त्वमित्याह असतीति च शुक्लत्वसंशयेति दोषविशेषासमव
धानस्थले उपनयघटितसामग्रीद्वयस्य तुल्यबलत्वमाह दूरस्थ इति धर्मिणो दूरस्थत्वे सति च विशेषदर्शने
विद्यमानकोटेरपि न लौकिकसामग्री दूरत्वदोषस्य विशेषादर्शनसहितस्य लौकिकसामग्री दूरत्वदोषस्य
विशेषादर्शनसहितस्य लौकिकधीविरोधित्वादिति लौकिकसामग्रीविघटनाय दूरस्थत्वविशेषादर्शनयो
रुद्भावने स्फुटतयोरित्युपनयसंपादनाय कोट्योः स्थाणुत्वतदभावयोर्विशेषदर्शनघटितसामग्र्या बलवत्त्वमा
ह सति चेति सति च विशेषादर्शने एकस्य गृहीतविशेषाभावाः कोटेरेवनयने ग्रहणात् अत्र च यद्यपि विपरी

गदा. तद्विशेषदर्शनस्यैव प्रतिबंधकत्वेन तत्सामग्र्या इत्यवधेयं ननु कोटिद्वयभासकसामग्रीसमाजादेव चेत्संशयः
तदा संस्कारप्रतिनिर्णायत्वेन हेतुतयापि न संशयाकारस्मरणावारणसंभवः प्रत्यक्षतत्तदभावगोचरनिश्चयजन्य-
77 संस्कारद्वयसंवलनात् इत्यतो बाधकाभावादित्याशंकते अथैवमिति उद्बुद्धाभ्यामिति न चोद्बोधकस्य फले कोटि-
यत्तयापकत्वाविशेषात् कोटिद्वयोद्बोधकाकल्पनान्नापत्तिरिति वाच्यं नियतोद्बोधकसंबंधिवस्तुविशेषज्ञानादी-
नां अनुगतरूपेणैव कारणतायाः क्लृप्तत्वात् तादृशोद्बोधकद्वयसमवधाने दैवाद्यत्र तत्रैवापत्तिसंभवात् अनुभ-
वविरोधविरहे इष्टापत्तिमाह किं न स्यादिति अनुभवविरोधस्यापि सविवादतया यदीति येन अनुभवविरो-
धस्यापि सविवादतया यदीति येन अनुभवविरोधेन भवतेत्यनेन परस्परसामग्रीप्रतिबंधकताकल्पमंतरा-
तावतापि संशयाकारस्मरणावारणेन संभवतीति सूचितं बाधबुद्धेरन्यतान्योन्याभाववत्ताधीसाधारण-
क^ विरोधिप्रकारकत्वेनैव प्रतिबंधकताकल्पनमंतरेण तावतापि संभवात् तथात्वं च विरोधिपरामर्शस्यापीति मूला-
शसिद्धांतेहेतुद्वयमाशंकते अथेति तद्विरोधित्वेन तदभावव्याप्यत्वस्य व्यापकतदभाववत्त्वरूपस्य तद्घटित-
त्वेन न साधारण्यमित्यत उक्तं सहीनवस्थापित्वमिति विरोधस्य विषये उपलक्षणत्वं विशेषणत्वं चेति वितर्कमुद्-
घाटयति यदीत्यादिना तथा प्रतिबंधकः पक्षतावच्छेदकादेरिति इदं त्वाद्यवच्छिन्नजलादिरूपपक्षविशेष-
णस्य हेतुत्वे नाभिमतस्य तादृशपक्षवृत्तित्वावत्त्वादिविरोधिनो निर्णयेऽप्रमात्वमिति निर्णयाधीनाप्रमात्व-
मिति भवतीत्यर्थः तत्र जनकज्ञानस्यैवोक्तप्रतिबंधकतावच्छेदकाक्रांतत्वादिति भावः यद्यपि जलमघत्वा-
दिविरोधानवगाहिज्ञानदशायां तदवच्छिन्नपक्षतावगाहिन्याः तदन्यलिंगिकाया आयं वह्निमानित्याद्यनुमिते-
रप्यनुपपत्तिरस्ति तथापि जलमयो घंवह्निमानित्याद्यनुमितिस्थले प्रतिबंधज्ञाननैयत्येन तथाविधानुमि-

तिमात्रोच्छेदकस्यापि प्राचीनतावदृशानुसरणं अथ विरोधित्वेनेति निर्णयस्तथैत्यत्तत्र सम्भवते तदग्रहेव ह्रदाभावा
दौ वह्न्यादेर्विरोधाग्रहेऽनुमितिप्रसंग इति तथा च वह्न्यभाववत्त्वावच्छिन्नावगाहिनिश्चयत्वेनैव विशिष्य
बाधबुद्धेः प्रतिबंधकतावाच्यातज्ज्ञानविरोधिपरामर्शसाधारणमिति भावः इदमुपलक्षणं अनुगतेन तद
धिकरणवृत्तित्वरूपविरोधावच्छिन्नप्रकारकनिश्चयत्वेनापि व्यापकतत्सामानाधिकरण्यरूपव्याप्यवगा
हिविरोधिपरामर्शस्य तद्रूपानाक्रान्ततया तादृशपरामर्शस्यांशे पायानुमितिजनने बाधकाभावः एवं त
त्संबंधेन तदधिकरणवृत्तित्वावच्छिन्नस्य तत्संबंधावगाहिज्ञानमेव विरोधीति संबंधविशेषणनिवेशस्याव
श्यकतया विशेषणानां विशेषादिसंसर्गकयाग्राह्याभावादिज्ञानसंबंधांतरावगाहिविरोधिपरामर्शानामनुगत
रूपेण प्रतिबंधकतासंभवेऽपि बाधांशे धर्मबाधबुद्धिप्रतिबंधकत्वव्यवच्छेदकरूपाक्रान्तत्वं विरोधिपरामर्श
स्य तथापि न संशयानुमित्यवसरः स्थाणुत्वाभावव्याप्यकरादिमानयमित्यादिनिश्चये स्थाणुत्वादिप्रत्यक्ष
भ्रमसंशयानुदयान्नहि विशिष्टबुद्धित्वावच्छिन्नं प्रतितदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबंधकतायामावश्य
कत्वादित्याशंकाते अथेतिस्थाणुत्वादीमियीतत्वाभावादीत्यर्थः इष्टेनपितादिहाबितेन पीतत्वादीति अ
युक्तत्वादीत्यर्थः नन्वेवं संशयत्वं प्रतिबध्यविशेषणे देयमित्याशंकामपनीतभावनिश्चयविशेषणांतरग्रहमद
र्शयन्नाहपयति सर्वेति विशेषदर्शने विरोधिव्याप्यदर्शनेन तत्र प्रथमस्य लाघवरोधेन दोषविशेषाजन्यत्वे द्वितीयस्य तु
रोधेन च लौकिकसंनिकर्षाजन्यत्वं प्रतिबध्यविशेषणं देयमित्यत आह इदंतदिति अमितसकरादिभ्रमात्मा
कप्रमापकलौकिकसंनिकर्षाश्रयस्य पतेनकरादिभ्रमदशायामपि हस्तत्वादेव स्थाणुत्वाग्रह इत्याशंकाया
निराकृतात्रग्रहादिति तथा च लौकिकसंनिकर्षाजन्यत्वनिवेशेन तत्र स्थाणुत्वादिप्रत्यक्षस्तापत्तिस्तन्निवेशोन सं

गदा.

भवतीतिभावः स्थलविशेषइति यद्यद्धर्मिकत्वेविशिष्टबुद्धिर्नजायतेतद्धर्म्मिकैवविशिष्टविशिष्टबु
द्धित्वावच्छिन्नंप्रतिबंधकत्वंवाच्यमित्यर्थः तथाचकोट्यंतरविशेषदर्शनासहितविशेषदर्शनसहितविशे
षदर्शिनव्यक्तीनांप्रतिबंधकत्वाकल्पनात्संशयस्योत्पत्तिर्निष्प्रत्यूहैवेतिभावः क्वचित्तुलौकिकसंनिकर्ष
जन्यज्ञानेदूरत्वादिसहकृततदभावव्याप्यभ्रमस्यविरोधित्वेपिलौकिकसंनिकर्षाद्यजन्यविशिष्टबुद्धित्वा
वच्छिन्नंप्रतितदभावव्याप्यवत्तानिश्चयत्वेनानुगतप्रतिबंधकताकल्पनगौरवं तत्तद्व्यक्तित्वेनप्रतिबं
धकत्वेतुतत्प्रतिबंधकताप्रसंगात् दूरत्वादिदोषसहकृतविशेषदर्शनस्यचप्रतिबध्यतावच्छेदककोटौ
किकान्यत्वमनिवेश्यप्रतिबंधकत्वानतिरेकल्पनीयमितिसमाधत्ते नन्वितिदोषविशेषादीत्यादिनालौ
किकसन्निकर्षपरिग्रहः दोषविशेषजन्यज्ञानेपिसाक्षात्कारित्वव्यंजकविषयताविशेषोपगमात्तदन्यत्वेनिवे
श्यैवदोषविशेषजन्यलौकिकसंनिकर्षजन्यज्ञानव्यावर्त्तनीयं एवंचपरमेश्वरबुद्धावपितादृशविषयता
याएवस्वीकारान्नानित्यसाधारण्यं नन्वननुगतधर्मस्यप्रतिबध्यविशेषणाभावेविनिगमनाविरहःप्रसंगा
च्चेत्यतः संयोगाद्यजन्यचाक्षुषत्वादीनांजन्यतावच्छेदकधर्मजन्यत्वेनप्रतिबध्यतावच्छेदकानाक्रांततयावि
शेषदर्शनकालेपितादृशोपनीतभानापत्तिरस्त्वेति एवमनाहार्यत्वस्यापिनिवेशोबोध्यः तेनाहार्यचा
क्षुषादीनांविरोधिनिर्णयप्रतिबध्यतापत्तिः आहार्यत्वंचस्वविषयकेच्छाव्यवहितोत्तरत्वेसतिस्वप्र
त्यक्षत्वविषयतास्वाव्यवहितोत्तरत्वोभयसंबंधेनइच्छावच्छिन्नत्वमतस्तत्ववाआहार्यचाक्षुषादेर्वाच्य।
षादीच्छाद्याहितत्वोपगमात्रेच्छाविनाविरोधिनिश्चयात्तदापत्तिः कदाचिदिति दोषविशेषदर्शनेपरिदृश्यय
यज्ज्ञानमुत्पद्यतेतत्[illegible]नस्मरणमपिविशेषदर्शनकालेऽनुभूयतेनतदंत्यर्थः वस्तुतस्तुविशेषदर्शनेका।

लेसर्वज्ञानविरोधिविशिष्टज्ञानमेवस्मर्यते। नन्वतद्विषयीभूतेविशिष्टेयावद्विशेषदर्शनेनाप्रामाण्यंगृह्य
तेतथाचज्ञानत्वमेवप्रतिबध्यतावच्छेदकंनतत्वमनुभवत्वं अनुभवत्वजातेरप्रामाणिकत्वात् स्मृतिभिन्न
ज्ञानत्वस्यतथात्वेगौरवात् प्रत्यक्षत्वस्यतथात्वेबाधकाभावादित्यर्थः ननुसंशयानुमिते संदिग्धतया
ज्ञानत्वस्यविरोधिपरामर्शाभावजन्यतावच्छेदकत्वकल्पनानसंभवतिव्यभिचारसंशयस्यविरोधित्वादित्यत
आह बाधाभावेति प्रामाण्यादीत्यादिनाऽनुमितिस्मृतिपरिग्रहः तथाचज्ञानत्वस्यतथात्वेप्रामाण्यादिस्थलेस्वतं
त्रप्रतिबंधकत्वाकल्पनेनलाघवात् व्यभिचारसंदेहःकिंचित्करइतिभावः ननुतद्व्याप्यवत्ताज्ञानस्यतदभाव
व्याप्यवत्ताज्ञानेऽनुत्पादकत्वमावश्यकं अन्यथाकोटिद्वयव्याप्यदर्शनेदशायांप्रत्यक्षात्मकस्यापिसंशयस्या
तादृशसंभवेननतदानींसंशयानुभवापलापप्रसंगादितिसत्प्रतिपक्षसंवलनदशायामुत्तेजकसत्त्वेनसं
शयानुमितिनिष्पत्तिरहैवेत्याशंकाते अयेतियावदप्रामाण्यंनगृह्यतइतितथाचानयोरेकतरमितिरीत्या
सामान्याजन्यत्वाप्रामाण्यग्रहेविशिष्टोभयस्यैवाप्रामाण्यसंशयेनप्रत्यक्षसंशयोभवतीतिभावः एतदुपपा
दकमेवाहागृहीताप्रामाण्यस्येचेतिअप्रामाण्यसंशयात्मकअनुमितिः संशयरूपानसंभवति अगृहीताप्रा
माण्यकपरामर्शरूपस्यसकारणविरहात्मकारणांतरस्यकल्पकाभावात् मिश्रास्तुतद्व्याप्यदर्शनस्य
तदभावव्याप्यदर्शनप्रतिबंधकतायामनुत्तेजकत्वेपिप्रत्यक्षसंशयवदुभयव्याप्यदर्शनात्संशयानुमिति
रुत्पद्यते यतोव्याप्यदर्शनमवधारणात्मकज्ञानएवहेतुः अवधारणत्वंचानुमितौव्याप्यदर्शनजन्यप्रत्य
क्षेचस्वीक्रियतेऽवधारणद्वयसामग्रीसमाजाच्चसंशयः तत्कोट्यवधारणेतद्विरोधिकोट्यवधारणजनक
विशेषदर्शनस्यप्रतिबंधकतयाविरोधिकोटिद्वयावधारणसामग्रीसंवलनस्यासंभवात् तादृशप्रति

गदा॰

बध्यप्रतिबंधकभावावकल्पनेऽभयकोट्यव्याप्यदर्शनकालेऽभयकोट्यवधारणापत्तेः नचेष्टापत्तिः तत्र सं-
शयस्यैवोत्पत्त्यास्त्रवधारयामीत्यननुभवात् कोटिद्वयविशेषदर्शनकाले एककोटिविशेषदर्शनस्यापरविशेष-
दर्शनेनाप्रयोजकीकृतत्वाद्विशेषादर्शनदशायां विशेषगुणज्ञानादिघटितयाहृदयसामग्रीसमाजात्मत्वलसं-
शयस्याहृदयसामग्र्याः तत्राप्युत्तत्वाद्भवतिसंशयात्मकप्रत्यक्षेऽस्त्रवमितिनिश्चयलेचावधारणसामग्र्यतिरि-
क्तसामग्रीनकल्प्यतेप्रयोजनाभावादित्याहुः तेषामयमाशयः स्त्रवधारणात्वेननिर्णयत्वंविपरीतकोट्य-
नुपस्थितिकालीनविशेषदर्शनाधीननिश्चयानंतरमवधारयामीतिप्रतीत्यनुरोधात्किंतत्कोटिनिश्चय-
त्वेनैतत्कोट्यवविषयताविशेषएवस्त्रन्यस्यदुर्वचत्वात् सएवचप्रत्यक्षानुमितिसाधारणोव्याप्यदर्शनन्यता-
वच्छेदकः विरोधिव्याप्यदर्शनप्रतिबध्यतावच्छेदकश्चेति अत्रचनिश्चिनोमिअवधारयामीतिप्रतीत्योः स-
मानविषयतथापिनिश्चयत्वमेवावधारणात्वं अनभ्यासदशायज्ञानाद्विशेषदर्शनकालीनज्ञानेः प्रामा-
ण्यशंकानास्कंदनमेवविशेषः निश्चयत्वस्यवार्थेसमाजप्रत्यक्षतावस्थापितेनेतिनदीधितिकृतोनिर्भरः ।
दूरंत्ववधेयं विरोधिज्ञानदशायामाहार्यज्ञानोपपत्तये यदिति सदृ मनाहार्यत्वे प्रतिबध्यतावच्छेदक-
कोटौनिवेश्यते तदातस्याव्यवहितोत्तरत्वघटिततयाऽव्यवहितोत्तरत्वस्यचानुगतस्यदुर्वचतयाइच्छा-
व्यक्तिभेदेनानिवेशनीयतयामहागौरवंइच्छायाआहार्यज्ञानसामग्रीघटकतानिर्वाहापत्तस्या-
लडेऽत्वताधिक्यंचेतिइच्छापात्रतेजकात्वपत्तपवसंप्राविततः तथाचतप्रत्यक्षाद्यादिसाधारणाबुद्धौप्र-
तिबंधकतैवसंभवः विरोधिज्ञानदशायांचाद्यत्वादिप्रकारकेच्छावलात् स्पर्शनाद्युपस्थितज्ञानो-
यप्रत्यक्षेच्छानोविशेष्यतेजकतास्वीकृतत्वात्तत्तज्जातौपप्रत्यक्षेपृथक्प्रतिबंधकतायाअवश्यकत्वा-

त तथा चानुमिति स्थले पृथक् प्रतिबंधकतया प्रामाणिकत्वात् संशयानुमिति र्द्वैविध्ये च यद्यपि कार्यं चिद्
व्यवहितोत्तरत्वमनुगतं शक्यते निर्वक्तुं वाच्छवस्य शुनादे भेदेन प्रत्यक्षस्थले चाक्षुषादिगोचरेच्छाविरहविशि
ष्टविरोधिनिश्चयाभावत्वस्य गुरुधर्मावच्छेदेन कारणताया एवं कस्य कल्पनोपमित्योः इच्छाविरहविशेषणविरो
धिनिश्चयाभावकारणताद्वयस्य च कल्पनापेक्षया तदूहेन वा तद्वैयाप्यत्वादि हि एवं लघुधर्मेणैकस्यैव कारणतावि
च्छेदकस्य इच्छाविशिष्टान्यबुद्धिसामान्ये विरोधिनिश्चयाभावस्यैव हेतुतायाः कल्पने लाघवमीक्षणेन
तादृशव्यवहितोत्तरत्वसंबंधेन निर्विरोधि निश्चयानवच्छिन्नत्वमेव तत्प्रतिबध्यतावच्छेदकमपि न्याय्यं तथा स
त्ति दोषविशेषाजन्यत्वादपि निवेशनीयतया लाघवात् तथा चोभयव्याप्यवत्तानिश्चयदशायां संशयानु
मितेरुपगमेपि ताहृशप्रतिबंधकाभावव्यभिचारानवकाशाद्विरोधिपरामर्शाभावाद्धटितायापवानुमितिसा
मग्याः प्रतिबंधकत्वाद्युपगमात् संशयानुमिति निष्प्रत्यूहैवेति एतेन वन्ह्यभावव्याप्यवान्पर्वत
इत्याकारकानिश्चयाग्रहणानिश्चयदशायां वह्निमान्पर्वतो घटवानित्यानुमिति वारणाय वन्ह्यादिप्रकारकानु
मितावपि तदभावव्याप्यबुद्धेः प्रतिबंधकत्वमावश्यकमिति न संशयानुमितिप्रसंगाद्याप्यपिनिरस्तं तदभावव्या
प्यवत्तानिश्चयानवच्छिन्नबुद्धिप्रतिबंधकत्वे फलानुरोधेन तद्विशिष्टपक्षकायनुमितिसामग्यां तदभावव्या
प्यवत्तानिश्चयाभावोत्तर्भावेपि प्रयोजनविरहेण तद्विधेयकानुमितिसामग्यां तदन्तर्भावानुपगमात् मूलेः
तथा व्यतिरेकाहेतिकोटिद्वयसहचरितत्वेज्ञानानिश्चितकोटिद्वयव्याहृततज्ज्ञानादेवं व्यवस्थितविक
ल्पोपसाधारणासाधारणभेदेन विरुद्धस्यैव त्रयाणामानाधिकरण्यरूपविरोधविवक्षणेऽर्हत्वेरेणाविरुद्धरूपत
यातस्य चापक्षधर्मस्य न साध्याविपरीतानुमितिः फलमिति संगतिरतो विरोधं दीधितिकृदाह साध्याभावव्या

८ गदा० ४१

यस्येति अपक्षधर्मविरुद्धस्य प्रकृतपक्षे साध्यविपरीतानुमापकत्वासंभवेपि न क्षतिः साध्यविपरीतानुमि
तौ प्रकृतपक्षकत्वाविवक्षणादित्याह मूलेऽपक्षधर्मेपीति अन्यत्र प्रकृतपक्षभिन्ने स्वाधिकरणे ह्रदे वह्नि
मान् धूमादित्यादौ ह्रदत्वादिहेतोः पक्षे साध्यविपरीतज्ञानसंभवेपि अविरुद्धधूमादेर्न तत्फलमिति नातिप्रसंगः
यस्य न तत्फलं स विरुद्ध एवेत्याह बाधइति साध्याभावसाधकत्वाधितहेतोर्लक्षणतया उक्तफलघटितविरु
द्धलक्षणाभिशंकां निराकरोति नित्यइति घटो नित्य इत्यभिधानेऽकार्यप्रश्लेषेणानित्यत्वसाध्यकत्वभ्रमः
स्यादिति प्रथमं साध्योत्कीर्तनं असिद्धइत्यादि व्यभिचारादिदोषवत्त्वस्य पक्षज्ञानान्यमात्राधीनं फलं तत्तज्ज्ञानान
धीनं अलिंगत्वस्य ज्ञानं असाधकत्वज्ञानं असिद्धिदोषस्य ज्ञानस्य फलमित्यर्थः तथा च ताहृशदोषवत्त्वम
सिद्धहेत्वाभासलक्षणं फलितमिति भावः पक्षधर्मे हेताविति अत्र हेतुपदस्य प्रकृतहेतुपरत्वे अपक्षध
र्मे व्याप्य प्रकृतहेतुकबाधस्थले व्याप्यभावसिद्धिरूपतत्फलासंभवात् तत्फलघटितलक्षणाव्याप्ति
रतो हेतुपदस्य प्रकृताप्रकृतसाधारणहेतुमात्रपरतां दर्शयति क्वचिदाह हेतौ प्रकृते अन्यत्र वेति तथा च
ह्रदो वह्निमान् धूमादित्यादावपि साध्याभाववत्पक्षरूपबाधघटितेन तद्व्याप्तिमत्त्वहेतुना ह्रदत्वादिरू
पहेत्वेतरेव्याप्यभावानुमितिसंभवात् लक्षणसमन्वय इति भावः यद्यपि प्रकृतहेतोर्न तत्फलमिति
तत्फलकत्वं न बाधितहेतोर्लक्षणं तथापि तत्फलकदोषवत्त्वेन लक्षणमिति नात्र पपाप्तिः हेतुपद
स्य प्रकृताप्रकृताप्रकृतसाधारणहेतुपरत्वे तदुपादानमफलं अव्यावर्तकत्वादिति पक्षधर्मे व्याप्तेर्बाध
इत्येवोच्येत अतः प्रकृतहेतुपरमेव तद्वाच्यमित्याशयेनाह यथा पक्षधर्मे प्रकृतहेतौ बाधस्य फलान्तरंद
र्शयति अपक्षधर्मे चेति अत्र प्रकृतहेत्वर्थकं हेताविति पूर्वोक्तमनुषंजनीयं पक्षत्वकल्पे फलान्तरागमात्

तद्द्वितिलक्षणाव्याप्तिमाशंक्यान्यतरत्वेन तत्फलानुगमे मूलाभिप्राय इति दर्शयति तथा चेति हेतोर्वि-
ति प्रकृतान्तदित्यादिः व्याप्तिभंगो साध्ये साध्याभाववत्त्वस्य न्वहृत्तित्वे हेतुः पक्षस्य साध्याभाववत्त्वेनैव निवेशः न
तु पक्षतावच्छेदकस्यापि तत्र प्रवेश इति नव्यर्थविशेषणता पक्षधर्मताभंगे साध्ये पक्षनिष्ठाभावप्रतियोगि
साध्यव्याप्यत्वे हेतुः अत्रापि साध्यस्य तादृशाभावप्रतियोगित्वेनैव निवेशः हेतुद्वयमेव बाधच्छादितमिति बा-
धस्यान्यतरफलकत्वसम्भव यत्र मूले व्याप्त्यादिबुद्धिसत्त्वादिति सद्धेतोरपि विरोधिपरामर्शं तादृशायां सत्प्रतिप-
क्षत्वात् तत्र च व्याप्तिपक्षधर्मताप्रमितिसत्त्वादित्यर्थः तथा च प्रकरणसमदोषस्य व्याप्त्यादिविरहाव्यापक-
त्वासंभवादिभावः विपरीतबुद्धिः स्वासाध्याभावावगमितिः सत्प्रतिपक्षहेतोः फलमिति शेषः स्वसाध्यवि-
परीतेनानियमादिति धूमादिहेतौ वह्न्याद्यभावव्याप्यत्वाभावादित्यर्थः संशय इति कोटिद्वयोपस्थितिज-
न्यकसाध्यसंशय इत्यर्थः कोटिद्वयानुपनयादिति स्वेन स्वसाध्यस्यैवोपस्थापनादिति भावः इति जिज्ञा-
सेति एतादृशतत्त्वनिर्णयोपायेच्छाफलिका जिज्ञासेत्यर्थः अनयोः किं तत्त्वमिति जिज्ञासेति यावत् अतो
नाग्निमग्रंथविरोधः ननु स्वासाध्यव्याप्त्यादिमत्तयोपस्थितयोर्हेत्वोरन्यतरस्य समीचीनत्वमेव जिज्ञासात
इत्यत आह अत्र हेत्वोः समीचीनत्वमिति तथा च प्रकृतसाध्यहेत्वोरिति यथाश्रुतमसंगतमतो हीधीति हाडेन
द्वयार्थकतया तद्व्याचष्टे प्रकृतसाध्ययोरिति किंतत्त्वमिति मूलकः समीचीन इत्यर्थः एतादृशजिज्ञा-
सा प्रयोजकत्वं समीचीनत्वं संशयादिसाधारणमनस्तद्वारणाय व्याप्तिपक्षधर्मतोपस्थितिरिति उदासीनव्या-
प्याद्युपस्थितिवारणाय विशेषणदलेन व्याप्त्यादेरननुगमात् सर्वसाधारणरूपेण तदुपस्थितिनिवेशासं-
भवाद्विशिष्य प्रकृतसाध्यतदभावव्याप्याद्युपस्थितिनिवेशस्यावश्यकत्वे जनकोनत्वे यथ्यामितिवाच्ये अ

मदा·

नुमितिचरमकारणत्वेनव्याप्यत्वं तत्रोपस्थितिसाधारणेन तन्निवेशसंभवात् यादृशपरामर्शस्योक्तजि
ज्ञासनकत्वे तादृशपरामर्शसहितत्तादृशपरामर्शनिवेशात् जिज्ञासत्त्वपयोग्यज्ञानपरामर्शदृष्टायां ना
तिप्रसंगः प्रकारणसमदृतिदोषइति शेषः प्रकृतसाध्यव्याप्यवत्तापरामर्शे तदभावव्याप्यवत्तापरामर्शयोर्जिज्ञा
जनने मिथः सहकारितां व्यवस्थापयति नत्वनुपस्थितइति प्रतिपत्तौ विरोधिपरामर्शात्तरेपकस्मात्परामर्श
तन्निर्णयः एकतरसमीचीनत्वस्यवा फलोपधानगर्भलक्षणमेकपरामर्शदशायां नातिप्रसक्तमित्येतत्पर
त्वानहीत्यादेर्नेयाज्यते जिज्ञासोपधानस्यानियमेन तद्घटितलक्षणस्याव्याप्त्याविवक्षणासंभवात् नन्विष्टसा
धनताज्ञानस्य सर्वत्रैवहेतुतया संशयकल्पे तत्कल्पव्यवच्छेदस्योगादित्यत इष्टभेदाभिप्रायकतयाविक
ल्पंसंगमयति तज्जन्येति संशयजन्यस्यज्ञः स्वज्ञस्य उत्तारणकारणीभूतसंशयविघटनेनानुत्पायत्तद्रूपं
इष्टं तत्साधनताज्ञानादित्यर्थः एवंचमूलोक्तसंशयस्य जिज्ञासाहेतुत्वं इः स्वितनपित्वात्तदभावोपस्थानेन
तदभावेच्छासंपादनद्वारेति स्फुटीकृतं दृष्टान्तरेतिव्यवहाररूपेत्यादि तथाचमूले इष्टपदं तद्विशेषपर
मितिभावः ज्ञानेच्छापकतरकोटितिस्त्वयेच्छाप्रतिपक्षसंवलनस्य जिज्ञासायां सतिव्यवहितस्यान्यथासि
द्धाकारणत्वात् जिज्ञासहेतुत्वादिति मूले तत्प्रयोजकत्वार्थकेतया द्वारं प्रदर्शयन् व्याचष्टे हेत्विति स
मीचीनत्वे प्रतिनव्याप्तिपक्षधर्मताकत्वे स्वसाध्यानुमितिप्रयोजकपरामर्शविषयत्वमित्याचत् तत्संश
यस्त्वपरामर्शप्रामाण्यसंशयपर्यवसितइति बोध्यं अनैकांतिकानिव्याप्तिरितिपक्षेऽनैकांतिकत्वोपस्थि
तेर्व्याप्तिपक्षधर्मतोपस्थितित्वाभावान्नैतादृशप्रश्नोकावसरः तथापितदुपस्थितेरपिउदासीनव्याप्त्यादिवि
षयकत्वसंभवात् तत्संगतिः संशयद्वारासाध्यसंशयद्वारा वा फलपरामर्शद्वयात्तत्याहेऽपिक्रमिकपराम

र्षद्वयसंवलनात्प्रतिरोध इति शंकते क्रमेति एकपरामर्शानंतरमपरपरामर्शजनकव्याप्तिज्ञानपक्षधर्म
ताज्ञानयोर्द्वयोः क्रमेणोत्पत्तिः तथा च प्रथमपरामर्शं चतुर्थक्षण एव परामर्शांतरोत्पत्तिस्तदानीं च प्र
थमपरामर्शनाशो नोत्पद्यते अपि तु स्वद्वितीयक्षणोत्पन्नविशेषगुणात्तृतीयक्षण एवेति उत्पत्तिकालपदं तत्पू
र्वकालपरतया व्याचष्टे दीधिता उत्पत्तीति तत्क्षणनाशादित्यत्र तत्क्षणनाशेणोत्पत्तिप्रतीतिरौत्सर्गिकीत्याशयेनेदं
व्याख्यानं तत्क्षणनाशसत्त्वार्थकत्वे तु यथाश्रुतमेव संगच्छते अनंतरोत्पन्नस्यैव गुणस्य नाशकतयोभयो
र्व्याप्तिज्ञानपक्षधर्मताज्ञानयोरेकत्र पूर्वज्ञाननाशकत्वासंभवात् पृथक्क्षणीयनाशकत्वाभिप्रायकत्वा-
त्ताज्ञानाभ्यां विनाशादिति मूलं संगमयति व्याप्नोति उत्पादक्रमादिति व्याप्तिज्ञानोत्तरमेव पक्षधर्मताज्ञानं य
त्तद्धर्मताज्ञानोत्तरमेव व्याप्तिज्ञानमुत्पद्यत इति नियमाभावादित्यर्थः उभयोर्नाशकत्वमुक्तमिति उक्तज्ञान-
योर्यज्ज्ञानं प्रथमतो यद्वोत्पद्यते न तु तस्य नाशकत्वादिति भावः विशिष्टज्ञानोत्पत्तिकाल इत्यत्रोत्प-
त्तौ तादृशज्ञानयोर्हेतुत्वेनोत्तरयैकत्रैव उभयहेत्वन्वयोपपत्ता निर्वहतीति किं स्थलभेदानुसरणेनेत्याश
येनाह अपत्रावेषवेति व्याप्तिपक्षधर्मताविषयकैकज्ञानस्थलेऽपि न परामर्शयोर्यौगपद्यं संभवतीति स्व
यमाह यत्र चेति मूले उभयव्याप्तिज्ञानपक्षधर्मताज्ञानानामिति परामर्शद्वयहेतुव्याप्तिहेतु-
त्वधर्मताज्ञानं च तत्प्रत्येकस्येत्यर्थः परस्परप्रतिबंधकत्वात् एकसत्त्वस्यापरसत्त्वाविघटकत्वात्
परामर्शोत्पादक इति व्याप्त्यादिज्ञानं च तत्प्रयोगाधीनस्य एकदा समूहालंबनरूपस्याविलंबक्रमेण वा उभयव्या
प्यवज्ञानस्योत्पादक इत्यर्थे विशिष्टपरामर्शयोरेवैकदोत्पादस्तृतीयक्षणे च विनाशः नेतरज्ञानस्य त्रि-
यमदत्वभिमानेनेयं शंका अभिमानं निराकरोति व्याप्त्यादीनि यौगपद्यस्याभावात् यौगपद्यख्यानासंभवा-

गदा०

83

त ज्ञानमात्रएवअज्ञानियमादितिभावः परस्परजन्यव्याप्तिस्मृतिप्रतिबंधकत्वात् समूहालंबनपक्षधर्म-
ताद्वयज्ञानात् समूहालंबनरूपंव्याप्तिद्वयस्मरणं ततः समूहालंबनमुभयव्याप्यवत्ताज्ञानंप्रतिबंधप्रयो-
जनकमितिसमावर्तनेवमितिस्वयंनिर्वक्ष्यमाणस्यवित्यसत्प्रतिपक्षदोषस्यसाध्याभावव्याप्यवत्पक्षरूपस्य
केवलान्वयिसाध्यकेसाध्याभावाद्यप्रसिद्ध्यासंभवात् अस्येतिमूलेनिरुक्तव्यवहारौपयिकपरामर्शसंबल-
नात्मकसत्प्रतिपक्षत्वपरयाव्याचष्टे अस्येति अभिधेयत्वेहित्वावच्छिन्नाभावप्रतित्वसाधारणरूपेण
घटनिष्ठाभावप्रतियोगित्वज्ञानस्यविरोधिविषयकत्वेन अदेऽभिधेयत्वज्ञानाप्रतिबंधकतया तत्समञ्ज
नाभिधेयत्वानुमानप्रतिरोधइत्यभिधेयत्वमित्यादिग्रंथस्याभिधेयत्वपक्षकघटनिष्ठाभावप्रतियोगि-
तावच्छेदकत्वसाध्यकजात्यहानित्वविशिष्टघटमात्रवृत्तितानवच्छेदकत्वलिंगकानुमानेतात्पर्यंहेतो
तोपिघटान्योन्याभावत्वेपटरूपत्वेचहेतौधितौमतान्तरेभेदीवादिमत्वादीनियथाश्रुतंयथाश्रुतमूला-
नुसारेणयथाविवक्षितेतुसत्वादिपदंसत्तात्वादिपरं एकैकस्येतिकेवलविशेष्यकेवलविशेषणयोरि-
त्यर्थः नचघटनिष्ठान्योन्याभावइत्यनेनप्रसिद्धपटत्वाद्यभावविवक्षणेतत्राभिधेयत्वप्रतियोगिकत्वस्य
वाधात्साधनसंभवः अभिधेयत्वाभावस्यनाप्रसिद्ध्यानपक्षसंभवइत्याशंकांनिरसितुमाह घटनिष्ठे
ति उभयमतप्रसिद्धेरुक्तहेतुत्वाद्वात्र शुद्धोवाधोदोषः अभावस्यकस्यचिदभिधेयत्वप्रतियोगिकत्वमपीति
विवादेपक्षतावच्छेदकावच्छेदेनवाधोऽनिश्चयः पक्षतावच्छेदकप्रसिद्धेर्वुनाश्रयासिद्धिरित्यर्थः ननुस्वरू-
पसंबंधेनाभिधेयतत्वावच्छिन्नसाध्यकानुमितौ पक्षनिष्ठाभावेतत्संबंधावच्छिन्नत्वविशेषिताभिधेय-
त्वत्वावच्छिन्नप्रतियोगिकत्वानुमितिरेवविरोधिनीतादृशंचसाध्यमप्रसिद्धं नचघटनिष्ठस्वरूपसंबं-

धावच्छिन्नप्रतियोगिताकाभावेत्वेन पक्षत्वाद्धेत्वसिद्धिः स्वरूपसंबंधावच्छिन्नगगनाद्यभावस्य
संयोगादिसंबंधावच्छिन्नाधिपत्वत्वावच्छिन्नप्रतियोगिताकाभावसमनैपक्ष्येनाभिन्नतयासिद्धसाधनस
द्भवीतत्वादिति चेत्सत्यं स्वरूपसंबंधावच्छिन्नाया घटनिष्ठाभावप्रतियोगितायां घटनिष्ठनित्याभावप्र
तियोगितात्वेन हेतुना घटनिष्ठाभिधेयत्वभेदप्रतियोगिताहृष्णांते नाभिधेयत्वत्वावच्छिन्नत्वानुमाने दृ
लतात्पर्येण सामजस्य मूले विशेषादर्शनं दृष्टान्तामिति व्यभिचारिणप्रताह शाहेतौ व्यभिचारग्रहदशाया
मित्यर्थः केवलान्वयिन्यपि संभवइत्यनेनास्यान्वयः व्यभिचारस्थलं दर्शयन्नेतत्कथनप्रयोजनमाह १
दीधितौ नत्विति आद्यस्य ज्ञात्वनन्यत्वइत्यादि प्रथमानुमानहेतोः द्वितीयस्य घटवृत्तीत्यादि द्वितीयानुमानहे
तोः प्रतियोगित्वादिप्रकारकबाधबुद्धेर्विशिष्टबुद्धिविरोधितायानवश्यैरनभ्युपगमात् तथा सति तत्संबंध
प्रकारकबुद्धेरपि विरोधापातात् नोक्तानुमानेन घटोभिधेयः प्रमेयत्वादित्यनुमानप्रतिरोधसंभवइ
ति स्वयमभिधेयत्वरूपप्रतियोगप्रकारेणाभावानुमानमेव मूलकृता साध्याप्रसिद्ध्या उपेक्षितमपि प्रति
रोधकतया व्यवस्थापयति वस्तुतइति साध्याप्रसिद्ध्याऽन्वयव्यतिरेकानासंभवात् पक्षादिसाधारणद्रव्यत्वा
देः पक्षादौ व्यभिचारग्रहसंभवेन व्यतिरेकितयापि साधकतायाः स्वघटत्वाभावेन पक्षमात्रवृत्तिकंबुग्री
वादिहेतुकव्यतिरेक्याह सः अभावसाध्यकव्यतिरेकितया साध्यप्रसिद्धेरनपेक्षतां दर्शयति व्यापकाभावे १
नेति पक्षादावभिधेयत्वादिव्यापकतया गृहीतस्य कंबुग्रीवादिमत्त्वाभावस्याभावेन कंबुग्रीवादिनेत्यर्थः
अप्रसिद्धस्यापि प्रतियोगितया अभिधेयत्वादिप्रकारीकृतायाज्ञानस्यापि व्याप्याभावस्य व्याप्यतया गृहीतमभि
धेयत्वादिकं प्रतियोगितया प्रकारीकृत्य वस्तुभूतस्याभावांतरस्यापि सिद्ध्युपगमात् असिद्धसाध्यस्यानुमा

नस्यैकदेशिनामेवानुमततयाभ्युपगमोक्तिः कंबुग्रीवादिमत्त्वाभावस्य वास्तवाभिधेयत्वव्यापकताऽवि
रहाद् वस्तुभूताभिधेयत्वाभावस्यानुमित्यवगाहनासंभवात् प्रसिद्धपदत्वाद्यभावस्याव्याप्यतयागृहीताभि
धेयत्वप्रतियोगिकत्वाभावाद्व्यापकाभावेनेत्यादेर्यथाश्रुतस्यासंगतेर्बोध्या व्यवहर्तव्यविशिष्टप्रसिद्ध्य
वापि न विशिष्टार्थपरप्रतिज्ञाद्यसंभव इत्याह प्रत्येकपदार्थप्रसिद्ध्यैवेति तावतैव भ्रमात्मकस्य व्यवहारो
पयोगिविशिष्टज्ञानस्य संभवात् विशिष्टज्ञानं विनापि तत्र विशेष्यांशे तत्तद्विशेषणावगाहित्वेन तात्पर्यघटक
प्रतीतेर्ज्ञाने न विशिष्टबोधकवाक्यप्रयोगसंभवाच्चेति भावः मूलकृता सत्प्रतिपक्षहेतुदोषानभिधानात् स्व
यतान्यदर्शयति सत्प्रतिपक्षस्त्विति सत्प्रतिपक्षहेतोर्दोषोस्त्वित्यर्थः तुकारेण मूलनिरुक्तसत्प्रतिपक्षव्य
वहारविषयतावच्छेदकरूपस्य दोषत्वव्यवच्छेदः व्याप्यवान् व्याप्यविशिष्ट पक्षनिष्ठाधेयतया पक्षविशे
एवमादिति व्याप्त्यादिपदादाधेयतासंबंधेन प्रकृतपक्षसाध्यकप्रकृतसाध्याभाववादिपक्षकानुमितिजनकप
रामर्शविषयप्रकृतपक्षव्याप्यविशिष्टसाध्याभाववादिपरिग्रहः पक्षे साध्याभाव इत्यादिबाधबुद्धेरपि पक्षे सा
ध्यानुमितिविरोधितया तादृशबाधोन्नायकस्यापि परामर्शस्यानुमितिविरोधित्वेन तद्विषयविशिष्टस्यापि स
त्प्रतिपक्षतौचित्यात् अत एव साध्यतदभावयोराधेयतया साध्याभाववत्पक्षव्याप्यवत्ताज्ञानसंवलनदशा
यां पक्षे साध्यं साध्याभावो वेति कोटिविशेष्यकसंशयरूपानानुमिति प्रत्येकमेवेत्यनेन तावत्समुदायत्वस्य
सत्प्रतिपक्षत्वदोषविभाजकत्वासंभवाद्दर्शितः न तु प्रत्येकरूपस्याव्याप्त्याविभाजकत्वासंभवात् सर्वसा
धारणं किमेतद्दोषविभाजकमित्याकांक्षायां तादृशरूपमाह विभाजकं त्विति सर्वत्र प्रकृतेति पक्षसाध्य
योर्द्वयोरेवान्वेति प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमिति

त्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदिका सती विशिष्टसाध्यग्रहत्वव्यापकप्र
तिबंधकतानवच्छेदकानि तत्तत्पक्षसावैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयतावच्छिन्ना
नुमितिजनकतावच्छेदिका याहृशविशिष्टानिरूपितविषयिता ताहृशत्वमित्यर्थः ताहृशी च वह्न्य
भावव्याप्यविशिष्टह्रदानिरूपिता विषयतेति तत्र लक्षणसमन्वयः साध्याभावव्याप्यविशिष्टह्र
पक्षविषयतायाः साध्यानुमितिप्रतिबंधकतावच्छेदकतया तद्ध्रदनुमितिजनकतावच्छेदकविष
यताके साध्याभावव्याप्यव्याप्यवत्पक्षादावतिव्याप्तिवारकतया सत्यंतं सार्थकमिष्यते तत्र नि
रुक्तवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयताकत्वरूपविरोधित्वं नार्थस्य उक्तव्यापकविषय
विशेषणत्वे विषयताभागस्य द्विधा निवेशने गौरवात् उक्तव्यापकताघटकविषयतायामेव प्रतिबंधक
तावच्छेदकत्वविशेषणं दत्तं पक्षतायवच्छेदकवैशिष्ट्यनिवेशव्यावृत्तिः पूर्ववत् उक्तप्रकारताशा
लिग्रहानिरूपितप्रतिबंधकतामात्रनिवेशे साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्यापि तद्ग्रहालंबनसा
ध्यवत्ताग्रहरूपसाध्याभावव्याप्याभावादिमत्त्वग्रहप्रतिबंधकतया नोपदर्शिते सत्यंतपक्षोन्वाप
कव्यावृत्तिरितिताहृशप्रकारताकानुमितित्वव्यापकप्रतिबध्यतानिवेशताहृशप्रकारताशालि
दोषविशेषजन्यमाहार्यज्ञानं वा प्रति साध्याभावव्याप्यवत्ताज्ञानस्याप्रतिबंधकतया सत्यंति

गदा॰

पत्रस्यैवाग्रंग्रहद्दर्शितज्ञानत्वमुपेत्य
त्रमितित्वनिवेशफदः कोचन

मयवह्निमान् कांचनमयहृदो वह्निमानित्यादौ संयोगसंबन्धावच्छिन्नवह्न्यभावव्याप्यविशिष्टहृदादेर्ज्ञानस्य प्रतिबध्य
तावच्छेदककोटौ साध्यतावच्छेदकादिघटककांचनमयत्वादिविषयतायाः प्रवेशात् तद्घटितप्रतिबध्यतावच्छे।
दकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यग्रहत्वेनोक्तज्ञानप्रतिबध्यतावच्छेदकभिन्नत्वासिद्धिः स्यादतः।
स्वरूपसंबन्धावच्छिन्नत्वे परिमाज्य व्यापकत्वप्रतिबध्यत्वविशेषणम् अतएवोक्तस्थले बाधव्याप्यासिद्ध्याद्युन्नायको।
विशिष्टपक्षग्रहत्वादिमात्रावच्छिन्नविरोधित्वपि विशिष्टपक्षसाध्यवैशिष्ट्यविषयकानुमितित्वव्यापकप्र।
तिबध्यत्वाघटितविरोधित्वाशालिनि कांचनमयत्वाभावव्याप्यविशिष्टहृदादौ सत्वेन तद्गलस्तनिकसाध्यपक्ष
वैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकानुमितिजनकतावच्छेदकविषयत्वाकलनरूपतादृशविरोधिज्ञायत्वस्य च स क
त्वेनातिव्याप्तिः स्यादिति उभयेऽपि विरोधित्वविशेषणम् यत्तु संपूर्णतत्स्यादिना स्वयमेव वक्ष्यते उभयत्र तथा श।
विष्टविषये च विरोधित्वविशेषणम् यथा ज्ञानशाहृतलक्षणतद्येतादृशप्रतिबंधकतावच्छेदकविषयिता
कानन्तत्वान्तर्निवेशे धिकविषयितानिवेशाद्गौरवं वै कांचनमयो हृदो वह्निमानित्यादौ कांचनपदत्वाभाव
वद्धृदादिद्रूपाश्रयासिद्धिभेदस्य सत्वात्तिपक्षदोषो उभयवह्न्यभाववविशिष्टहृदादिद्रूपबाधे स्य वेनाव्याप्ति
रिति उव्यापकतावच्छेदकबाधविषयितायां विशिष्टपक्षतादिग्रहप्रतिबंधकतानवच्छेदकत्वनिवेशः उक्त
स्थले बाधग्रहस्यापि अनुमितिरूपविशिष्टपक्षतादिद्रूपग्रहविरोधित्वयाव्याप्तितादवस्थ्यमिति विशि।
ष्टपक्षतग्रहत्वव्यापकत्वनिवेशः विशिष्टपक्षतग्रहत्वपर्याप्तावच्छेदकताकत्वस्य प्रतिबध्यतायां निवे।
शो कांचनमयवज्जनमयहृदो वह्निमानित्यादौ आश्रयासिद्ध्याद्युन्नायके कांचनमयत्वाभावव्याप्यवद्धृदा
वतिव्याप्तिरजनमयत्वघटितपक्षतावच्छेदकविशिष्टग्रहत्वस्य तज्ज्ञानप्रतिबध्यतानवच्छेदकत्वात्तस्य

४०

गदा०

पेतत्ताहशाश्रयत्वव्यापकतायामन्तर्भावनिवेशः अतएव ह्रदो वह्निमानित्यादौ ह्रदत्वादिरूपपक्षतावच्छेदक
विशिष्टविषयकाश्रयत्वस्य केवलस्यैकस्यापि प्रतिबध्यतानवच्छेदकत्वेपि नाप्रसिद्धिः न च ताहशाश्रयत्व।
व्यापकप्रतिबध्यतानिवेशो कस्याप्यप्रतिविरोधित्वानप्रतिबध्यतायाह्रदइत्यादिनिर्धर्मितावच्छेदकतानस्याधा।
रणताहशाश्रयत्वव्यापकत्वासंभवान्नतादृशप्रतिबध्यताप्रसिद्धिः विशिष्टविषयकानुमितित्वव्याप।
कता निवेशे ताहशानुमितित्वस्यापि धर्मितावच्छेदकतानवच्छिन्नतत्वेऽपि ह्रदो वह्निमान् ह्रदो ह्रदत्ववानित्यादि
नानाप्रकारकानुमितिषु वह्निह्रदत्वादिविशिष्टविषयकानुमितित्वसत्त्वात्ताहशाश्रयकत्वानुमितौ नोकस्यावित्वा।
न प्रतिबध्यतासंभवेन ताहशानुमितित्वव्यापकप्रतिबध्यतानप्रसिध्यतीति वाच्यं कामिनीजिज्ञासादि।
प्रतिबध्यतायाएवतथाविधानुमितित्वादिव्यापिकायाः प्रसिद्धेः यत्तत्तद्विरोधिताघटकप्रतिबध्य।
तायामेव पक्षतावच्छेदकादिविशिष्टविषयकानुमितित्वव्यापकत्वनिवेशात् नाप्रसिद्धिरिति सूक्ष्ममेवावधेरि
ते एतेन कामिनीत्वस्य यत्र पक्षतावच्छेदकतानतत्तद्विशिष्टविषयकानुमितित्वादेः कामिनीजिज्ञासा
प्रतिबध्यत्वाव्याप्यत्वेऽपि न क्षतिः अथोक्तेयद्विशिष्टपक्षतादिग्रहविरोधित्वनिवेशेऽपि वह्न्यभावव्याप्यवा।
प्याभाववान् ह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्यविशिष्टह्रदे आश्रयासिद्ध्यात्मकेऽतिव्याप्तिर्दोषैव तस्य
वह्न्यभावव्याप्यविशिष्टह्रदात्मकसत्त्वेऽपि पक्षस्याविशिष्टपक्षग्रहविरोधित्वव्यापकत्वात् आश्रयासि।
द्धित्वेनानुमितिविरोधितया संपादिता कोनतानवबोधकपक्षविरोधेन विशेषणे विवक्षितेऽत्का।
श्रयासिद्धस्य विशिष्टपक्षग्रहविरोधितया नातिव्याप्तिरिति वाच्यम् तथा सति वह्निमान् ह्रदो वह्न्यभाव।
व्याप्यव्याप्याभाववानित्यत्र वह्न्यभावव्याप्यविशिष्टह्रदात्मकबाधेऽनुमितिविरोधिवह्न्यभावव्याप्यविशि

हृदत्वेनाश्रयासिद्धज्ञापकेऽतिव्याप्तेः तस्य वह्निविशिष्टह्रदात्मकविशिष्टपक्षग्रहाविरोधित्वादुज्ञापकेच्छा
विरोधित्वं तस्य विशेषणतोपगमेनातिप्रसंगस्य वारणीयत्वात् अथवा उन्नेयविशेषणमेवाविरोधित्वं तय।
द्धर्मावच्छिन्नप्रतिबध्यताघटितविरोधित्वं समत्वतार्थः तद्धर्मावच्छिन्नप्रतिबध्यताघटितविरोधिताया उ।
न्नेयविशेषणत्वयाविवक्षितत्वात् पूर्वोक्तस्थले वह्न्यभाववद्व्याप्यव्याप्यविशिष्टह्रदात्मकाश्रयासिद्धे।
विशिष्टपक्षग्रहत्वावच्छिन्नविरोधित्वेन समत्वं तद्व्याप्त्यतायास्तद्रूपावच्छिन्नाविरोधित्वः सत्प्रतिपक्षस्ये
वोज्ञापकत्वेनातिव्याप्तिः उन्नेयबाधस्य उज्ञापकसत्प्रतिपक्षस्य विशिष्टपक्षसाध्यवैशिष्ट्यग्रहत्वरूपैक
धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकत्वावच्छेदकविषयताकत्वेन समत्वेन तद्व्याप्त्यतायास्तद्रूपा।
वच्छिन्नाविरोधित्वः सत्प्रतिपक्षस्यैवोज्ञापकत्वेनातिव्याप्तिः उन्नेयबाधस्य उज्ञापकसत्प्रतिपक्षस्य
च विशिष्टपक्षसाध्यवैशिष्ट्यग्रहत्वरूपैकधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकविषयताकत्वेन
सत्प्रतिपक्षलक्षणसमन्वयः इति तत्रापि विरोधित्वं न विशेषणं वह्निव्याप्याभाववत्साध्यके वह्निव्याप्यवत्त्व
व्याप्यवत्त्वात्मकबाधस्य विशिष्टपक्षादिग्रहाविरोधिवह्निमत्त्वेनोज्ञापकस्य वारकमिति वक्तव्यतेन त्रय।
याश्च तन्निविरोधस्य ज्ञापकत्वप्रतिबंधकतावच्छेदकविषयिताकविशिष्टविषयतावच्छिन्नानुमितिप्रयोज्य।
कत्वेन च प्रतिबंधकतावच्छेदकविषयितायास्तन्निरूपितविषयितात्वेन निवेशनं विरोधघटत्वेन नासिका।
स्पर्शमनुकरोतीति प्रतिबंधकतावच्छेदकविषयितावच्छिन्नानुमितिप्रयोजकत्वं निवेशितं उत तस्य स्थले वह्नि
व्याप्यवत्त्वे न द्रव्यत्वाधस्य वह्निमत्त्वं तद्विषयकसमूहालंबनरूपवह्निव्याप्यवत्त्वे न रूप विशिष्टप
क्षादिग्रहाविरोधिविषयकानुमितिप्रयोजकत्वयात्र अतिप्रसंगः स्यादिति विरोधिविषयतावच्छिन्नति

गदा

त्रूपविप्रयोजकत्वेनिवेशितमनुमितिजनकत्वरूपमुज्ञापकत्वेनविषयतोतिमनुमितिजनकतावच्छेदकवि-
षयिताकत्वरूपमनुमितिप्रयोजकत्वमेवात्रनदित्याह उज्ञापकत्वेचेतिफटघाविशिविशिष्टविषयकत्वे
नेतितृतीयार्थे ऽनतिविकृष्टनियमवच्छेदकत्वेनत्रिवेशादिति व्याप्यवत्त्वंतद्रूपोक्तस्थलेपक्षाद्येसत्वमितिपक्ष
विषयकसमूहालंबननविषयेनातिव्याप्तिः स्वरूपसंबंधरूपावच्छेदकत्वानिवेशेनसत्वमितिपदैकदेशेकेव
लयत्ताद्येवनातिव्याप्तिः नचकेवलितादृशाविशिष्टत्वेनार्थः साध्यव्यापकाभावप्रतियोगिप्रकृतहेतुमा
त्वत्ताद्येमनमेवविरोधासाधारण्यानुपसंहारित्वव्याप्तिवारयति असाधारणेतिपक्षविधेयेतिमनुमितिप्रति-
बंधकसाध्याभावव्याप्यवत्ताज्ञानाविषयेत्यर्थः सपक्षविपक्षव्यावृत्तत्वमसाधारण्यंसाध्यसामानाधिक-
रण्यविरोधइतिमते ऽनुमितिविरोधिनिरुक्तलक्षणातिव्याप्तिप्रसक्तिरतःपक्षइत्यंके प्रतियोगि-
त्वादसाधारणपक्षधर्मतापरिचयहः तथाचप्रकृतपक्षतावच्छेदकविशिष्टव्यापकाभावप्रतियोगित्ववि-
शिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिपरामर्शनिष्ठानुमितिजनकतावच्छेदकविषयि-
ताकत्वरूपमुज्ञापकत्वंविवक्षणीयमित्यर्थः रूपान्तरेणायत्रप्रकृतहेतोर्व्यतिरेकिप्रतिरेकतातत्स्थली-
यप्रतिपक्षसंग्रहायप्रकृतसाध्यतावच्छेदकनिवेशाद्रूपान्तरावच्छिन्नसाध्यव्यापकीभूताभावप्रतियो-
गित्वविशिष्टप्रकृतहेतुमत्पक्षकालीनत्वमपक्षप्रकृतसाध्यतावच्छेदकघटकत्वतत्स्थलीयतादृशसाध्या-
वच्छेदकविशिष्टसाध्याभावव्याप्यवत्पक्षात्मकप्रतिपक्षसंग्रहायप्रकृतसाध्यतावच्छेदकनिवेशः य-
त्रप्रकृतसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतसाधनत्वेनरूपान्तरावच्छिन्नपक्षतावच्छेदक
प्रवेशात्तत्रप्रतिपक्षसंग्रहायपक्षतावच्छेदकविशिष्टसाध्याभावव्याप्यवत्तारूपप्रसंग्रहायप्रकृतपक्ष

तावच्छेदकनिवेशः साध्याभावनिरूपितान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षस्य लक्ष्यत्वोपगमात्तत्रातिव्या
प्तिः तस्मात्साधारण्यमात्रात्मकत्वेन दूषणत्वादित्यमपि परामर्शविशेषणं देयं तत्संग्राहकमप्यादिपदं सं।
त्पति प्रतीत्युत्पादकस्येति साध्याभावव्याप्यवत्पक्षादेरविरोधितया नाभासत्वरूपस्येत्यर्थः आश्रयासिद्ध्याद्य।
ज्ञापकस्येति आश्रयासिद्ध्याद्येतद्गतस्य पक्षविशेषणाद्यभावव्याप्यवत्पक्षादेर्वित्यर्थः आश्रयासिद्धादौ।
त्वादिपदात्साध्याप्रसिद्ध्यादिपरिग्रहः वह्न्यादिसाध्यकबाधस्य किंचिदनुज्ञापकतया तत्रैवाविरोधित्वेनावि
शेषणस्य तद्ग्राहकतानसंभवतीति बाधविशेषणतयाऽऽहृतिं दर्शयति विरोधित्वेनेति वह्निव्याप्यवत्पक्षात्मक
स्येत्यनेन वह्निमत्त्वप्रज्ञापकत्वेऽप्यविरोधित्वेन साध्यव्यापकमिति यथा तथा स्वरूपसंबंधरूपसाध्यवै।
शिष्ट्यं वा परिहाय वह्नित्वनिवेशासंभवं दर्शयति संगृह्यत इति अनेन लक्षणेन प्रतिस्थापनात्मकव्या
प्रयोगानौचित्यं दर्शयिष्यन्नेतस्य सत्प्रदीपिकात्मामाह सत्प्रतिपक्षे चेति यथासिद्धान्तमिति नैयायिका
दिमतिवादिनां स्वसिद्धान्तानुसारेणेत्यर्थः पंचावयववादीति ह्रदो न वह्निमान् ह्रदत्वादित्यादिरूपस्यादिः आ
दिना मीमांसकादौ गतसिद्ध्यवयवत्र्यवयवप्रयोगपरिग्रहः इष्टं नेति सत्प्रदीपिका इति शेषः उचितं
प्रतिभातीति वादिनामयं प्रयुक्तेऽत्र दोषमात्रस्यैवाकोटि तत्कालात्ययमतस्त्वमवद्धाव्यविपरीतप्रतिज्ञा।
दिप्रयोगेष्वर्थान्तरस्य दुर्वारत्वादिति भावः इति सत्प्रतिपक्षस्य संमतेऽधिकबलत्वान इति अधिकबलत्वा।
सत्त्वाने यस्मादिति च्युतप्रत्ययाधिकबलत्वाभाव इत्यर्थः अधिकबलत्वे च प्रवेशोपाधिकनिश्चितप्रामाण्यका।
निश्चितत्वरूपविशेषणानां वह्नित्वे बाधाभावात् बाधकत्वाभावान्न प्रतिबंधकत्वाभावादिति यावत् तथा च निरुक्ता
विषकत्वस्य प्रतिबंधकसाधारणतया न तस्य दोषत्वमिति भावः साध्याभावव्याप्यवत्त्वमिति साध्याभाव

वत्वात् विषयकत्वान् विषयतेन तत्ताहशप्रत्यक्षेतिलमतत्वतोस्य भेदः साध्याभाववन्मेतिवत्ताहशवाधज्ञानस्य
गदा· प्रमात्वविषयकत्वानियमेन प्रतिबंधकताघोग्यादिति भावः प्रमात्वं च न साध्याभाववत् विशेष्यकत्वं पर्वतो ह्र
दश्च वह्निमानित्यादिज्ञानविषयसाध्याभाववमादायपर्वतादिपक्षकेवाधप्रसंगात् किंतु साध्यवदविशेष्यक।
३ त्वे सति तावच्छेदकावच्छिन्नोशे साध्याभाववत्वानवगाहित्वेन विरोधिविषयकत्वेन प्रतिबंधकत्वे विवादात्तद्देशे सा
ध्याभाववत्त्वच्छेदितेलक्षणमाह प्रमितेति प्रमितत्वं च विशेष्यकप्रमाप्रकारत्वेन संपन्नः प्रमात्वे एवं च न सिद्धांते
प्रमेविषयतायां न सप्रकारत्वं स्वरूपितत्वान्नस्यैवातः यत्तन्निष्ठप्रमाविषयत्वप्रकारत्वं साध्याभावविशेष्यणात्।
यानिवेशानंनिरुक्तं च विशेष्यता रूपविषयतायां प्रकारतानिरूपकत्वमस्त्यासिद्धविषयता निरूपितप्रकारता
रूपस्य विषयताप्रकारत्वस्याभावदृष्टितिवात्रविरोधइतिवाच्यं कार्यता कारणत्वयोरिव विशेष्यविषयत्व।
योर्निरूपकभावसंबंधसत्वेपि कार्यतायाः कारणनिरूप्यत्ववत् रूपेणताहशानिरूप्य निरूपकभावसंबंधस्य
शेतावित्ताहसषष्ठीतत्पुरुषसमासस्य विषयताप्रकारस्याहेनोक्तार्थाप्रतिपादकत्वात् सविषयकेज्ञानादौ विष।
यता रूपप्रकारतापर्यायस्या संबंधत्वाहशस्येव यच्छब्दार्थत्वात् प्रकारतायास्ताहशसंबंधस्य विषयतायाम
विषयकत्वाचन्द्रात्वमिह्हेणाप्रसक्तात् यावित्तिविमथ्याकाललादतः प्रकारकत्वे विषयतायां पर्यवसन्नत्वान्नस्य
प्रकारतयान्नात्मकप्रतियोगितावच्छेदकतातत्वावच्छेदकतात्स्वावैशिष्ट्यत्वादिस्य तिरिक्तविषयतावा
च्यकदेशिमताभिप्रायकत्वयाविषताप्रकारत्वपर्यंततनिवेशानंसंगमयत्नदीयितोत्रातिरिक्तेतिपदे साध्याभा
वः यन्निष्ठाभावप्रतियोगिसाध्यमित्यादिप्रमायांसाध्याभावप्रकारकविषयतायाः यत्तेःसत्ताचाहशा।
ज्ञानसाध्यत्वताणसंगमनं तद्दर्शयति यत्तेति ज्ञाने यन्निष्ठविषयत्वस्य प्रकारइतिताहशज्ञानीयाया।

पक्षनिष्ठविषयतानिरूपितप्रकारताश्रयत्वमर्थः एतेन पक्षनिष्ठत्वादिकं नाभावादेर्विशेषणं किं-
न्तु विषयत्वादेः प्रकाराभाव इति न षष्ठीतत्पुरुषः किंतु कर्मधारय इत्यादिकमपि पक्षटीकोक्तं साध्या-
भावप्रमैवेत्येवकारेण पक्षत्वादेर्दोषघटकतावच्छेदकत्वासंभवः पक्षत्वादिविषयत्वस्य प्रतिबंधका-
तोपयोगित्वात्तयोर्हेतुतत्संबंधमात्रावच्छेदकतामात्रिकत्वेन तद्विषयकस्य प्रतिबंधकत्वात्तदुपयोगित्वेन
द्यवच्छेदकत्वमाह हेत्वादीति एवंच साध्याभावप्रमायाः साध्याभावप्रमाविषयत्वादिरूपविशेषणा-
विशिष्टपक्षमित्यवधेयं मूले साध्याभाववतीति पक्षे साध्याभाववत्त्वेन ज्ञायमाने पक्षे न तु साध्याभावप्रमा-
विषयपक्षकत्वादिरूपदर्शितबाधपक्षतांशे प्रमाविषयत्वमेव निविष्टं न तु साध्याभाववत्त्वमित्युक्तं।
ज्ञानदशायां हेतुसाध्याभाववतोः सामानाधिकरण्यरूपव्यभिचारस्थितेर्नावश्यकत्वेनेति कथमप्रमा-
त्वे पक्षत्वादिरित्याकांक्षानिराकरणाय तिरोधितो साध्याभावेति साध्याभाववत्त्वग्रहस्यावश्यकत्वाभिप्रायेणे-
तितद्धि निरुक्तप्रकारकत्वरूपस्य तत्प्रमात्वस्य धर्मिणि तद्वत्त्वघटितत्वादिति भावः नतु प्रमात्वघटकतया सा-
ध्याभाववत्त्वेन धर्मिणो भानेऽपि न व्यभिचारबुद्धेः पक्षधर्मकत्वाद्येन रूपेण हेतुमत्त्वज्ञाने तेन प्रकारेण हे-
तुमत्त्वप्रकारेण बाधधर्मिणि साध्याभावज्ञानस्यैव व्यभिचारज्ञानत्वात्तद्दर्शितसाध्यवद्विशेष्यकत्वस्या।
यप्रमात्वप्रवेशेऽपि साध्याभाववद्बुद्धेरेवावश्यकत्वमित्यनुशयादाह साध्याभावस्येति पक्षनिष्ठस्ये-
त्यादिः मूले यत्सिद्धिः पक्षधर्मताज्ञानरूपकारणविरहः तथाच बाधबुद्धिदशायां यदनुमितिविरो।
धितो व्यभिचारज्ञानस्य पक्षधर्मताज्ञानरूपकारणविरहसंपादकत्वसंभवात्तत्र बाधानुमितिप्रतिबंधकत्वादे।
रुक्तेर्वा यत्सत्त्वे हेत्वाभासत्वेनेति भावः संशययोग्यसाधकबाधकप्रमाणाभावः तस्याभावेन नहि।

ग्रस
89

ग्रहकबाधकमानसत्वेन पक्षेन संशयापत्त्या विरहपक्षताविरहयोरभेदाद्धेतुमज्ञावेनभिधानमसंगतमिति
निरस्तं साध्यासिद्धिः पक्षधर्मताज्ञानविषयधर्मविशेषणतया अनुमितिप्रयोजकत्वात्सत्वे मिद्धाभावप।
